X

CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

Coll. No. 5

Title BHAGAVANTA-BHASKARA.
(A'CARA-MAYUKHA)

5 R.5

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: R 5 Subject: Dharmaśastra.

Title: Bhagavanta Bhāskara (Āchāra Mayūkha)

Author: Nīlakantha Batt Scribe: Rāmajit son of Sri Krsna

Date of the work: C 1640 A.D. Date of the Ms.: V.S. 1737

Place of the work: — Place of the Ms.: —

Size: 10.7" by 5" Extent: 81 folios + 2 of Entrants

Language: Sanskrit Script: Devanagari

Remarks: Complete.

आ॰म॰
१

॥श्रीगणेशाय नमः॥ अथ भगवद्भास्करे आचारमयूखो लिख्यते॥ आदौ दिवाकरस्यादमवलंबे कु
ङ्कमुकुः॥ यत्प्रसादाल्लंघितं प्रपंचपयोराशिः संप्रति॥ श्रुतिःस्मृतिर्वीजस्रपुराणजातं तत्र त्रिबंधानपि सन्निबं
धान्॥ चिरंतनाचारस्वयंच वद्भाग्यथाह्निकं संप्रति नीलकंठः॥ समूलनिर्मूलमपि व्यवस्थां विनाधृतं यद्विष
यस्य कैरपि॥ नानौषधैस्तद्गुणिनापणस्थैर्विषिग्वरानुक्रमगुणैः समं मतं॥ प्रतारैकैराद्दतमत्र किंचिन्मया तु निर्मू
लतयातदुज्झितं॥ कृतो क्लिन्ताते न हितेन काविद्धपुष्यहीनापचितिर्न हीयते॥ तत्र परिभाषा॥ कर्मप्रदीपे॥ यत्रो
पदिश्यते कर्म कर्तुरंगं न तूच्यते॥ दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः करः॥ यत्र दिङ्नियमो नस्याज्जपहोमादि
कर्मसु॥ तिस्रस्तत्र दिशः प्रोक्ता ऐन्द्री सौम्यापराजिता॥ ऐन्द्री प्राची॥ सौम्या उत्तरा॥ अपराजिता ईशानदिक्॥ तिथि
तत्त्वे गौतमः॥ रात्रावुदङ्मुखः कुर्याद्दैवं कार्यं सदैव हि॥ शिवार्चनं सदाप्येवं शुचिः कुर्यादुदङ्मुखः॥ सदा दिवा १

रात्रौ॥ तत्रैव तंत्रांतरे॥ यत्रैव नानुरक्तविषयकदेति प्राचीं तु तां वेदविदो वदंति॥ ततोपरां पूजकपूज्ययोश्च सदा
गमज्ञाः प्रवदंति तां तु॥ अत्र पूज्यपूजकांतः प्राचीत्यागमोक्तं तज्जायामेव॥ तत्परिभाषायां भुक्तत्वात्॥ अन्यत्र
तु सूर्योदयोपलक्षितैव॥ छंदोगपरिशिष्टे॥ आसीन ऊर्ध्वः प्रह्वो वा नियमो यत्र नेदृशः॥ तदासीनेन कर्तव्यं
न प्रह्वेण न तिष्ठता॥ उपवीतशिखाबंधनयोः पुरुषार्थत्वं क्रत्वर्थत्वं चोक्तं॥ तत्रैव॥ सदोपवीतिना भाव्यं
सदा बद्धशिखेन च॥ विशिखो व्युपवीतश्च यत्करोति न तत्कृतं॥ मार्कंडेयपुराणे॥ शिरः स्नातश्च कुर्वीत दैवं
पित्र्यमथापि वा॥ धर्मप्रकाशे योगयाज्ञवल्क्यः॥ आर्षं छंदश्च दैवत्यं विनियोगं तथैव च॥ वेदितव्यं प्रयत्नेन ब्राह्म
णेन विशेषतः॥ अविदित्वा तु यः कुर्याद्याजनाध्यापनं जपं॥ होममंतर्जलादीनि तस्य चाल्पफलं भवेत्॥ तत्रैवापस्तं
बः॥ तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः॥ प्रवर्तंते विधानोक्ताः सततं ब्रह्मवादिनां॥ त्रिमात्रस्तु प्रयो
क्तव्यः कर्मारंभेषु सर्वशः॥ तिस्रः सार्धाश्च कर्तव्या मात्राः स्वल्पार्थचिंतकैः॥ बुधः॥ न्यायागतेन द्रव्येण कर्माणि कुर्या

आ॰प॰
२

दिति॥ ज्ञानस्य कृत्स्नर्थेन छांदोग्योपनिषदि॥ यदेव विद्यया करोति श्रद्धया तदेव वीर्यवत्तरं भवति उद्गीथोपास
नाप्रकरणाधीतेनाप्यनेन यथा ज्ञानस्य सर्वकर्मांगत्वं भवति तथा निरूपितमाध्ययनवादे॥ शाट्यायनिः॥ दान
माचमनं होमं भोजनं देवतार्चनं। प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्पणं॥ आसनारूढपादो वा जान्वोर्वा जंघयो
स्तथा। कृतावसक्थिको यस्तु प्रौढपादः स उच्यते॥ कर्मप्रदीपे॥ पित्र्यमंत्रानुद्रवणे आत्मालंभे अवेक्षणे। अधोवा
युसमुत्सर्गे प्रहासे नृतभाषणे॥ मार्जारमूषकस्पर्शे आक्रुष्टे क्रोधसंभवे। निमित्तेष्वेषु सर्वत्र कर्म कुर्वन्नपः स्पृशेत्॥
तत्रैव। तथा च तैलयंत्रेषु शश्वद्योयावश्यवेक्षते। तावत्कर्म न कर्तव्यं शूद्रांत्यपतितस्य च॥ मार्कंडेयः॥ संकल्पं
च यथा कुर्यात्स्नानदानव्रतादिके। अन्यथा पुण्यकर्माणि निःफलानि भवंति वै॥ यथा यथावदित्यर्थः॥ ब्राह्मे। ब्रह्म
ण्याधाय कर्माणि निःसंगः कामवर्जितः। प्रसन्नेनैव मनसा कुर्वाणो याति तत्पदं॥ यत्करोषीति कर्माणि मीश्वरप्री
त्यर्थं लिप्यमानां हारीतः॥ अनुष्ठितं तु यद्देवैर्मुनिभिर्यदनुष्ठितं। नानुष्ठेयं मनुष्यैस्तत्तदुक्तं कर्म आचरेत्॥ ॥ २

।वराहपुराणे॥ स्नानसंध्यातर्पणं द्विजपद्मो मामथार्चनं। उपवासवता कार्यं सायंसंध्याहुतीर्विना॥ चतुर्विंशति
मते॥ इक्षवः पयः फलं मूलं तांबूलं पयऔषधं। भक्षयित्वापि कर्तव्याः स्नानदानादिकाः क्रियाः॥ इति परिभाषा॥ अ
थ प्रबोधः॥ मनुः॥ ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिंतयेत्। कायक्लेशांश्च तन्मूलान्वेदतत्वार्थमेव च॥ देवतत्वा
र्थ ईश्वरः॥ ध्यायीत परमेश्वरमिति कूर्मपुराणात्॥ न्यायप्रतीतोर्थ इति श्रीदत्तः॥ ब्राह्मो मुहूर्तो रात्रेरुषांत्यो मुहू
र्तः। तथा च प्रयोगपारिजाते पुराणे॥ रात्रिगतमुहूर्तं पंचदशकं प्रकम्य ब्राह्मो नाम स्वतश्चैवं मुहूर्तः क्रमशो नि
शीति। रात्रेस्तु पश्चिमो यामो मुहूर्तो ब्राह्म उच्यत इति पितामहोक्तस्तु वेदाभ्यासार्थः॥ अत्र निद्रायां प्रायश्चित्तं
स्मृतिरत्नावल्यां॥ ब्राह्मे मुहूर्ते या निद्रा सा पुण्यक्षयकारिणी। तां करोति द्विजो मोहात्पादकृच्छ्रेण शुध्यति॥ शौन
कः॥ अस्तं गच्छति तिग्मांशावव्याधिगन एव यः। स्वपेत्स वाग्यतः स्थित्वा समस्तामपि तां निशां॥ प्रातः स्नात्वा अभिनिर्मु
क्तायेन स्वर्यादिपंचभिः। अग्निर्देव उपस्थाय सवितारं विशुध्यति॥ सूर्योदये स्वपेत्सोपि पूर्ववत्सकलं दिनं॥ वा

श्रा·म· ३ वंयमोऽनवेक्षितत्वाचारस्तं गतं दिवाकरं। ऊर्ध्मिरक्तयस्यते विश्वेष्याद्दितिः पंचपूर्वकान्॥ उत्तरान्निश्चा। नस्त्वनिरु
पतिष्ठेतस्तुष्ध्ये॥ अत्रस्मरणीयमाह व्यासः॥ महर्षिर्भगवान्व्यासः कृत्वेमां संहितां पुरा। श्लोकैश्चतुर्भिर्धर्मात्मा
पुत्रमध्यापयच्छुकं॥ मातापितृसहस्राणि पुत्रदारशतानि च। संसारेष्वनुभूतानि यांति यास्यंति चापरे॥ हर्ष
स्थानसहस्राणि भयस्थानशतानि च। दिवसे दिवसे मूढमाविशंति न पंडितं॥ ऊर्ध्वबाहुर्विरौम्येष न च कश्चि
च्छृणोति मे। धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते॥ न जातु कामान्न भयान्न लोभाद्धर्मं त्यजेज्जीवितस्यापि
हेतोः॥ धर्मो नित्यः सुखदुःखे त्वनित्ये जीवो नित्यो हेतुरस्य त्वनित्यः॥ इमां भारतसावित्रीं प्रातरुत्थाय यः पठे
त्। स भारतफलं प्राप्य परं ब्रह्माधिगच्छति॥ स एव। प्रातः स्मरामि नवनीतिमहान्निशिंत्यै नारायणं गरुडवाह
नमंजनाभं। ग्राहाभिभूतवरवारणमुक्तिहेतुं चक्रायुधं तरुणवारिजपत्रनेत्रं॥ प्रातर्नमामि मनसा वच सा
वमूर्ध्ना पादारविंदयुगलं परमस्य पुंसः। नारायणस्य नरकार्णवतारणस्य पारायणप्रवणविप्रपरायणस्य॥ २ ३

॥ प्रातर्भजामि भजतामभयंकरं तं प्राक्सर्वजन्मकृतपापभयापहत्यै। यो ग्राहवक्त्रपतितांघ्रिगजेंद्रघोरशोकप्र
णाशमकरोद्धृतशंखचक्रः॥ ३॥ श्लोकत्रयमिदं पुण्यं प्रातः प्रातः पठेन्नरः। लोकत्रयगुरुस्तस्मै दद्यादात्मपदं हरिः
॥ स्वधर्मचिंतामणौ॥ ॥ प्रातः स्मरामि गणनाथमनाथबंधुं सिंदूरपूर्णपरिशोभितगंडयुग्मं। उद्दंडविघ्नपरिखं
डनचंडदंडमाखंडलादिसुरनायकवृंदवंद्यं॥ १॥ प्रातर्नमामि चतुराननवंद्यमानमिच्छानुकूलमखिलं च वरं
ददानं। तं तुंदिलं द्विरसनाधिपयज्ञसूत्रं पुत्रं विलासचतुरं शिवयोः शिवाय॥ २॥ प्रातर्भजाम्यभयदं खलु भक्त
शोकदावानलं गणविभुं वरकुंजरास्यं। अज्ञानकाननविनाशनहव्यवाहमुत्साहवर्द्धनमहं सुतमीश्वरस्य॥
३॥ श्लोकत्रयमिदं पुण्यं सदा साम्राज्यदायकं। प्रातरुत्थाय सततं यः पठेत्प्रयतः पुमान्॥ ॥ प्रातः स्मरामि खलु
तत्सवितुर्वरेण्यं रूपं हि मंडलमृचोऽथ तनुर्यजूंषि। सामानि यस्य किरणाः प्रभवादिहेतुं ब्रह्माहरात्मकमलक्ष्यम
चिंत्यरूपं॥ १॥ प्रातर्नमामि तरणिं तनुवाङ्मनोभिर्ब्रह्मेंद्रपूर्वकसुरैर्नुतमर्चितं च। वृष्टिप्रमोचनविनिग्रहहेतु

श्री·म·
४

भूतं त्रैलोक्यपालनपरं त्रिगुणात्मकं च ॥२॥ प्रातर्भजामि सवितारमनंतशक्तिं पापौघशत्रुभयरोगहरं परं च
।तं सर्वलोककलनात्मककालमूर्तिं गोकंठबंधनविमोचनमादिदेवं ॥३॥ श्लोकत्रयमिदं भानोः प्रातःप्रातः पठे
त्तु यः ।स सर्वव्याधिनिर्मुक्तः परमं सुखमाप्नुयात् ॥ ॥प्रातः स्मरामि शरदिंदुकरोज्वलाभां सद्रत्नवत्समकरकुंड
लहारभूषां ।दिव्यायुधोर्जितसुनीलसहस्रहस्तां रक्तोत्पलाभचरणां भवतीं परेशीं ॥१॥ प्रातर्नमामि महिषासु
रचंडमुंडशुंभासुरप्रमुखदैत्यविनाशदक्षां ।ब्रह्मेंद्ररुद्रमुनिमोहनशीललीलां चंडीं समस्तसुरमूर्तिमनेकरूपां ॥
२॥ प्रातर्भजामि भजतामभिलाषदात्रीं धात्रीं समस्तजगतां दुरितापहंत्रीं ।संसारबंधनविमोचनहेतुभूतां मायां प
रां समधिगम्य परस्य विष्णोः ॥३॥ श्लोकत्रयमिदं देव्याश्चंडिकायाः पठेन्नरः ।सर्वान्कामानवाप्नोति विष्णुलोके महीयते ॥
दे ॥ ॥प्रातः स्मरामि भवभीतिहरं सुरेशं गंगाधरं वृषभवाहनमंबिकेशं ।खट्वांगशूलवरदाभयहस्तमीशं संसाररोगह
रमौषधमद्वितीयं ॥ प्रातर्भजामि शिवमेकमनंतमाद्यं वेदांतवेद्यमनघं पुरुषं महांतं ।नामादिभेदरहितं षड्भावशून्यं ४

संसाररोगहरमौषधमद्वितीयं ॥२॥ प्रातर्नमामि गिरिशं गिरिजार्द्धदेहं सर्गस्थितिप्रलयकारणमादिदेवं ।विश्वेश्वरं
विजितविश्वमनोभिरामं संसाररोगहरमौषधमद्वितीयं ॥३॥ प्रातः समुत्थाय शिवं विचिंत्य श्लोकत्रयं येनुदिनं पठंति ।ते
दुःखजातं बहुजन्मसंचितं हित्वा पदं यांति तदेव शंभोः ॥ ॥वामनपुराणे ॥ ब्रह्मामुरारिस्त्रिपुरांतकारिर्भानुः शशी भूमिसुतो
बुधश्च ।गुरुश्च शुक्रः शनिराहुकेतवः कुर्वंतु सर्वे मम सुप्रभातं ॥ भृगुर्वसिष्ठः क्रतुरंगिराश्च मनुः पुलस्त्यः पुलहश्च गौतम ॥
रैभ्यो मरीचिश्च्यवनश्च दक्षः कुर्वंतु सर्वे मम सुप्रभातं ॥ सनत्कुमारः सनकः सनंदनः सनातनोप्यासुरिपिंगलौ च ।सप्तस्वराः
सप्तरसातलानि कुर्वंतु सर्वे मम सुप्रभातं ॥ सप्तार्णवाः सप्तकुलाचलाश्च सप्तर्षयो द्वीपवनानि सप्त ।भूरादिकृत्वा भुवना
नि सप्त कुर्वंतु सर्वे मम सुप्रभातं ॥ पृथ्वी सगंधा सरसास्तथापः स्पर्शी च वायुर्ज्वलितं च तेजः ।नभः सशब्दं महता सहैव कु
र्वंतु सर्वे मम सुप्रभातं ॥ इत्थं प्रभाते परमं पवित्रं पठेत्स्मरेद्वा शृणुयाच्च तद्वत् ।दुःस्वप्ननाशस्त्विह सुप्रभातं भवेच्च नित्यं भ
गवत्प्रसादात् ॥ पुण्यश्लोको नलो राजा पुण्यश्लोको जनार्दनः ।पुण्यश्लोका च वैदेही पुण्यश्लोको युधिष्ठिरः ॥ अश्वत्थामा

वलिर्व्यासो हनूमांश्च विभीषणः। कृपः परशुरामश्च सप्तैते चिरजीविनः॥ सप्तैतान्संस्मरेन्नित्यं मार्कंडेयमथा
ष्टमं। जीवेद्वर्षशतं सोपि सर्वव्याधिविवर्जितः॥ अहल्या द्रौपदी सीता तारा मंदोदरी तथा। पंच कन्याः स्मरेन्नि
त्यं मानहान्या न बाध्यते॥ मदनपारिजाते स्कांदे॥ अविसक्तचरणयुगलं दक्षिणमूर्त्तेस्त्रिकंकुष्टवत्तुष्कं। स्म
रणमपि वाराणस्या निहंति दुःखमनमपशकुनं च॥ प्रयोगपारिजाते भूप्रार्थना॥ समुद्रवसने देवि पर्वतस्तन
मंडले। विष्णुपत्नि नमस्तेस्तु पादस्पर्शं क्षमस्व नः॥ कात्यायनः॥ श्रोत्रियं सुभगां गां च अग्निमग्निचितिं तथा। प्रा
तरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यते॥ रोचनां चंदनं गंधान्मृदंगं दर्पणं मणिं। गुरुमग्निं रविं पश्येन्नमस्येत्प्रातरे
व हि॥ पापिष्ठं दुर्भगं चांधं नग्नमुत्कृत्तनासिकं। प्रातरुत्थाय यः पश्येत्स कलेरुपलक्षणं॥ नग्नं बालकव्यतिरिक्त
मिति निर्णयसिंधुः॥ इति प्रबोधविधिः॥ अंगिराः॥ उत्थाय पश्चिमे रात्रेस्ततश्चाचम्य चोदकं। अंतर्धाय तृणैर्भूमिं शिरः प्रा
वृत्य वाससा॥ कुर्यान्मूत्रपुरीषे तु शुचौ देशे समाहित इति। तत्र विशेषमाह॥ यमः॥ अयज्ञियैरनार्द्रैश्च तृणैः सं ५

छाद्य मेदिनीमिति॥ पराशरः॥ विष्णुः। घ्राणास्ये वाससा वेष्टयित्वा मूर्द्धानं ग्रीवायामासज्याचरेदिति। मृ
द्धानीं मृत्तिकाधानार्थं शाटी। याज्ञवल्क्यः॥ दिवासंध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः। कुर्यान्मूत्रपुरीषे तु रा
त्रौ च दक्षिणामुखः॥ कर्णस्थ इति दक्षिणः कर्णो गानामनुक्तौ तु दक्षिणं गंतव्यमिति स्मृत्यर्थसारोक्तेः॥ अंगिराः
॥ कृत्वा यज्ञोपवीतं तु पृष्ठतः कंठलंबितं। विण्मूत्रं तु गृही कुर्याद्वा कर्णे समाहित इति। शांखायनः॥ यद्येक
वस्त्रो यज्ञोपवीतं कर्णे कृत्वा मूत्रपुरीषोत्सर्गं कुर्यादिति। पवित्रं दक्षिणे कर्णे कृत्वा विण्मूत्रमुत्सृजेदिति
हारीतोक्तेः॥ पवित्रमपि दक्षिणे स्थाप्यं। दर्भस्थानान्यपरार्के। नीवीमध्येषु ये दर्भा ब्रह्मसूत्रे च ये कृताः।
पवित्रांस्तान्विजानीयाद्यश्च कर्णे च दक्षिणे॥ अत्र विशेषमाह यमः॥ प्रत्यङ्मुखस्तु पूर्वाह्णे परान्हे प्राङ्मुखस्त
था। उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामुखः॥ यत्तु पूर्वोक्तं याज्ञवल्कीयं सामान्यं तदनेन बाध्यते। तस्य
मध्याह्ने निशायां च सावकाशत्वात्। यत्तु माधवः। सदैवोदङ्मुखः कुर्यादिति देवलवाक्यस्थसदाशब्द

आ॰म॰
६ म

त्वाङ्मुखवक्त्रस्याङ्मुखशब्दो सूर्याभिमुखपरो इति तच्चिंत्यं। सदाशब्दस्यावश्यकत्वबोधकत्वेनाप्यु
पपत्तेः। यदपि देवणभट्टः। याज्ञवल्क्ययूवाक्यार्थयोर्विकल्पमाह। तदपि चिंत्यं। सामान्यविशेषशास्त्र
योर्विकल्पायोगात्॥ यत्तु देवलः। विण्मूत्रमाचरेन्नित्यं संध्यासु परिवर्जयेदिति। तन्निरुद्धेतरविषय
मिति माधवः॥ मनुः॥ छायायामंधकारे वा रात्रावहनि वा द्विजः। यथासुखमुखः कुर्यात्प्राणबाधाभये
षु च॥ रात्रौ तु गृहेपि कुर्यात्। तदाहापस्तंबः॥ अस्तमिते बहिर्ग्रामादारादावसथात् मूत्रपुरीषयोः क
र्म वर्जयेदिति। आरात् दूरात्। मदनरत्ने हारीतः॥ उच्चारे मैथुने चैव प्रस्रावे दंतधावने। स्नाने भोजन
काले च षट्सु मौनं समाचरेत्॥ उच्चारः पुरीषोत्सर्गः। प्रस्रावो मूत्रोत्सर्गः। आचारप्रदीपेंगिराः। संध्य
योरुभयोर्जप्ये भोजने दंतधावने। पितृकार्ये च दैवे च तथा मूत्रपुरीषयोः॥ गुरूणां सन्निधौ दाने योगे चै
व विशेषतः। एषु मौनं समातिष्ठन् स्वर्गं प्राप्नोति मानवः॥ सएव॥ आहारं च रहः कुर्यान्निहारं चैव सर्वदा। ६

गुप्ताभ्यां लक्ष्म्युपेतः स्यात्प्रकाशे हीयते श्रिया॥ विहारो मूत्रपुरीषाद्युत्सर्गः। आपस्तंबश्च॥ नवसोपानत्को
मूत्रपुरीषे कुर्यादिति। सायणीये। गृहीत्वा जलपात्रं तु विण्मूत्रे कुरुते यदि। तज्जलं मूत्रसदृशं पीत्वा चांद्रायणं च
रेत्॥ मलमूत्रं त्यजेद्विप्रो विस्मृत्यैवोपवीतधृक्। उपवीतं तदुत्सृज्य दद्यादन्यन्नवं तदैव हि॥ इति श्रीमीमांसकभट्ट
शंकरात्मजभट्टनीलकंठकृते आह्निके मूत्रपुरीषोत्सर्गविधिः॥ अथ शौचं॥ ॥नरहरिः॥ अथापत्स्वपि विण्मूत्रे
ल्लोष्टकाष्ठतृणादिना। उदस्तवासा उत्तिष्ठेद्दृढं विधृतमेहनः॥ याज्ञवल्क्योपि। गृहीतशिश्नश्चोत्थाय मृद्भिरभ्यु
द्धृतैर्जलैः। गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः॥ यमः॥ आहरेन्मृत्तिकां। आहरेज्जलमध्यात्तु परतो मणिबंधना
त्। एतदारण्यकविषयं। तथा च स्मृतिचिंतामणौ॥ अंतर्जलगता ग्राह्या परतो मणिबंधनात्। आरण्यकेषु त्वेवं स्या
द्ग्रामेप्याचरणं न तु। मनुः। यस्मिन्देशे तु यत्तोयं या च यत्रैव मृत्तिका। सैव तत्र प्रशस्ता स्यात्तया शौचं विधीयते॥ मा
पुलः॥ तीर्थे शौचं न कुर्वीत कुर्वीतोद्धृतवारिणा। रत्निमात्रं जलं त्यक्त्वा कुर्याच्छौचमनुद्धृते॥ पश्चात्तच्छोधयेत्ती

आ॰म॰
७

र्यत्वन्यथा त्वशुचिर्भवेत्॥ आह विवस्वान्॥ अर्द्धमात्रप्रमाणस्तु लिंगशौचे मृदः स्मृताः॥ दक्षोऽपि॥ लिंगे तु मृत्स
माख्याता त्रिपर्वा पूर्यते यया॥ शौनकः॥ आर्द्रामलकमात्रा वा मूत्रशौचे तु मृत्तिका॥ इति॥ अंगिराः॥ प्रथमा प्रसृतिर्ज्ञे
या द्वितीया च तदर्द्धिका। तृतीया मृत्तिका ज्ञेया त्रिभागकरपूरणीति। वसिष्ठः॥ एका लिंगे करे तिस्र उभयोर्मृत्तिकाद्वयं
मूत्रशौचं समाख्यातं शुक्रे तु द्विगुणं भवेत्॥ शौनकः॥ मूत्रात्तु द्विगुणं शुक्रे मैथुने त्रिगुणं भवेत्॥ विट्शौचे मृत्संख्यामाह
दक्षः॥ तिस्रोपाने दशैकस्मिन्नुभयोः सप्तमृत्तिकाः॥ यत्तु वसिष्ठः॥ यं चापने दशैकस्मिन् उभयोः सप्तमृत्तिका इति॥
यदपि यमः॥ द्वे लिंगे मृत्तिके देये गुदे पंच करे दश। उभयोः सप्त दातव्याः पुनरेका गुदे तथेति। तदर्द्धप्रसृतिमात्रा तु प्रथ
मा मृत्तिका मृत्तिका स्मृता। द्वितीया च तृतीया च तदर्द्धार्द्धा प्रकीर्त्तितेति विण्मूत्राद्यपरिमाणाभिप्रायं। यदपि शंखः॥
मेहने मृत्तिकाः सप्त लिंगे द्वे परिकीर्त्तिते। एकस्मिन्विंशतिर्हस्ते द्वयोर्ज्ञेयाश्चतुर्दश॥ तिस्रस्तु मृत्तिका ज्ञेयाः कृत्वा
तु नखशोधनं। तिस्रस्तु पादयोर्ज्ञेयाः शौचकामस्य नित्यशः॥ एतच्छौचं गृहस्थानां तथा गुरुनिवासिनां। द्विगु ७

णं स्याद्वनस्थानां यतीनां त्रिगुणं भवेदिति॥ तदपि पूर्वोक्तास्य परिमाणलेपबाहुल्ययोः समुच्चये ज्ञेयं॥
दक्षः॥ षडपानखशुद्धौ तु देयाः शौचेप्सुना मृदः॥ मनुः॥ एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणां॥ त्रि
गुणं तु वनस्थानां यतीनां च चतुर्गुणं॥ पितामहः॥ न यावदुपनीयंते द्विजाः शूद्रास्तथांगनाः॥ गंधलेप
क्षयकरं शौचमेषां विधीयते॥ आदित्यपुराणेऽपि॥ स्त्रीशूद्रयोरर्द्धमानं शौचं प्रोक्तं मनीषिभिः॥ दिवाशौच
स्य निश्यर्द्धं पथि पादो विधीयते॥ आर्त्तः कुर्याद्यथाशक्ति शक्तः कुर्याद्यथोदितं॥ वृद्धपराशरः॥ उपविष्टश्च
विण्मूत्रं कर्त्तुं यस्तु न विंदति। स कुर्यादर्द्धशौचं तु स्वस्य शौचस्य सर्वदेति॥ बोधायनः॥ देशं कालं तथात्मा
नं द्रव्यं द्रव्यप्रयोजनं। उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेदिति॥ मनुः॥ यावन्नापैत्यमेध्याक्तो गंधो
लेपश्च तत्कृतः। तावन्मृद्वारि चादेयं सर्वास्तु द्रव्यशुद्धिषु॥ आश्वलायनः॥ लिंगशौचं पुरा कार्यं गुदशौचं ततः
परमिति॥ देवलः॥ धर्मविद्दक्षिणं हस्तमधःशौचे न योजयेत्। तथा च वामहस्तेन नाभेरूर्द्ध्वं न शोधयेत्॥

॥ पंचगव्यप्रमाणं। शकृत्तो द्विगुणं मूत्रं सर्पिर्दधि चतुर्गुणं। क्षीरमष्टगुणं प्रोक्तं पंचगव्यं तदुच्यते॥ ४

आ॰म॰ ब्रह्मांडे। उदङ्मुखो दिवा कुर्याद्रात्रौ चेद्दक्षिणामुखः तिष्ठेत्स्पृष्टांगः॥ धाराशौचं न कर्तव्यं शौचमुद्धिमता सुना
८ स्थूलकेनैव कर्तव्यं हस्तशुद्धिविधानतः॥ अंगिराः॥ मूत्रोत्सर्गे द्विजः कृत्वा न कुर्याच्छौचमात्मनः। मोहाद्भुक्त्वा
त्रिरात्रेण जलं पीत्वा विशुध्यति॥ अन्नभोजनस्थाने जलपानं॥ भुंजानस्य गुदस्रावे बृहस्पतिः॥ पूर्वं कृत्वा
शौचं तु ततः पश्चादुपस्पृशेत्। ततः कृतोपवासं च पंचगव्येन शुद्ध्यति॥ शौचस्य कृत्यर्थत्वं पुरुषार्थत्वं चाह
दक्षः॥ शौचे यत्नः सदा कार्यः शौचमूलो यतो द्विजः॥ शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः॥ इति शौच
विधिः॥ ॥ अथ शारीरमलशौचं। मनुः॥ वसा शुक्रमसृङ्मज्जा मूत्रं विट् कर्णविण्नखाः। श्लेष्माश्रु दूषिका स्वेदो
द्वादशैते नृणां मलाः॥ दूषिका नेत्रमलं। विण्मूत्रोत्सर्गशुद्ध्यर्थं मृद्वार्यादेयमर्थवत्। दैहिकानां मलानां च शु
द्धिषु द्वादशस्वपि। बौधायनः॥ आददीत मृदः पंच षट्सु पूर्वेषु शुद्धये। उत्तरेषु तु षट्स्वद्भिः केवलाभि
र्विशुद्ध्यतीति॥ परकीयस्पर्शे देवलः॥ मानुषास्थि वसां विष्ठामार्तवं मूत्ररेतसी। मज्जानं शोणितं वा ८

पि परस्य यदि संस्पृशेत्। स्नात्वापमृज्य चैलादीनाचम्य स शुचिर्भवेत्॥ तान्येव स्वानि संस्पृश्य पुनः स्यात्परिमार्ज
नं॥ विशेषमाह विष्णुः॥ नाभेरधस्तात्स्वकायिकैर्मलैः सुराभिर्मद्यैर्वापि हतो मृत्तोयैस्तदंगं प्रक्षालनाच्छु
ध्येत्॥ अन्यत्रोपहतो मृत्तोयैस्तदंगं प्रक्षाल्य स्नानेन। इंद्रियेषूपहतेषूपोष्य स्नात्वा पंचगव्येन। मनुः॥ मूत्रे ति
स्रः पादयोरेका हस्तयोस्तिस्र एव तु। मृदः पंच दश मेध्ये हस्तादीनां विशेषतः॥ एतदात्मीयमूत्रादिसंस्पर्शनमु
क्तं। परस्य शोणितस्पर्शे रेतो विण्मूत्रजे तथा। चतुर्णामपि वर्णानां द्वात्रिंशन्मृत्तिकाः स्मृताः॥ ऊर्ध्वं नाभेर्यानि सरव ५
खानि तानि मेध्यानि सर्वशः। यान्यधस्तादमेध्यानि देहाच्चैव मलाश्च्युताः॥ यथोक्तशौचाकरणे प्रायश्चित्तमुक्तं स्मृ
तिरत्नावल्यां॥ गायत्र्यष्टशतं चैव प्राणायामत्रयं तथेति। यत्तु व्यासः॥ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि
वा। यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः॥ इति तद्यथोक्तशौचे कृते प्रात्मसंतोषार्थं वेदितव्यं। इति श्री
मीमांसकनृहरिशांकरात्मजनंदनीलकंठकृतौ शौचप्रकरणं॥ ॥ अथाचमनं। मनुः॥ कृत्वा मूत्रं पुरीषं वा खा

न्याचांतउपस्पृशेत्। पीत्वायोध्येष्यमाणश्चवेदमन्त्रंश्चसर्वदेति। आपस्तंबः॥ मूत्रपुरीषान्नलेपान्नशेष
लेपारेतस्रश्चयोलेपस्त्वान्ब्रह्मात्व्यपादौचाचम्यप्रयतोभवति। आचमनानंतरंदेवलः। रेतोमूत्रसंस्कन्नोचे
भोजनेचपरिश्रमे। उच्छिष्टमानवंस्पृष्ट्वाभोज्यंचापितथाविधं॥ आचामेदितिशेषः॥ बृहस्पतिः॥ अधोवा
युसमुत्सर्गेआक्रंदेक्रोधसंभवे। मार्जारमूषकस्पर्शेप्रहासेऽनृतभाषणे॥ निमित्तेष्वेषुधर्मार्थंकर्मकुर्वन्नुपस्पृ
शेत्॥ कर्मकुर्वन्नकाकादिदर्शनेआचामेदितिस्मृत्यर्थसारे। आचारादर्शेसंवर्त्तः॥ मार्जाररजकंवेणंधीव
रंनटमेवच। एतान्दृष्ट्वानरोमोहादाचमेत्प्रयतोपिसन्॥ कौर्मे॥ चंडालम्लेच्छसंभाषेस्त्रीशूद्रोच्छिष्टभाष
णे। उच्छिष्टंपुरुषंस्पृष्ट्वाभोज्यंचापितथाविधं॥ आचमेदश्रुपातेचलोहितस्यतथैवच। आग्नेर्गवामथालंभे
स्पृष्ट्वाप्रयतमेववा। स्त्रीणामथात्मनःस्पर्शेनीवींवापरिधायचेति॥ आपस्तंबः॥ स्वप्नेक्षुवथौसिंघाणिकाया
श्चालंभेलोहितस्यकेशानामग्नेर्गवांब्राह्मणस्यास्त्रियाश्चालंभेमहापथंगत्वामेध्यंचोपस्पृश्याप्रयतंच ८

मनुष्यंनीवींचपरिधायापउपस्पृशेत्। आर्द्रंवाशकृदोषधीर्भूमिंवा। स्तवथुःक्षुतं। सिंघाणिकानासाम
लं। आर्द्रमितिशकृदादिभिःसंबध्यते। शकृद्गोमयं। यमः। उत्तीर्णोदकमाचम्यअवतीर्यतथैवच। दक्षः।
स्नानादनंतरंतावदुपस्पर्शनमिष्यते। प्रजापतिः। उपक्रमेविशिष्टस्यकर्मणःप्रयतोपिसन्। आचामेदि
तिशेषः। वसिष्ठः। कृत्वाचावश्यकार्याणिआचामेच्छौचवित्तमः। मार्कंडेयपुराणे। देवार्चनादिकार्याणि
तथागुर्वभिवादनं। कुर्वीतसम्यगाचम्यतद्वदेवभुजिक्रियां। हारीतः॥ देवतामभिगंतुकामआचामेत्॥
शातातपः॥ आचामेच्चर्वणेनित्यंमुक्त्वातांबूलचर्वणं। ओष्ठौविलोमकौस्पृष्ट्वावासोविपरिधायच। इत्याचम
ननिमित्तानि। बृहस्पतिः॥ प्रचरन्नन्नपानेषुयदोच्छिष्टमुपस्पृशेत्। भूमौनिधायतद्द्रव्यंआचांतःप्रच
रेत्पुनः॥ निधायत्यक्त्वा। तैजसविषये। कौर्मे। तैजसंवैसमादाययद्युच्छिष्टोभवेन्नरः। भूमौनिक्षिप्य द्विजा॰ २
तद्द्रव्यंआचम्याभ्युक्षयेत्तुतदिति॥ यत्तुहेमाद्रिः॥ परिवेषणंकुर्वन्नुच्छिष्टस्पृष्टस्तदन्नपानादिकंभू

आ॰ म॰ मौ निधायाचम्य तदन्यहस्ते पुनस्तदादाय प्रचरेदित्याह तन्न। अत्र तन्न भूमौ निधानमात्रस्योक्तेः पुनरादाने मा
१० नाभावात्। यत्तु मनुः॥ उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथंचन। अनिधायैव तद्द्रव्यमाचांतः शुचितामिया
दिति। तल्लघुवस्त्रविषयमिति मेधातिथिः॥ निधानायोग्यवस्त्रादिविषयमिति चंद्रिकायां। तदेतच्चिंत्यं। यद्यम
त्रं समादाय त्वेदुच्छेषणान्वितः। अनिधायैव तद्द्रव्यमाचांतः शुचितामियात्॥ वस्त्रादिषु विकल्पः स्यात्तत्स्पृ
ष्टा चैवमेव हीति कौर्मवाक्याद्व्यवस्थोक्तेः। काष्ठपात्रे विशेषमाह निधानं प्रकृत्य बौधायनः। एतदेव विपरीतमत्रै
वानस्पत्ये विकल्पः। पक्वान्नमादाय मूत्रादिकरणे विशेषमाह मार्कंडेयः॥ पक्वान्नेन गृहीतेन मूत्रोच्चारं करोति यः।
अनिधायैव तद्द्रव्यमंगे कृत्वा समाश्रितं॥ शौचं कृत्वा यथान्यायमुपस्पृश्य यथाविधि। अन्नमभ्युक्षयेच्चैव तद्
प्यार्कस्य दर्शयेत्॥ यत्पक्वान्नमात्रं वा तस्माच्छेषं शुद्धिमवाप्नुयात्॥ यत्तु लौगाक्षिरापस्तंबः॥ भूमौ निक्षिप्य तद्द्र
व्यं शौचं कृत्वा यथाविधि। उत्संगायत्तपक्वान्नमुपस्पृश्य ततः शुचिरिति तद्देशाशक्तिविषयं॥ अरण्ये त्वनुदके रा १०

त्रौ चौरव्याघ्राकुले पथि। कृत्वा मूत्रं पुरीषं तु द्रव्यहस्तो न दुष्यतीति बृहस्पतिस्मरणात्॥ स्मृत्यर्थसारे परि
वेषणे रजोदृष्टौ तत्स्पृष्टान्नस्य त्यागः। अन्नाधारे चंडालसूतिकोदक्स्पृष्टे च त्याग एव। रजकादिस्पृष्टे जलेनाप्लाव्या
ग्निमर्कं वा स्पृशेत्॥ ॥इति सकृदाचमननिमित्तानि॥ द्विराचमननिमित्तान्याह याज्ञवल्क्यः॥ स्नात्वा पी
त्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे। आचांतः पुनराचामेद्वासो विपरिधाय च॥ व्यासः॥ दाने भोजनकाले
च संध्ययोरुभयोरपि। आचांतः पुनराचामेज्जपहोमार्चनेषु च॥ पैठीनसिः॥ कृत्वा मूत्रपुरीषं च पंचनखास्थ्यस्ने
हस्पृष्ट्वा आचांतः पुनराचामेच्चंडालम्लेच्छसंभाषणे च। कौर्मे॥ अधोवायोविलोमकौ स्पृष्ट्वा वासो विपरिधाय च। रेतो
मूत्रपुरीषाणामुत्सर्गेऽयुक्तभाषणे॥ ष्ठीवित्वाध्ययनारंभे कासश्वासागमे तथा। चत्वरं वा श्मशानं वा समागम्य द्वि
जोत्तमः॥ संध्ययोरुभयोस्तद्वदाचांतोप्याचमेत्पुनः॥ बौधायनः॥ भोजने हवने दाने उपहारे प्रतिग्रहे। हवि
र्भक्षणकाले च तद्द्विराचमनं स्मृतं॥ शंखः॥ स्नानभोजनकालेषु आचांतः पुनराचमेत्॥ पैठीनसिः॥ कलिक

आ॰म॰
११

कासश्वासागमे रथ्याचत्वरश्मशानाक्रांते स्वाचांतः पुनराचमेत्॥ आचमनापवादमाह याज्ञवल्क्यः॥ मुखजा वि
प्रुषो मेध्यास्तथाचमनबिंदवः। श्मश्रु चास्यगतं दंतसक्तं त्यक्त्वा ततः शुचिः॥ विप्रुषोंगे नुपलभ्यमानाः॥ नोच्छि
ष्टं कुर्वते मुख्या विप्रुषोंगं नयांति याः॥ इति बौधायनोक्तेः॥ स्मृत्यर्थसारे॥ वेदाभ्यासे मुखाज्जाता अष्टा एव तु स
र्वतः॥ दंतसक्तस्य निगरणमाह स एव। परिच्युतेषु तत्स्थानान्निगरन्नेव तच्छुचिः॥ निगरणत्यागयोर्विकल्प
इति हेमाद्रिः॥ चर्वणे त्वाचमेत्। तथा स्वाचमनं प्रक्रम्य। चर्वणे नित्यमिति विष्णूक्तेः॥ बलात्प्रच्यावितेतु देवल
आह॥ भोजने दंतलग्नानि निर्हृत्याचमनं चरेत्॥ दंतलग्नस्य जिह्वास्पर्शे रसोपलब्धौ चाशुचित्वं अन्यथा शुचि
त्वं॥ दंतवद्दंतलग्नेषु रसवर्जमन्यत्र जिह्वास्पर्शनादिति शंखोक्तेः॥ गौतमस्त्वन्यथाह॥ दंतश्लिष्टेषु दंतव
दन्यत्र जिह्वाभिःस्पर्शनात्प्राक्च्युतेरित्येके। किंच। दंतलग्नमपहार्यं। दंतलग्नमसंहार्यं लेपं मन्येत दंतव
त्। न तत्र बहुशः कुर्याद्यत्नमुद्धरणे पुनः॥ भवेदाशौचमत्यर्थं तृणवेधाद्व्रणे कृते इति देवलोक्तेः॥ षट्त्रिंशन्म ११

१

आ॰म॰
१२

ते। तांबूले च फले चैव भुक्तस्नेहावशिष्टके। त्वग्भिः पत्रैर्मूलफलैस्तृणकाष्ठमयैस्तथा॥ सुगंधिभिस्तथा द्रव्यैर्नो
च्छिष्टस्तेन वै द्विज इति॥ वसिष्ठः॥ प्राणाहुतीषु सोमेषु मधुपर्के तथैव च। आस्यहोमेषु सर्वेषु नोच्छिष्टो भवति द्विज
इति। आस्यहोमेषु दृष्टावशिष्टभक्षणे इति हेमाद्रिः॥ आश्वलायनीयैस्तु मधुपर्के आचमनं कार्यमेव। एतच्चा
न सर्वेषु प्राणाहुत्यादिष्वाचमनाभावे सिद्धेपि न सोमे नोच्छिष्टा भवंतीति तत्सूत्रेण तान्प्रति मधुपर्कादिष्वनुच्छिष्ट
तापरिसंख्यानात्। एष एव वृत्तिस्ततोप्याशयः॥ ॥अर्थाचमनविधिः॥ वृद्धपराशरः। कृत्वाथ शौचं प्रक्षाल्य पादौ
हस्तौ च मृज्जलैः॥ निबद्धशिखकच्छस्तु द्विज आचमनं चरेत्॥ स्मृत्यर्थसारे॥ सौवर्णरौप्यपात्रैस्तु वेणुबिल्वाश्मचर्म
भिः। अलाबुदारुपात्रैस्तु नालिकेरैः कपित्थकैः। तृणकाष्ठेजलाधारैरन्यांतरितमृन्मयैः॥ वामेनोद्धृत्य वाचामे द
न्यदा तु रसेन वै॥ गौतमः॥ त्रिःसूत्रवत्त्रिपश्चाचामेत्। खानि चोपस्पृशेत्। चतुर्वेत्येच्छिको विकल्प इति माधवः
। त्रयेण परितोष इति श्रीदत्तः। फलत्रमार्यमिति केचित्। योगी॥ त्रिःप्राश्याऽपो द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत्

अयंच द्विजातिविषयः। स्त्रीच शूद्रश्च सकृत्स्पृष्टाभिरंततइति तेनैव स्त्रीशूद्रयोः सकृद्विधानात्॥ स एव॥ अंतर्जा
नुः शुचौ देशे उपविष्ट उदङ्मुखः। प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्॥ अत्र द्विजग्रहणं स्त्रीशूद्रयो
रनियम इति हेमाद्रिः॥ तथात्र ब्राह्मं सर्वसाधारणं। कायदैवे तु ब्राह्मणं प्रत्येव। तथाच मनुः। ब्राह्मेण विप्र
स्तीर्थेन नित्यकालमुपस्पृशेत्। कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचनेति। त्रैदशिकं दैवं। अत्र नित्यपदा
त्सर्वदा ब्राह्मेणैव तस्य व्रणाद्युपघाते तत्तराभ्यामिति व्यवस्थितो विकल्प उत्तरयोस्त्वैच्छिकः। याज्ञवल्क्यः॥
कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रं करस्य च। प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्। बौधायनः॥ निर्वपणसंस्र
वण लाजहोम नित्यहोमान् कायतीर्थेन कुर्यात्। दैवेन दैविकं च पैतृकं पित्र्येण। कमंडलुस्पर्शनं दधिस्पर्श
नवान्नप्राशनं तु ग्रहणं दैविकं सौम्येन। आग्नेयेन प्रतिग्रहं कुर्यात्। अंगुलिमूले सौम्यं। करमध्य आग्नेयी। दे
वलः। उपनयनस्थितैर्दर्भैः समाचमति यो द्विजः। सोमपानफलं सोपि भुक्त्वा यज्ञफलं लभेत्। उपनयनं हस्तद्वये। १२

केवलवामहस्ते निषेधमाह हारीतः। वामहस्ते कुशान् कृत्वा समाचामति यो द्विजः। उपस्पृष्टं भवेत्तेन रुधिरेण मले
न चेति॥ विष्णुः॥ ग्रंथिर्यस्य पवित्रस्य न तेनाचमनं चरेत्। शंखः॥ काशहस्तस्तु नाचामेत् कदाचिद्विधशंकया। वेध
शंकयेति तु तेन ह्यन्नं क्रियत इति वदर्थवादमात्रं। दर्भहस्तोपि नेति स्मृत्यर्थसारे। बौधायनः॥ नांगुलीभिर्न सबुद्बुदा
भिर्न सफेनाभिर्न क्षाराभिर्नोष्णाभिर्न कलुषाभिरद्भिर्न हसन्न जल्पन्न विलोकयन्न तिष्ठन्न प्रह्वो न प्रणतो न मुक्तशि
खो नावद्धकच्छो न बहिर्जानूपस्पृशेत्। नांजलिना पिबेन्नानुद्धृतोदकेनाचामेत्। न तिष्ठन्निति तु स्थले। जले तु विशे
षमाह विष्णुः॥ जान्वोरूर्ध्वं जले तिष्ठन्नाचांतः शुचितामियात्। जलस्थो जलस्थ कृत्येषु स्थलस्थः स्थलकर्मसु॥ उभये
ष्वनयस्थस्तु कर्मस्वधिकृतो भवेत्। हारीतः। आर्द्रवासा जले कुर्यात्तर्पणाचमनं जपं। शुष्कवासाः स्थले कुर्यात्तर्पणाच
मनं जपं॥ हारीतः॥ विवर्णं गंधवत्तोयं फेनिलं च विवर्जयेत्। देवलः॥ सोपानत्को जलस्थो वा मुक्तकेशोथवा पुनः। उ
ष्णीषी वापि नाचामेद्वस्त्रेणावेष्ट्य वा शिरः। संवर्तः॥ अशब्दामनिरनुष्णां निस्त्यक्तां निःफेनबुद्बुदैः। आपद्गतेन शुद्धिः

आ॰ म॰ स्याद्गुल्फेनस्नुतपापिनां॥आपद्गतेनेतितृतीयाचतुर्थ्यर्थेतेनापद्गतेस्यस्नुतपापिनउदकेनापिशुद्धिरित्यर्थः॥बौधाय
१३ नः॥ग्रन्थानावेनवेलिंकिंचित्स्यज्ञाभूमौतुतज्जलं॥आचारप्रदीपेआपस्तंबः॥संध्यार्थेभोजनार्थेवापित्र्यर्थेवातथैव
चाग्न्यगारगतेनैनाचामेज्जपादिष्ववनेषुच॥यमः॥अथकरनखस्पृष्टाःसमाचामतियोद्विजः॥सुरांपिबतिसुव्यक्तांय
मस्यवचनंयथेति॥आपस्तंबः॥नवर्षधाराखाचामेत्तथाचप्रदरोदके॥प्रदरोगर्तः॥प्रतिप्रसवमाहवसिष्ठः॥प्रद
रादपिगोस्तर्पणात्स्यादिति॥इदंतुकलौनिषिद्धमिति॥कलिवर्ज्यनिर्णयेभ्रातृवरणः॥गोतृप्तिशिष्टेपयसिशि ए५
ष्टैराचमनक्रियेतिकलिनिषिद्धेषुपाठात्॥देवलः॥येषुदेशेषुयत्तोयंयाचयत्नैवमृत्तिका॥तत्रतान्नावमन्येतध
र्मस्तत्रैवताद्दृशइतिविष्णुः॥नगच्छन्नशयानश्चनस्थितःप्रह्वएवच॥नस्पृशन्नहसन्नजल्पन्नचांडाल
दर्शने॥गोभिलः॥नांतरीयैकदेशस्यकृत्वाचैवोत्तरीयतामिति॥आचामेदितिशेषः॥प्रचेताः॥ननिर्वासाना
न्यत्कुर्वन्नासनपादस्थोवैमितः॥पुलस्त्यः॥कंठंशिरोवाप्रावृत्यरथ्यापणगतोपिवा॥अकृत्वापादयोः १३

शौचमाचांतोप्यशुचिर्भवेत्॥आचमनात्पूर्वंगंडूषानाह॥प्रयोगपारिजातेआचार्यः॥कुर्याद्द्वादशगंडूषा
न्पुरीषोत्सर्जनेद्विजः॥मूत्रेचत्वारिगंडूषाभोजनांतेतुषोडश॥भक्ष्यभोज्यावसानेचगंडूषाष्टौविधीयते॥बो
महस्तेनाचारंतमाहयमः॥तावन्नोपस्पृशेद्विद्वान्यावद्वामेननस्पृशेत्॥अपांपर्युक्षणमाहनागदेवी
येशाखायनिः॥त्रिभिःपर्युक्षणंकुर्यात्पात्रोपरित्रिभिःसदा॥बिंदुंचनिक्षिपेन्मध्येशोषयेद्धातिबिंदुभिः॥
विशेषमाहयाज्ञवल्क्यः॥हृत्कंठतालुगाभिस्तुयथासंख्यंद्विजातयः॥शुध्येरन्स्त्रीचशूद्रश्चसकृत्स्पृष्टाभि
रंततः॥सकृदितित्रित्वमात्रापवादकं॥नतुसर्वेतिकर्तव्यतायाः॥तेनसर्वपुंगस्पर्शनादिरूपेतिकर्तव्य
तास्त्रीशूद्राभ्यांकर्तव्यैव॥अंततइति॥तृतीयार्थेतसिस्तालुगाभिरितिविज्ञानेश्वरः॥दंतगाभिरितिहेमा
द्रिः॥अंगुष्ठमात्रेणेतिश्रीदत्तः॥हृद्गानांपरिमाणमाहदेशना॥माषमज्जनमात्राद्भ्यःहृदयंगमाभवंतीति॥अ
हणेविशेषमाह॥क्रतुः॥आयतंपूर्वतोभित्वागोकर्णाकृतिवत्करं॥संहतांगुलिनातोयंगृहीत्वापाणिना

आ॰म॰ द्विजस्त्वमुक्तांगुष्ठकनिष्ठेनशेषेणाचमनंचरेत्॥ भरद्वाजः॥ देव्याःपादैस्त्रिभिःपीत्वाअंगैर्नी
१४ वधास्पृशेत्॥ पुनर्व्याहृतिगायत्र्याशिरोमंत्रैर्द्विधास्पृशेत्॥ बौधायनः॥ त्रिःपरिमृजेद्विरित्येकइति
त्रुष्टावितिशेषः॥ तौचविलोमकावितिहेमाद्रिः॥ शंखः॥ तर्जन्यंगुष्ठयोगेनस्पृशेन्नासापुटद्वयं॥ अं
गुष्ठस्यानामिकायायोगेनश्रवणंस्पृशेत्॥ कनिष्ठांगुष्ठयोगेनस्पृशेत्स्कंधद्वयंततः॥ नाभिंचहृदयंत
द्वत्स्पृशेत्पाणितलेनतु॥ संस्पृशेत्तुततःशीर्षमित्यमाचमनेविधिः॥ आश्वलायनः॥ जलैःशुद्धैःपिबेद्दै
स्त्रत्वंबुशानेद्विजः॥ प्रमृजेद्विरथर्वेणपुराणेश्चेतिहासकैः॥ मुखमंगुष्ठमूलेनपृथक्कायउपस्पृशेत्।
पाणिनाधोग्निमंत्रेणअवमृज्याथसंस्पृशेत्॥ विप्रस्तनेतराणांतुतन्मुखालंभनंस्मृतं॥ सूर्यायदक्षिणे
नेत्रेवामेसोमायवायवे॥ नसोर्द्दिश्यश्रवणयोर्बाह्वोरिंद्रायसंस्पृशेत्॥ पृथिव्यैपादयोजन्वोरंतरिक्षा
यगुह्यके॥ दिशेनाभ्यांब्रह्मणेचविश्वेभ्योहृदयेतथा॥ शिवायेतिशिरस्यंतेहस्तंप्रक्षालयेत्ततइति॥ आग १४

स्त्यसंहितायां॥ केशवाद्यैस्त्रिभिःपीत्वाद्वाभ्यांप्रक्षालयेत्करौ॥ द्वाभ्यामोष्ठौतुसंमृज्यद्वाभ्यामुन्मार्जनंत
था॥ एकेनहस्तौप्रक्षाल्यपादावपितथैकतः॥ संप्रोक्ष्यैकेनमूर्धानंततःसंकर्षणादिभिः॥ आस्यंनासांचकर्णौच
नाभ्युरःकंभुजौस्पृशेत्॥ एवमाचमनंकृत्वासाक्षान्नारायणोभवेत्॥ अत्रैतानिकेशवादिरूपाणितानिचतुर्विं
शतिनामानिचतुर्थ्यंतानिनमोंतानिप्रथमैकवचनांतानिवोच्चार्याणि॥ केचित्तुसंबुध्यंतान्युच्चारयंतितन्ना
पिविष्णुपदंहरिपदंवाविभक्तिक्रमेणोच्चारयंतितन्नसाधूनेवप्रयुंजीतेतिनियमाद्भिंत्यं॥ आचमनासंभवेमार्कंडे
यपुराणे॥ देवतानांपितॄणांचऋषीणांचैवयत्नतः॥ कुर्वीतासंभवेवापिदक्षिणश्रवणस्यवा॥ यथाविभवतोह्ये
तत्पूर्वाभावेततःपरं॥ बौधायनः॥ आर्द्रंतृणंभूमिंगोमयंवासंस्पृशेत्॥ आचमनस्यसर्वकर्मांगत्वमुक्तंपुराणसारे॥
यःक्रियाःकुरुतेमोहादनाचम्यैवनास्तिकः॥ भवंतिहिक्रियास्तस्यवृथासर्वानसंशयइति॥ ॥इतिश्रीमीमांसकशं
करभट्टात्मजभट्टनीलकंठकृतेआचारमयूखेआचमनप्रकरणं॥ ॥अथदंतधावनं॥ अत्रिः॥ मुखेपर्युषितेनित्यं

आ॰म॰ नवश्चप्रयतोनरः।तदार्द्रकाष्ठंशुष्कंवानत्त्वयेद्दंतधावनं॥इदंचशुध्यर्थंनतुस्नानांगं।दंतान्प्रक्षाल्यस्नाया
२५ दितिछंदोगपरिशिष्टेतुदर्शपूर्णमासाभ्यामिष्ट्वासोमेनयजेतेतिवत्कालार्थिः।संयोगः।मदनोप्येवं।इदंचभोज
नानंतरमपिकार्यं।प्रातर्भुक्त्वाचयतवाक्भक्षयेद्दंतधावनमितिविश्वरूपोक्तेः।भुक्तेतियतिपरमितिहलायुधीये।सर्वाग्नि
नीतिश्रीदत्तः॥अन्यत्वकालादिनिषेधोनास्ति।भोजनेदंतलग्नानिनिर्हृत्याचमनंचरेदितिदेवलोक्तेरुच्छिष्टनिर्हरण
स्यावश्यकत्वात्।कात्यायनः॥नंदासुचनवम्यांचदंतकाष्ठंविवर्जयेत्।विष्णुः॥नवम्यांचैवद्वादश्यांवर्जयेद्दंतधा
वनं।नवम्यांभानुवारेचेतिवापाठः॥श्राद्धाहेजन्मदिवसेविवाहेसुखदुःखयोः॥व्रतेचैवोपवासेचवर्जयेद्दंतधावनं
॥व्यासः॥श्राद्धेचयज्ञेनियमेनाद्यात्प्रोषितभर्तृका॥श्राद्धकर्तृनिषेधोयंनतुभोक्तुःकदाचन॥नाद्याद्दंतकाष्ठमितिशे
षः॥आचार्यः॥अष्टम्योश्चचतुर्दश्योःपंचदश्यांत्रिजन्मसुव्यतीपातेचसंक्रांत्यांदंतकाष्ठंनभक्षयेत्॥नाद्यादजीर्ण
वमथुश्वासकासज्वरार्दितः।पुरोदयाद्रवेस्त्वद्यानोदितेस्तमितेरवौ॥दीक्षितोब्रह्मचारीचयतिश्चविधवांगना॥नि २५

त्यमद्याद्दंतकाष्ठममायांतुविवर्जयेत्॥त्रिजन्मसु॥जन्मतदाद्युत्तरभेदितिकेचित्॥जन्मनवमैकोनविंशति
केष्वितिज्योतिर्विदः॥नृसिंहपुराणे॥प्रतिपद्दर्शषष्ठीषुनवम्यांचैवभारत।दंतानांकाष्ठसंयोगोदहत्यासप्तमंकु
लं॥काष्ठग्रहणात्तृपर्णादौनदोषः॥तथाचव्यासः॥प्रतिपद्दर्शषष्ठीषुनवम्यांदंतधावनं।पर्णैरन्यत्रकाष्ठैस्तुजिह्वो
ल्लेखःसदैवतु॥तृणपर्णैर्मध्यमानामिकांगुष्ठैर्निषिद्धाहेकुर्युरितिस्मृत्यर्थसारे॥व्यासः॥अलाभेदंतकाष्ठानांनिषि
द्धायांतिथौतथा।अपांद्वादशगंडूषैर्विदध्याद्दंतधावनं॥स्कांदे॥अभ्यंगेचोदधिस्नानेदंतधावनमैथुने।जातेचमर
णेचैवतत्कालव्यापिनीतिथिः॥यमः॥चतुर्दश्यष्टमीदर्शपूर्णिमासंक्रमेरमेरवेः।एषुस्त्रीतैलमांसानिदंतकाष्ठंचवर्ज
येत्॥वसिष्ठः॥शन्यर्कशुक्रवारेषुकुजाहेव्रतवासरे।जन्माहेश्राद्धदिवसेदंतकाष्ठंविवर्जयेत्॥यमः॥मध्याह्नेस्नान
वेलायांयोनत्हेद्दंतधावनं।निराशास्तस्यगच्छंतिदेवताःपितृभिःसह॥अत्रनोदितइत्यनेनैवमध्याह्ननिषेधेसिद्धेपु ध २
नर्निषेधोदोषाधिक्यार्थः॥मध्याह्नेश्राद्धवेलायामितिवापाठः॥गोभिलः॥रजस्वलासूतिकाचवर्जयेद्दंतधावनं॥स्मृ

आ॰म॰ तिमंजर्यां॥ रजस्वला चतुर्थेह्नि सूतिका दशमे दिने। स्नानात्पूर्वं बंधमोक्षे निंद्ये च परिवर्जयेदिति। नागदेवीये। चिरं दंतेषु के
१६ शेषु चिरं मूत्रपुरीषयोः। चिरं स्नाने च शीघ्रं च मैथुने शयने शने॥ व्यासः॥ प्रक्षाल्य पादहस्तौ च मुखं च सुसमाहितः।
दक्षिणं बाहुमुद्धृत्य कृत्वा जान्वंतरा ततः॥ तिक्तं कषायं च तथा कटुकं कंटकान्वितं। क्षीरिणो वृक्षगुल्मादेर्भक्षयेद्दंत
धावनं॥ दक्षिणं बाहुमुद्धृत्योपवीतं कृत्वेति श्रीदत्तः॥ विष्णुः॥ कंटकि क्षीरवृक्षोत्थं द्वादशांगुलमव्रणं। कनिष्ठिका
ग्रवत्स्थूलं कूर्चाग्रं त्वगपर्वकं॥ कौर्मे॥ मध्यांगुलसमस्थूलं द्वादशांगुलसंमितं। सत्वचं दंतकाष्ठं स्यात्तदग्रेण तु धाव
येत्॥ इदं विषमदंतस्य। इतरस्य तु कनिष्ठिकाग्रस्थूलसमं त्वं॥ सुसूक्ष्मं हीनदंतस्य समदंतस्य मध्यमं। स्थूलं विषम
दंतस्य त्रिविधं दंतधावनमिति विष्णूक्तेः॥ विष्णुः॥ द्वादशांगुलिकं विप्रे काष्ठमाहुर्मनीषिणः। क्षत्रविट्शूद्रजा
तीनां नवषट्चतुरंगुलं॥ गर्गः॥ चतुरंगुलमानं तु नारीणां नात्र संशय इति। नृसिंहपुराणे। तित्तिरीवेणुपृष्ठं च लीर
आम्रनिंबौ तथैव च। अपामार्गश्च बिल्वश्च अर्कश्चौदुंबरस्तथा॥ बदरीतिंदुकास्त्वेते प्रशस्ता दंतधावने॥ १६

कोविदारः करंजश्च कुटजः प्लक्षमालती॥ गर्गः॥ सर्जे धैर्यं वटे दीप्तिः करंजे विजयो रणे। प्लक्षजे चार्थसंपत्ति
र्बदर्यां मधुरः स्वरः॥ खदिरे चैव सौभाग्यं बिल्वे तु विपुलं धनं। औदुंबरे च वाक्सिद्धिर्बंधूके च दृढा मतिः॥ मेधा च
कीर्तिः सौभाग्यं पालाशे सिद्धिरुत्तमा। कदंबे सकला लक्ष्मीराम्रे चारोग्यमेव च॥ अपामार्गे धृतिर्मेधा प्रज्ञावाप्तिर्वि
पुः स्मृतिः। आयुः शीलं यशो लक्ष्मीः सौभाग्यं चोपजायते॥ अर्केण हंति रोगांश्च बीजपूरेण तु व्यथां। दाडिमे सिंदुवा
रे च उटजे कुटजे तथा॥ जाती च करमर्दी च दुःस्वप्नं नाशयेदिति। ककुभेन तथायुष्मान्नवेत्पलितवर्जितः॥ कज्ज
नः प्रसेवकः॥ आम्रलायनोपि। अपामार्गे सर्वसिद्धिः स्त्रीवश्यत्वं प्रियंगुभिः। वेणुना चाक्षया प्रज्ञा बोराजवृक्षाज्ज
यं लभेत्॥ चूतेन नृपवश्यत्वं सौभाग्यं पनसेन तु। दीर्घायुर्जंबुवृक्षेणेष्टां सिद्धिं जनेदथ॥ जयं कंटकवृक्षात्तु
बलं वैकंकतात्स्वनेत्। आरोग्यं कर्णिकारेण पारंड्याशौर्यमुत्तमं॥ अशोकेन विशोकः स्यात्त्वंगाद्भूरि
वर्चसं। खादिरादखिलान्भोगान्लभेदतियशो महत्॥ वाग्यतो विमृजे दंतान्मांसानामल्पपीडया॥ जि

आ॰म॰ १३ क्षामलांतमुदितंदंतांतरितमेवच॥गार्ग्यस्यामुखस्तजेत्काष्टंदिशिनिर्मृज्यवाग्यतो।राजवृत्तौराजादनं।व
र्ज्यानादृत्व याज्ञवल्क्यः॥इष्टिकालोष्टपाषाणैर्नखैरंगुलिभिस्तथा।मुक्त्वाचानामिकांगुष्टौवर्जयेद्दंतधाव
नं॥तथा।दक्षिणाभिमुखोनाद्यान्नीलंधवकदंबकं।तिंदुकेंगुदबंधूकमोचाकरंजसिद्धकं॥कार्पासदंतकाष्टं
चविक्षोरपिहरेद्बुधः।नीलंनीलीवृक्षः।धवःप्रसिद्धः।मोचाकदली।आचार्यः॥नादंडंनलवादीनंनाप्रशस्त
तरूद्भवं।स्नुहिकिंशुकशाल्मलीकरंजादीश्चवर्जयेत्।तथा॥कोविदारेंगुदांश्चैवशाल्मलीवृक्षसिल्हकाः।
श्यामाकंपारिभद्रंचगुग्गुलंपिछिलांतथा।पूतिगंधाम्लमधुरंसुषिरंदंतधावनं।प्रतीचींदक्षिणांचैववर्ज
त ३ येद्दंतधावने॥पूतिगंधंदुर्गंधि॥विष्णुः॥नश्लेष्मांतकारिष्टविभीतकधवधव्वनजं।नकोविदारशमीपीलुपि
प्पलेंगुदगुग्गुलजं।नबर्बुरनिर्गुंडीशिग्रुतिलकतिलजं।हारीतः॥कालेयपलाशकोविदारश्लेष्मातकबि
ल्वकशाकवृक्षानिर्गुंडीशिखंडीशिरीषामालतीकारवीरबदरीकरंजवेणुवर्ज्यमिति।गर्गः॥कुशंकाशंप १८

लाशंचशिंशपंयस्तुभक्षयेत्।तावद्भवतिचंडालोयावद्गंगांनपश्यति॥व्यासः॥पालाशमासनंयानं
दंतकाष्टंचपादुके।वर्जयेत्तुप्रयत्नेननसममाश्वथमेवच॥मार्कंडेयः॥शाल्मल्यश्वकर्णव्यानांधवकिंशुक
योरपि।कोविदारशमीतालश्लेष्मातकविभीतकैः।वर्जयेद्दंतकाष्टंचगुग्गुलुंक्रमुकंतथा॥[illegible]मिहिरग्रं
ज्ञातपूर्वाणिनदंतकाष्टान्यद्यात्पर्णैश्चसमन्वितानि।नयुग्मपर्णानिनपाटितानिनचोर्ध्वशुष्काणिविनात्वचा
वा॥अत्रकानिचित्सामान्यतोनिषिद्धान्यपिकामार्थत्वेनविहितत्वात्तत्कामनावद्भिर्ग्राह्याण्येव॥यानितुकेवलं
विहितप्रतिषिद्धानितेषुनतोपशोकरोतीतिवत्विकल्पइतिस्मृतिचंद्रिकायां।विहितालाभेप्रतिषिद्धंतदलाभेवि
हितप्रतिषिद्धमेवग्राह्यमितिसर्वोविहितालाभेप्रतिषिद्धविहितप्रतिषिद्धयोरैच्छिकोविकल्पइत्यपिकश्चित्॥
आश्वलायनः॥नांगुलीभिश्चमृद्भिश्चपर्णैर्लोष्टैश्चनभस्मना।नायसेश्चतथालोष्टैः सर्वैर्दंतान्मृजेद्द्विजः॥
शातातपः॥दंतधावनमंगुल्याप्रत्यक्षंलवणंतथा।मृत्तिकाभक्षणंचापितुल्यंगोमांसभक्षणं॥प्रयोग

आ॰म॰ १८ पारिज्ञाते॥ अंगारवालुकापर्णतृणवस्त्रनखादिभिः। न कुर्याद्दंतकाष्ठं च श्रीकामी दूषिते दिने॥ नकु
र्याद्दंतकाष्ठं च तैलेन च शिरसि स्थिते। दिग्विशेषेण फलमाह॥ विष्णुः॥ प्राङ्मुखस्य धृतिः सौख्यं शरीरारो
ग्यमेव च। दक्षिणेन तथा कष्टं पश्चिमेन पराजयः॥ उत्तरेण गवां नाशः स्त्रीणां परिजनस्य च। पूर्वोत्तरे तु
दिग्भागे सर्वान्कामानवाप्नुयात्॥ दंतधावनमंत्रो नागदेवीये॥ अन्नाद्याय व्यूहध्वं सोमो राजायमागम
त्। स मे मुखं प्रमार्क्ष्यते यशसा च भगेन च॥ अंगिराः॥ प्रक्षाल्य भक्षयेत्काष्ठं प्रक्षाल्यैव तु संत्यजेत्। आयु
रित्यादिमंत्रोयमुक्तः शाखाभिमंत्रणे इति। मंत्रः॥ काशीखंडे॥ आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च।
ब्रह्मप्रज्ञां च मेधां च त्वं नो धेहि वनस्पते॥ दंतधावनोत्तरं शौनकः॥ पश्चाद्द्वादश गंडूषैर्विदध्याद्दंत
धावनं। स्मृत्वोंकारं च गायत्रीं निबध्नीयाच्छिखां ततः इति॥ अंगिराः॥ पतित्यांत्यजपाषंडिदेवाजीवर
जस्वला॥ निषक्तातकिंवंडालानप्युरस्तादंतधावने। श्वनकं विद्धि रासभं च छत्राकं ग्रामकुक्कुटं। अन्या रु॰ १८

न्नैवदृशान्पश्येद्द्विजश्रेष्ठो विचक्षणः इति॥ देवाजीवो देवलकः। द्विजदंताः॥ ॥इति दंतधावनं॥
॥अथ पवित्रविधिः॥ ॥व्यासः॥ कुशैः पूतं भवेत्स्नानं कुशेनोपस्पृशेद्द्विजः। कुशेन चोद्धृतं तोयं
सोमपानेन संमितं॥ यमः॥ कुशाः काशास्तथा दूर्वा यवा व्रीहय एव च। बल्वजाः पुंडरीकाणि स
प्तधा बर्हिरुच्यत इति॥ शंखः॥ कुशाभावे द्विजश्रेष्ठ काशैः कुर्वीत नित्यतः इति॥ कात्यायनः॥ मा
सेन त्वमावास्यां तस्यां दर्भोच्चयो मतः। अयातयामास्ते दर्भा विनियोज्याः पुनः पुनरिति॥ प्रयो
गपारिजाते। स्मृत्यर्थसारे। त्रिचिंतामणौ॥ मासि मास्याहृता दर्भास्तत्तन्मास्येव चोदिता इति॥
॥मार्कंडेयः॥ शुचिर्भूत्वा शुचौ देशे स्थित्वा पूर्वोत्तरामुखः। ॐकारेणैव मंत्रेण कुशान्स्पृष्ट्वा द्वि
जोत्तमः॥ विरंचिना सहोत्पन्न परमेष्ठिनिसर्गज। नुद सर्वाणि पापानि दर्भ स्वस्तिकरो भव॥ इमं
मंत्रं समुच्चार्य ततः पूर्वोत्तरामुखः। हुं फट्कारेण दर्भेण सकृच्छित्वा समुद्धरेदिति॥ कात्यायनः॥

आ॰ म॰ ॥अनंतर्गर्भिणं साग्रं कौशं द्विदलमेव च॥ प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्॥ मार्कंडेयः॥
१९ ॥चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्य पवित्रकं॥ एकैकन्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमं॥ त्रिभिर्दर्भैः शां
तिकर्म पिंचभिः पौष्टिकं तथा॥ चतुर्भिरामिचारांस्तु कुर्वन्कुर्यात्पवित्रकमिति॥ अत्रिः॥ ब्रह्मयज्ञे
जपे चैव ब्रह्मग्रंथिर्विधीयते॥ भोजने वर्तुलः प्रोक्त एवं धर्मो न हीयते॥ हेमाद्रौ॥ अन्यान्यपि प
वित्राणि कुशदूर्वामयानि च॥ हेमात्मकपवित्रस्य कलां नार्हंति षोडशीमिति॥ पारिजाते॥ आचा
र्यः॥ हेमेन सर्वदा सर्वं कुर्याद्देवाविचारयन्॥ रौप्यं दर्भप्रदेशिन्यां बिभृयाद्दक्षिणे द्विजः इति॥
॥दक्षिणे दक्षिणः॥ योगयाज्ञवल्क्यः॥ अनामिकाधृतं हेम तर्जन्यां रौप्यमेव च॥ कनिष्ठिकाधृतं खड्गं
तेन पूतो भवेन्नरः॥ प्रयोगपारिजाते संग्रहकारः॥ उत्तरीयं योगपट्टं तर्जन्यां रजतं तथा॥ नजी
वत्पितृकेर्धार्यं ज्येष्ठो वा विद्यते यदीति॥ तथा॥ पादुके चोत्तरीयं च तर्जन्यां रौप्यधारणं॥ नजी १६

वत्पितृकः कुर्याज्ज्येष्ठे भ्रातरि जीवति॥ शारदातिलके॥ ताम्रतारसुवर्णानां अर्कषोडशखेंदुभिः॥
कृता त्रिशक्तिमुद्रेयं तीव्रदारिद्र्यनाशिनी॥ तारं रूप्यं॥ अर्चनदीपे॥ सोमसूर्याग्निरूपास्सुवर्णा लोहत्र
यं तथा॥ रौप्यमिंदुः स्मृतो हेम सूर्यस्ताम्रं हुताशनः॥ लोहनागाः समुद्दिष्टाः स्वराद्यक्षरसंज्ञया॥ तेलो
हैः कारयेन्मुद्रामसंकलितसंगतां॥ साग्रं सहस्रं संजप्य स्पृष्ट्वा तां जुहुयात्ततः॥ तस्यां संपातयेन्मंत्री स
र्पिषा पूर्वसंख्यया॥ निक्षिप्य कुंभे तां मुद्रामभिषेकोक्तवर्त्मना॥ आवाह्य पूजयेद्देवीमुपचारैः समाहितः
॥अभिषिच्य विनीताय दद्यात्तां मुद्रिकां गुरुः॥ इयं रक्षा क्षुद्ररोगविषज्वरविनाशिनी॥ व्यालचौरमृगादि
भ्यो रक्षां कुर्याद्विशेषतः॥ युद्धे विजयमाप्नोति धारयन्मनुजेश्वरः॥ स्वराद्यक्षराण्येकपंचाशत्॥ तत्र षो
डश नागा रूप्यस्य॥ पंचविंशतिस्ताम्रस्य॥ दश हेम्नः॥ साग्रमष्टोत्तरं स्पृष्ट्वा संजप्य जुहुयादित्यन्वयः॥ त
स्यां मुद्रायां संपातयेत्संपातानिति शेषः॥ संख्याजपस्य॥ आराध्यदेवतायाः आगमिको वैदिको नाम मंत्रो

वाजपहोमयोर्ज्ञेयः।मुद्राबंधनादिसर्वमुपरागसमयएवकार्यमितिसांप्रदायिकाः।।अथाश्वलायनः
।अग्रंथिकंचहैमंचतथालोहत्रयोद्भवं।गायत्र्यक्षरवर्गेणगृह्णीयात्ताम्रमुत्तमं।अनुष्टुभस्तथाशेषंत्रिष्टु
भःकनकोत्तमं।गायत्र्यक्षराणिचतुर्विंशतिः।अनुष्टुभोद्वात्रिंशत्।त्रिष्टुभश्चतुश्चत्वारिंशत्।शलाकांक्रा
मयित्वाततोनिसृजेदंगुलीयकं।एवंलोहत्रयेणैवबद्धंतंरक्षोघ्नमुत्तमं।युद्धेर्धार्यंदिवारात्रंत्रयंसममथा
पिवा।जपेद्वामप्रदेशिन्यांधृत्वायस्तत्पवित्रकं।उद्घाटनादिसंसिध्येमहापस्मृतिजोत्तमः।नवरत्नमुद्रा
माहबोपदेवः।हित्वामुवंप्रमंगोरानिशंवैकेपुगंमधः।प्राच्यारत्नानिखेटाश्चमध्येमाणिक्यमुक्तगोः।
अत्रहित्वामित्याद्यक्षरद्वंद्वानि।हीरकश्चेत्यादिग्रहप्रतिपादकानि।प्राच्याःप्राचीमारभ्यग्रहाःखेटाउक्तागू
रविः।मानसोल्लासे।अर्केंदुरक्तज्ञगुरुस्त्रयमंदाहिकेतवः।माणिक्यंमौक्तिकंचारुविद्रुमंगारुडंपुनः।पु
ष्परागंलसद्वज्रंनीलंगोमेदकंतथा।वैडूर्यंनवरत्नानिमुद्रांतांकल्पयेद्बुधः।जपहोमादिकंसर्वंकुर्यात्सू २०

र्योक्तवर्त्मना।योमुद्रांधारयेदेनांतस्यस्युर्वशगाग्रहाः।रक्तोभौमः।अहीराहुः।। ।।अथस्नानं।।योग
याज्ञवल्क्यः।।अस्नात्वानाचरेत्कर्मजपहोमादिकिंचन।लालास्वेदसमाकीर्णःशयनादुत्थितःपुमान्।स्रव
ंतीतिहिसुषुप्तस्यइंद्रियाणिस्रवंतिच।अंगानिसमतांयान्तिउत्तमान्यधमैःसह।।अत्यंतमलिनःकायो
नवच्छिद्रसमन्वितः।स्रवत्येवदिवारात्रौप्रातःस्नानंविशोधनं।प्रातःस्नानंप्रशंसंतिदृष्टादृष्टकरंहित
त्।सर्वमर्हतिशुद्धात्माप्रातःस्नायीजपादिकं।।गुणादशस्नानपरस्यसाधोरूपंचतेजश्चबलंचशौचं।आ
युष्यमारोग्यमलोलुपत्वंदुःस्वप्ननाशश्चयशश्चमेधा।।स्नानंनदीदेवखातह्रदेषुचसरस्सुच।पंचपिं
डाननुद्धृत्यनस्नायात्परवारिणीति।परसत्वा।केःनुक्त्वाजलेमृत्पिंडपंचकोद्धरणाभावेनस्नायादित्य
तिमाधवार्थः।।मरीचिः।।भूमिस्थमुद्धृतंवापिशीतमुष्णमथापिवा।गांगंपयःपुनात्याशुपापमामरणांति
कमिति।योगयाज्ञवल्क्यः।।भूमिष्ठमुद्धृतात्पुण्यंततःप्रस्रवणोदकं।ततोपिसारसंपुण्यंतस्मान्नादेयमु

आ॰म॰
२१

न्यते। तीर्थतोयं ततः पुण्यं ततो गांगं तु सर्वत इति। गंगावाक्यं। नंदिनी नलिनी सीता मालती च महापगा। वि
ष्णुपादाब्जसंभूता गंगा त्रिपथगामिनी॥ भागीरथी भोगवती जाह्नवी त्रिदशेश्वरी। द्वादशैतानि नामानि
यत्र यत्र जलाशये। स्नानोद्यतः सदा कुर्यात्तत्र तत्र वसाम्यहमिति॥ देवलः॥ एकां नदीं समासाद्य नान्यां
स्नाने नदीं स्मरेत्। मार्कंडेयः॥ संकल्पं च यथा कुर्यात्स्नानदानव्रतादिकमिति। यथायथावदित्यर्थ इति त्रा
च्चरणः। शंखः॥ आपो अस्मानिति स्मृत्वा भास्कराभिमुखः स्थितः। इदं विष्णुर्जपित्वा तु प्रतिस्रोतो निमज्ज
ति॥ अप्रवाहोदकस्नानं विप्रपादाभिषेचनं। आदित्याभिमुखः कुर्यात्संध्यावंदनमेव चेति। याज्ञवल्क्यः
॥ तत्त्वायामीति मंत्रेण वारुणेन तटे स्थितः। उदुत्तममिति स्मृत्वा ह्यवतीर्य जलाशये॥ आवाह्य वरुणं स्ना
नमाचरेद्विधिपूर्वकमिति॥ चतुर्विंशतिमते। स्नानमब्दैवतैर्मंत्रैर्वारुणैश्च मृदा सह। कुर्याद्व्याहृतिभिर्वा
पि यत्किंचेदमृचापि वा। शौनकः॥ स्नात्वाचांतो वारिमध्ये त्रिः पठेदघमर्षणमिति। योगयाज्ञवल्क्यः। य एव वि २१

स्मृतः प्रोक्तः स्नानस्य विधिरुत्तमः। असामर्थ्यान्न कुर्याच्चेत्तत्रायं विधिरुच्यते। स्नानमंतर्जले चैव मार्जनाच
मने तथा। जलाभिमंत्रणं चैव तीर्थस्य परिकल्पनं। अघमर्षणसूक्तेन त्रिरावृत्त्येन नित्यशः। स्नानाचरण
मित्येतदुपदिष्टं महात्मभिरिति। चतुर्विंशतिमते। स्नानादनंतरं तावत्तर्पयेत्पितृदेवताः। उत्तीर्य पीडयेद्व
स्त्रं संध्याकर्म ततः परमिति। तर्पणप्रकारमाह व्यासः। यज्ञोपवीती देवानां नीवीती ऋषितर्पणे। प्राचीनावी
ती पित्र्ये तु स्वेन तीर्थेन भावितः। उशना। द्वौ हस्तौ युग्मतः कृत्वा पूरयेदुदकांजलिं। गोशृंगमात्रमुद्धृत्य जल
मध्ये जलं क्षिपेत्। सुमंतुः। आकाशे निक्षिपेद्वारि जलस्थो दक्षिणामुखः। पितॄणां स्थानमाकाशं दक्षिणा दिक्
२३ तथैव च॥ त्रीस्त्रीन्जलांजलीन्दद्यादुच्चैरुच्चैर्बुधः। कार्ष्णाजिनिः॥ देवतानामृषीणां च जले दद्याज्जलांज
लीन्। असंस्कृतप्रमीतानां स्थले दद्याज्जलं पुनः। बोधायनः॥ जलांजलित्रयं दद्याद्ये चान्ये संस्कृता भुवि।
असंस्कृतप्रमीतानामेकमेव तटे क्षिपेत्। तत्र मंत्रः॥ अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम। भूमौ दत्तेन

श्रा॰म॰ २२ तोयेन स्नायात्तु परांगतिमिति। भगवान्॥ स्नानांगतर्पणं कृत्वा यक्ष्मणे जलमाहरेत्। तन्मंत्रस्तु
यन्मया दूषितं तोयं शरीरमलसंभवात्। तद्दोषपरिहारार्थं यक्ष्माणं तर्पयाम्यहं॥ नदीष्वमापनें कौ
र्मे॥ ज्ञानतोज्ञानतो वापि यन्मया दुःकृतं कृतं। तत्त्वमस्याखिलं देवि जगन्मातर्नमोस्तु ते॥ ततो दर्भां
स्त्यजेत्॥ विकिरे पिंडदाने च तर्पणे स्नानकर्मणि। आचांतः सन्न कुर्वीत दर्भसंत्यजनं बुध इति स्मृतेः॥
विष्णुः॥ स्नातः शिरो न वधुनेन्नांगेभ्यस्तोयमुद्धरेत्। न च पूर्वधृतं वासो न च तैलमुपस्पृशेत्॥ स्नात्वा न
धावयेद्वस्त्रं न मृज्याद्वाससा मुखं। मार्कंडेयपुराणे॥ अवमृज्यान्न च स्नातो गात्राण्येव रपाणिभिः। न च
निर्धुनुयात्केशान् वासश्चैव न निर्धुनेत्॥ इति॥ परिधेयवस्त्रविशेषमाह देवलः॥ स्वयंधौतेन कर्तव्या
क्रिया धर्म्या विपश्चिता। न तु नेजकधौतेन नाहतेन न कुत्रचिदिति॥ नेजकोरजकः। नाहतेनेति समस्तंप
दं। नृगः॥ ब्राह्मणस्य सितं वस्त्रं नृपते रक्तमुल्बणं। पीतं वैश्यस्य शूद्रस्य नीलं मलवदुष्यते॥ विकच्छोनुत्त २२

रीयश्च नग्नश्चावस्त्र एव च। श्रौतं स्मार्तं तथा कर्म न नग्नश्चिंतयेदपि। नग्नः स्यान्मलवद्वासा नग्नः कौशे
यकेवलः। नग्नो द्विगुणवस्त्रः स्यान्नग्नो दग्धपटस्तथा॥ नग्नश्च स्यूतवस्त्रः स्यान्नग्नो ग्रथितवस्त्रकः।
नग्नश्च बकवस्त्रः स्यान्नग्नः कौपीनकेवलः॥ काषायवस्त्रः साक्षाच्च दश नग्नाः प्रकीर्तिताः॥ कौशेयमा
त्रधारण एव नग्नता न तु परिधेयोत्तरीयवाससोंतरसाहित्येपि। कौपीने चैवं॥ अन्यत्रापि केवलशब्दो
पादानस्वरसात्॥ जातूकर्ण्यः॥ परिधानाद्बहिः कक्षा निबद्धा ह्यासुरी मता। धर्मकर्माणि विद्वद्भिर्वर्जि
ग४ नीया प्रयत्नतः॥ प्रयोगपारिजाते॥ स्नानं कृत्वार्द्रवस्त्रं तु ऊर्ध्वमुत्तारयेद्द्विजः। आर्द्रवस्त्रमधस्तात्चेत्पुनः स्ना
नेन शुध्यति॥ विष्णुपुराणे॥ होमदेवार्चनाद्यास्तु क्रियास्वाचमने तथा। नैकवस्त्रः प्रवर्तेत द्विजो नाचम
ने जपे॥ जाबालिः॥ निष्पीडितं धौतवस्त्रं यदा स्कंधे विनिक्षिपेत्। तदासुरं न वेत्कर्म पुनः स्नानं विशोध
नं॥ वस्त्रं चतुर्गुणीकृत्य निःपीड्य सदशं तथा। वामप्रकोष्ठे निःक्षिप्य स्खलस्य च्छिदिराचमेत्॥ वस्त्रं द्विगु

आ॰म॰ णितंयस्तुनिःपीडयतिमंदधीः। तथास्नानंनभवेत्तस्यस्नातस्यचकृथांबुनि॥ गोभिलः॥ एकवस्त्रोनभुं
२३ जीतनकुर्याद्देवतार्चनं। शातातपः॥ सव्यादंसात्परिभ्रष्टेनानिर्दिशेव्यवस्थितं। एकवस्त्रंतुतंविंद्या
द्दैवेपित्र्येचकर्मणि॥ योगयाज्ञवल्क्यः॥ अलाभेधौतवस्त्रस्यशाणक्षौमाविकानिच। कुतपंयोगप
ट्टंचद्विवासास्तुभवेन्नवेत्॥ उत्तरीयाभावेस्मृत्यंतरे। यज्ञोपवीतेद्वेधार्येश्रौतेस्मार्तेचकर्मणि। तृतीय
मुत्तरीयार्थेवस्त्राभावेतदिष्यतइति। पारस्करगृह्येतुएकंचेद्वासोभवतितस्येवोत्तरवर्गेणप्रछादयीत
॥ जाबालिः॥ स्नात्वानिवस्यवस्त्रंचजंघेशोध्येमृदंभसा। अपवित्रीकृतेतेतुकौपीनस्नाववारिणेति। एत
द्यतिब्रह्मचारिविषयं॥ गृह्यपरिशिष्टे॥ अथतीरमेत्यदक्षिणमुखःप्राचीनावीतीयेचास्मत्कुलेजाता
अपुत्रागोत्रिणोमृताः। तंगृह्णंतुमयादत्तंवस्त्रनिःपीडनोदकमिति। वस्त्रंनिष्पीड्योपवीतीअपउपस्पृश्य
परिधानीयमप्युत्तरपरिधायाप्यन्यद्योत्तरीयमभ्युक्ष्यतंप्रावृत्याद्विराचमेदिति। वृद्धमनुः॥ निष्पीड्यस्नान २३

वस्त्रंतुपश्चात्संध्यांसमाचरेत्। अन्यथाकुरुतेयस्तुस्नानंतस्याफलंभवेत्॥ मनुः॥ मनुष्यतर्पणेचैवस्नानवस्त्र
निपीडने। निवीतीचभवेद्विप्रस्तथामूत्रपुरीषयोरिति। वासोनिष्पीडनेनिवीतप्राचीनावीतयोर्विकल्पइतिकेचित्
गृह्यपरिशिष्टस्याश्वलायनपरत्वात्तेषांप्राचीनावीतमितरेषांनिवीतमितितुनृसिंहः॥ विष्णुः॥ ब्रह्मक्षत्रविशांचै
वमंत्रवत्स्नानमिष्यते। तूष्णीमेवहिशूद्रस्यस्त्रीणांचकुरुनंदनेति॥ दक्षः॥ प्रातर्मध्याह्नयोःस्नानंवानप्रस्थगृहस्थ
योः॥ यतेस्त्रिषवणंप्रोक्तंसकृत्तुब्रह्मचारिणइति। कात्यायनः॥ अल्पत्वाद्धोमकालस्यबहुत्वात्स्नानकर्म
णः। प्रातःसंक्षेपतःस्नानंहोमलोपोविगर्हितइति॥ गृह्यपरिशिष्टेथस्नानविधिः॥ ॥ तत्प्रातर्मध्याह्नेच
कुर्यादेकंवा। प्रातरेवब्रह्मचारी। द्विस्त्रिर्वानप्रस्थः। यतिस्त्रिषुसवनेषु। तत्रप्रातःसहगोमयेनकुर्या
न्मृदामध्यंदिने। सायंशुद्धाभिरद्भिः। नप्रातःस्नानान्नात्वाकृसंध्यामुपासीत। प्रातरुद्धृत्यगोमयंमंतरि
क्षस्थंसंगृह्यभूमिष्ठंवोर्ध्वधश्चसंत्यज्यतीर्थमेत्यधौतपाणिपादमुखआचम्यसंध्योक्तवदात्मान्न

आ॰म॰ २५

ह्नाणं दिवं ऋत्वा द्विराचम्य संयतप्राणः कर्म संकल्प्य गोमयं वीक्षितमादाय सव्ये पाणौ कृत्वा व्याहृति
भिस्त्रिधा विभज्य दक्षिणभागं प्रणिवोनदिक्षु निक्षिप्योत्तरं तीर्थे क्षिप्त्वा मध्यमं मानस्तोक इत्यृचाभि
मंत्र्य गंधद्वारामित्यृचा मूर्द्धादि सर्वांगमालिप्य प्रांजलिः हिरण्यशृंगं वरुणं प्रपद्ये तीर्थं मे देहि याचि
तः । यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः । यन्मे मनसा वाचा कर्मणा वा दुःकृतं कृतं । तन्न इंद्रो वरु
णो बृहस्पतिः सविता च पुनंतु मां इति द्वाभ्यां ॥ अवते हेल इति द्वाभ्यां । प्रसंम्राजे बृहदर्च इति सूक्ते
न संप्रार्थ्य । याः प्रवतो निवत उद्वत उदन्वतीरित्येतया तीर्थमुपस्पृश्यावगाह्य ततो द्विराचम्य मार्जये
दं वयोपं त्यधभिरिमा प्राभिरापो हि ष्ठेति च नवभिरथ तीर्थमंगुष्ठेन इमं मे गंग इति ऋचा त्रिः प्रदक्षिण
मालोड्य प्रकाशा पृष्ठमग्याघमर्षण सूक्तं त्रिरावृत्य निमज्ज्योन्मज्ज्यादित्यमवलोक्य दादश वलात्कृत्य पा
णिभ्यां शंखमुद्रया योनिमुद्रया वोदकमादाया दाय मूर्द्धि भूमौ खे वा क्रोरुरासिं चात्मानं गायत्र्याभि २५

षिच्य । त्वं नो अग्ने वरुणस्य विद्वानिति द्वाभ्यां । तरत्समंदी धावतीति च सूक्तेन पुनः स्नायात् । मूर्द्धि चाभिषिं
चयेत् । तद्विष्णोः परमं पदं त्वमग्ने रुद्रस्य च णे अहंसोयत्किंचेदं वरुण दैव्येजन इत्येताजपेत् । स्रोतोभिमुखः
सरित्सु स्नायात् । मूर्द्धि चाभिषिंचेत् । अन्यत्रादित्याभिमुखः । अथ साक्षताभिरद्भिः प्राङ्मुख उपवीती देवतीर्थेन
व्याहृतिभिर्व्यस्तसमस्ताभिर्ब्रह्मादीन्देवान्सकृत्सकृत्तर्पयित्वाथोदङ्मुखो निवीती सयवाभिरद्भिः प्राजा
पत्येन तीर्थेन ऋषीन् ताभिर्व्याहृतिभिर्द्विर्द्विस्तर्पयित्वाथ दक्षिणामुखः प्राचीनावीती पितृतीर्थेन सतिलाभिरद्भि
र्व्याहृतिभिरेव सोमः पितृमान् यमोऽङ्गिरस्वान् अग्निः कव्यवाहन इत्यादीन् त्रिस्त्रिस्तर्पयेत् स्नानांगतर्पणमिति ॥
शौनकः ॥ प्रसम्राजे बृहदर्चमृक्कमष्टं च वो रुणं जपेत् । समुद्राद्यूर्मिरित्यपां सूक्तं एकादशर्चकं आपो अस्मान्मातर
इत्यृचं च प्रजपेन्नरः । अवगाह्य निमज्ज्याथ द्विराचम्याभिषेचयेत् । अंब यो यंत्यृचो वो शेच आपो हि ष्ठादयो नव । अद्भिः ।
स्नात्वोदके मग्नस्त्रिः पठेदघमर्षणं । कुर्यात् द्वादशभिः स्नानं सर्वपापप्रणाशनं । धन्यं यशस्यमायुष्यमारोग्यं पु ।

आ॰म॰
२५

ष्टिवर्द्धनमिति॥ इतिनित्यस्नानं॥ ॥अथकाम्यस्नानं। पुलस्त्यः। पुष्येचजन्मनक्षत्रेव्यतीपातेचवैधृतौ। अमा
वास्यांनदीस्नानंपुनात्यासप्तमंकुलं॥ चैत्रशुक्लचतुर्दश्यांयःस्नायाच्छिवसंनिधौ। नप्रेतत्वमवाप्नोतिगंगायां
चविशेषतः॥ शिवलिंगसमीपेतुमुच्यतेसर्वकिल्बिषैः। ज्येष्ठेमासिसितेपक्षेदशम्यांहस्तसंयुते। दशजन्माघहा
गंगातेनपापहरास्मृतेति॥ विष्णुः॥ सूर्यग्रहणतुल्यातुशुक्लामाघस्यसप्तमी। अरुणोदयवेलायांतस्यांस्नानंमहा
फलं॥ पुनर्वसुबुधोपेताचैत्रमासेसिताष्टमी। स्रोतस्सुविधिवत्स्नात्वावाजपेयफलंलभेत्॥ मत्स्यपुराणे॥ आषा
ढादीन्यतद्गुणसंविज्ञानोबहुव्रीहिः॥ आषाढादिचतुर्मासिंप्रातःस्नायीभवेन्नरः। विप्रेभ्योभोजनंदत्वाकार्त्ति
क्यांगोप्रदोभवेत्॥ सवैष्णवंपदंयातिविष्णुव्रतमितिस्मृतमिति॥ आदित्यपुराणे॥ कार्त्तिकंसकलंमासंनित्यस्नायी
जितेंद्रियः। जपन्हविष्यभुक्स्नातःसर्वपापैःप्रमुच्यते॥ तुलामकरमेषेषुप्रातःस्नायीसदाभवेत्। हविष्यंब्रह्मच
र्यंचमहापातकनाशनमिति॥ मार्कंडेयः॥ श्रीकामःसर्वदास्नानंकुर्वीतामलकैर्नरः। सप्तमीनवमीचैवसर्वकालं २५

चवर्जयेत्॥ इति॥ विष्णुः॥ बालावृद्धतरुणाश्चयानरनारीनपुंसकाः। स्नात्वामाघेशुभेतीर्थेप्राप्नुवंतीप्सितंफलं॥
माघेमास्युषसिस्नात्वाविष्णुलोकंसगच्छतीति। चंद्रिकायां॥ दर्शंचपौर्णमासंवाप्रारभ्यस्नानमाचरेत्। पुण्यहा
नित्रिंशत्तुमकरस्थेदिवाकरे॥ अप्रावृतशरीरस्तुयःकष्टंस्नानमाचरेत्। पदेपदेश्वमेधस्यफलंप्राप्नोतिमानवः॥
अनभ्यंगीद्विजोमासंसर्वमेनंनयेद्गृही। ततःस्नानस्यावसानेभोज्यद्रव्यंसुसंस्कृतं॥ भोजयेद्विजदांपत्यंभूषयेच्च
सुभूषणैः। दंपत्योर्वाससीसूक्ष्मेसप्तधान्यसमन्विते। त्रिंशच्चमोदकादेयाःशर्करातिलसंयुताः॥ ॥अथाश्वत्थ
छायाजलस्नानं॥ प्रयोगपारिजाते॥ अश्वत्थच्छायोदकेस्नायाद्गजच्छायेतिसोच्यते। अमागुरुसमायोगःसूर्यपर्वशता
धिकइति॥ आदित्यपुराणे॥ गुरुवारेप्यमावास्याअश्वत्थच्छायावारिणा। स्नानंप्रयागस्नानेनसमंपातकनाशनं॥ प्रा
र्थनामंत्रः॥ जीवोबृहस्पतिःसौरिराचार्योगुरुरंगिराः। वाचस्पतिर्देवमंत्रीशंनःकुर्यात्सदामम॥ एतैर्नामभिरश्व
त्थंप्रार्थयेत्तर्पयेत्तथा॥ इत्यश्वत्थच्छायास्नानं॥ अथसमुद्रस्नानं॥ ॥भरद्वाजः॥ ॥पक्षोपवासफलदामहान

द्यः समुद्रगाः॥ मासोपवासफलदः सन्नस्नातो महोदधिरिति॥ आचार्यः॥ समुद्रे पर्वसु स्नायाद्दमायां तु विशेषतः।
पापैर्विमुच्यते सर्वैरमायां ते स्नानमाचरेत्॥ भृगौ भौमदिने स्नानं समुद्रे च विवर्जयेत्। ग्रहणे रविवारे च पुत्रे प्रसुनैतदा
चरेत्॥ इति काम्यस्नानं॥ अथ नैमित्तिकं॥ मनुः॥ दिवाकीर्तिमुदक्यां च पतितं सूतिकां तथा। शवं तत्स्पृष्टिनं चैव स्पृ
ष्ट्वा स्नानेन शुद्ध्यतीति। दिवाकीर्तिश्चंडालः॥ संवर्तः॥ तत्स्पृष्टिनं स्पृशेद्यस्तु स्नानं तस्य विधीयते। ऊर्ध्वमाचमनं प्रोक्तं
द्रव्याणां प्रोक्षणं तथेति॥ तदबुद्धिपूर्वस्पर्शे। संबुद्धिपूर्वस्पर्शे द्वयोः स्नानं विधीयते। इति संग्रहोक्तेरिति माधवः। बु
द्धिपूर्वकं तु तृतीयस्यापि स्नानं॥ उपस्पृशेच्चतुर्थस्तु तदूर्ध्वं प्रोक्षणं स्मृतं इति मरीच्युक्तेः। काष्ठाद्यवेतनांतरे स्पर्शे
तु कौर्मे॥ चंडालसूतकशवैः संस्पृष्टं संस्पृशेद्यदि। प्रमादात्तत आचम्य जपं कुर्यात्समाहितः॥ तत्स्पृष्टस्पर्शिनं स्पृ
ष्ट्वा बुद्धिपूर्वं द्विजोत्तमः। आचमेत्तु विशुद्ध्यर्थं प्राह देवः पितामह इति॥ संप्रवेताः॥ साक्षात्स्पर्शे तु यत्प्रोक्तं तदस्त्रां
तरितेपि चेति। चतुर्विंशतिमते॥ चितिं च चितिकाष्ठं च यूपं चंडालमेव च। स्पृष्ट्वा देवलकं चैव सचैलो जलमाविशेत्। २६

बौद्धान्पाशुपतान्जैनान्लोकायतिककापिलान्। विकर्मस्थान्द्विजान्स्पृष्ट्वा सचैलो जलमाविशेत्॥ कापा
लिकांस्तु संस्पृश्य प्राणायामोधिको मत इति॥ कापिलाः सांख्या इति केचित्॥ लोकायतिककापिलानिति कर्म
धारया लोकायतिकैकदेशिन एव कापिला इति हेमाद्रिः॥ स्मृत्यंतरे। देवार्चनपरो विप्रो वित्तार्थी वत्सरत्रयं। स
वै देवलको नाम हव्यकव्येषु गर्हित इति। स्मृतिरत्नावल्यां। शिवं सूर्यं तथा चंडं दुर्गादीन्यद्देवताः। योर्चयेत्पण
पूर्वं तु सद्यः पतति मानवः॥ देवसंनिधौ पशुबंधे च देवलयूपस्पर्शे निस्नानं। न स्नायाद्देवलं यूपं देवस्थाने च वं
धने। अन्यदा तावुभौ स्पृष्ट्वा सचैलो जलमाविशेदिति। संग्रहोक्तेः॥ व्यासः॥ महानिशा तु विज्ञेया मध्ययामद्व
ये निशि। तस्यां स्नानं न कुर्वीत काम्यनैमित्तिकादृते॥ प्रदोषपश्चिमे यामे दिनं स्नानमाचरेत् इति। मध्ययामयो
स्तु विशेषमाह त्रिः॥ रात्रौ स्नानं यदि न वेत्पश्येत्त्वग्निं समाचरेत्। स्वर्णंगुल्लिकरो विप्रो वह्निना वा विनार
रेत्॥ पराशरः॥ अस्पर्शस्पर्शने जाते अस्तपाते त्वहुरेनगे। स्नानं नैमित्तिकं कार्यं देवपैत्र्यविवर्जितमिति। देवा व

दितर्पणरहितमित्यर्थः॥ स एव॥ तूष्णीमेवावगाहेत यदा स्यादशुचिर्नरः। आचम्य विधिवत्पश्चात्प्रय
तः स्नानमाचरेदिति। वृद्धमनुः॥ मृते जन्मनि संक्रांतौ श्राद्धे जन्मदिने तथा। अस्पृश्यस्पर्शने चैव न स्नायादु
ष्णवारिणेति॥ गार्ग्यः॥ कुर्यान्नैमित्तिकं स्नानं शीताद्भिः काम्यमेव च। नित्यं याद्दच्छिकं चैव यथारुचि समा
चरेदिति॥ इति नैमित्तिकस्नानं॥ ॥ अथ मलापकर्षणस्नानं॥ मनुः॥ पर्वद्वितीयोत्सवयोः षष्ठ्यां रिक्तायां च तथा ति
थौ। तैलेनाभ्यज्यमानस्तु धनायुर्भ्यां विहीयते॥ गर्गः॥ पंचदश्यां चतुर्दश्यां अष्टम्यां रविसंक्रमे। द्वादश्यां सप्त
मीषष्ठ्यां तैलस्पर्शं विवर्जयेत्॥ न कुर्यात्तु द्वितीयायां त्रयोदश्यां तिथौ तथा। नवम्यां च दशम्यां च होममिच्छन्नृ द्वि
पंडित इति॥ माधवीये॥ संतापः कांतिरल्पायुर्धनं निर्धनता तथा। अनारोग्यं सर्वकामा अभ्यंगाद्भास्करादिषु॥
प्रचेताः॥ सार्षपं गंधतैलं च यत्तैलं पुष्पवासितं। अन्यद्रव्ययुतं तैलं न दुष्यति कदाचनेति॥ याज्ञवल्क्यः॥ वृथा त
ष्णोदकस्नानं वृथा जाप्यमवैदिकं। वृथा त्वश्रोत्रिये दानं वृथा भुक्तमसाक्षिकमिति॥ यमः॥ नित्यं नैमित्तिकं चैव क्रिया २१

गं मलकर्षणं। तीर्थाभावे तु कर्तव्यमुष्णोदकपरोदके॥ आदित्यकिरणैः पूतं पुनः पूतं च वह्निना। आ
स्नातमातुरस्नाने न प्रशस्तं दृढांगिनामिति॥ आपः स्वभावतो मेध्याः किं पुनर्वह्निसंयुताः। अतः संतः
प्रशंसंति स्नानमुष्णेन वारिणेति॥ ॥ अथ कात्यायनः॥ मध्याह्नस्नाने विशेषस्तु सूत्रे। संकल्पं सूक्तप
वनं मार्जनं वाघमर्षणं। देवादितर्पणं चैव पंचांगं स्नानमुच्यते॥ ॥ अथातो नित्यस्नानं नद्यादौ मृद्गोमय
कुशतिलसुमनस आहृत्योदकांतं गत्वा शुचौ देशे स्थाप्य प्रक्षाल्य पाणिपादं कुशोपग्रहो बद्धशिखी यज्ञो
पवीत्याचम्योरु उहीति तोयमामंत्र्यावर्तयेद्ये ते शतमिति सुमित्रिया न इत्यपोंजलिनादाय दुर्मित्रिया इति
द्वेष्यं प्रति निषिंचेत्ततः कटिं च स्तुरूजं घेवरणौ करौ मृदा त्रिस्त्रिः प्रक्षाल्याचम्य नमस्योदकमाजन्ने दंगानि मृदेदं दि
हन्तु रिति सूर्याभिमुखो मज्जेदापो अस्मानिति स्नात्वा उदिदाभ्य इत्युन्मज्ज्य निमज्ज्योन्मज्ज्याचम्य गोमयेन वि
लिंपेन्मानस्तोक इति। ततो निषिंचेदिमेमे वरुण तत्त्वा तत्स्त्वन्नो मोपन्न उदुत्तमं मुंचत्वव नृथे यंते चैवं निमज्ज्यो २२

तिर्यक्छोऽक्कारेणव्याहृतीर्निर्गायत्र्यादावं तेवांतर्जलेच मर्षणं चिरावर्तयेद्द्रुपदादिवायं गौरिति त्रिवं प्राणायामं सशिरस
सोमितिवा विष्णो परिस्मरन् ... सूर्यं देवाः सवि परिधाय मृदोरु कुरौ शस्ता त्याचम्य त्रिरायम्या सूनु प्राणं एवं तुमिश्राणपूर्वं प्रक्षिप्यो र्ध्वबाहुः सूर्यमुदीक्षमाणं नुद्वयमु
दुत्यं चित्रं तच्चक्षुरिति गायत्र्याच यथा शक्त्या विभ्राडित्यनुवाकं पुरुषसूक्तं ८ शिवसंकल्पमंडलब्राह्मणैरित्य पस्थाय प्रदक्षिणीकृत्य नमस्कृत्योपविश्य दर्भेषु दर्भपाणिः स्वा

श्रा॰म॰ न्मज्याचम्य दर्भैः पावयेदापोहिष्ठेति तिसृभिरिदमापो हविष्मतीर्देवीराप इति द्वाभ्यामपो देवा द्रुप
२८ दादिव शन्नोदेवीरपां रसमृतानि पयस्वनस्पतीनोषधीर्भूतग्राममश्च विधं स्तृप्यतामित्योंकारपूर्वं उ२
हनं ३ ततो निवीती मनुष्यान्सनकं च सनन्दनं तृतीयं च सनातनं। कपिलं चासुरिं चैव वोढुं पंचशिखं तथा। ततो पसव्यं
तिलमिश्रं कव्यवालं नलं सोमं यममर्यमणमग्निष्वात्ताः सोमपा बर्हिषदो पमांश्चैके। एकैकस्य तिलै
र्मिश्रांस्त्रींस्त्रीन् दद्याज्जलांजलीन्। यावज्जीवकृतं पापं तत्क्षणादेव नश्यति। जीवत्पितृकोप्येतानन्यांश्चैव। त१
वहंति ऊर्जं वहंतीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे पितॄन्। तृप्यध्वमिति च त्रिः। नमो व उ४
इत्युक्त्वा मातामहानां चैवं गुरुशिष्यर्त्विक् ज्ञातिबांधवान्। मृतपितादेहाद्रुधिरं पिबंति। अत्र यद्यपि ब्र
ह्मादिद्वितीयांतेषु तर्पयामीति वाक्यशेषो युक्तस्तथापि कृतत्वात्तर्पयामि तृप्यतामित्येवानुषज्यते। ते न ब्रह्माद्याः प्रथ
मांतत योज्याः। ब्रह्मा तृप्यतामित्येको न विंशति वाक्यानि सावयवमिति संवत्सर विशेषणं। एवमेव सनकादि २८
ध्यायं च यथा शक्त्या दावा रव्येदं २॥ ततस्तर्पयेद् ब्रह्माणं पूर्वं विष्णुं रुद्रं प्रजापतिं देवांश्छंदांसि वेदानृषीन् पुराणाचार्यान् गंधर्वानितराचार्यान् संवत्सरं च सावयवं
देवीरप्सरसो देवानुगान्नागान्सागरान्पर्वतान्सरितो मनुष्यान् रक्षांसि पिशाचान् सुपर्णान् उ२ ७ पवित।

सप्तसु। कव्यवाडवा सावनश्चैत्येकैव देवतेति कर्ध्वहरिहरौ। देवताद्वयमित्यन्ये। यमादिषु चतुर्दशसु
यमायनमस्तर्पयामीत्यादिः प्रयोग इति हरिहरः। अन्यानि त्रीन्दीस्त्रीन् इतरो मृतपितृक ऊदीरतामिषेति
सृभिस्ताः मधुवाताइति तृचं च जपन् जलांजलीन् क्षिपेत्। तृप्यध्वमिति च प्रत्येकमुक्त्वा क्षिपेत्। नमो वः पितरश्श
इत्यादीन् षण्मंत्रानुक्त्वानंतरं मातामहादींस्तर्पयेत्। वासो निःपीड्याचम्य ब्रह्मवै स्वव रोद सावित्र मै
त्रावरुणोस्तल्लिंगैरर्चयेत्। अदृश्रन् हंसः शुचिषत् इत्युपस्थाय सूर्यं प्रदक्षिणीकृत्य दिशश्च देवताश्चोपवि
श्य ब्रह्माग्नि पृथिव्योषधि वाग्वाचस्पति विष्णुभ्यो पां पतये वरुणाय नम इति सर्वत्र संवर्चसेति मुखं विमृ
ज्य देवागातु विद इति विसर्जयेत्। एष स्नानविधिरिति॥ ॥अथ गौणस्नानानि। तत्र मनुः॥ अथ सामर्थ्या
च्छरीरस्य कालशक्त्याद्यपेक्षया। मंत्रस्नानादिकं प्रोक्तं मुनिभिः शौनकादिभिरिति चतुर्विंशतिमते। आग्ने
यं भस्मना स्नानमवगाह्य च वारुणं। आपोहिष्ठेति च ब्राह्मं वायव्यं रजसा गवां। यत्तु सातप वर्षं हि तत्स्नानं दि

व्यमुच्यते।स्नानान्येतानिचापस्तुव्याधितस्योदकंविनेति।प्रयोगपारिजाते।आपोहिष्ठादिभिर्मंत्रैर्मृदालंभस्तु
पार्थिवं।आग्नेयंभस्मनास्नानंवायव्यंगोरजःस्मृतं।यत्तुसातपवर्षेणस्नानंतद्दिव्यमुच्यते।अवगाहोवारुणंस्यान्मा
नसंविष्णुचिंतनं।स्वस्तुविंशतिमते।अशक्तावशिरस्कंयस्नानमंत्रविधानतः।आर्द्रेणवाससावांगमार्जनंकापिलं
स्मृतं।अथसारस्वतं।विद्वत्सरस्वतीप्राप्तंस्नानंसारस्वतंविदुः।विद्वत्सरस्वतीप्रद्धोसीत्यादिवचः।अथगायत्रं।गाय
त्र्यांजलमादायदशकृत्वाभिमंत्र्यवा।शिरस्यंगानिसर्वाणिप्रोक्षयेत्तेनवारिणा।स्नानंगायत्रकंनामसर्वपापप्रणाशनं
।अशक्तानांतुजंतूनांगुरोःपादोदकंस्मृतं।तथा।विप्रपादाद्विष्णुपादात्तुलस्याःसंभृतंजलं।प्रोक्षणेनस्नानमाप्नोति
ध्यानस्नानंविशिष्यते।चतुर्भुजंमहाकायंशंखचक्रगदाधरं।ध्यायीतमनसाविष्णुंस्नानंमानसमीरितं।एतैस्तुस्ना
नानुकल्पैर्जपसंध्यावंदनवेदाध्ययनेष्वेवाधिकारोनश्राद्धदेवपूजादौ।प्रातःस्नानमशक्तस्तुरोगाद्यैर्वानियाश्चवा।
पूर्ववस्त्रंपरित्यज्यगौणस्नानेनशुध्यति।सत्कर्मस्वनर्हःस्याद्ब्राह्मदेवार्चनादिषु।जपेत्संध्यांतथावेदान्नाधीयीतयथा २५

ब्रह्मपुराणे॥

विधीत्याचारार्यस्मृतेः॥इतिस्नानविधिः॥अथतिलकं॥ ॥पर्वताग्रेनदीतीरेममक्षेत्रेविशेषतः।सिंधुतीरेचव
ल्मीकेतुलसीमूलमाश्रिताः।मृदएतास्तुसंपाद्यावर्जयेदन्यमृत्तिकाः॥द्वारवत्युद्भवाद्गोपीचंदनादूर्ध्वपुंड्रकं।
कारयेन्नित्यमेवंहिपापंहंतिदिनेदिने॥जाह्नवीतीरसंभूतांमृदंमूर्ध्नाबिभर्तियः।बिभर्तिरूपंसोर्कस्यतमोनाश
यकेवलं।श्यामंशांतिकरंप्रोक्तंरक्तंवश्यकरंभवेत्।श्रीकरंपीतमित्याहुर्वैष्णवंश्वेतमुच्यते॥अंगुष्ठःपुष्टिदःप्रो
क्तोमध्यमायुष्करीभवेत्।अनामिकान्नदानित्यंमुक्तिदाचप्रदेशिनी॥एतैरंगुलिभेदैस्तुकारयेन्ननखैःस्पृशेत्
।तिलकंप्रक्रम्यस्मृतिचंद्रिकायां।ब्रह्मांडे॥ललाटेकेशवंविंद्यान्नारायणमथोदरे।माधवंहृदिविन्यस्यगोविंदंकं
ठकूपके॥उदरेदक्षिणेपार्श्वेविष्णुरित्यभिधीयते।तत्पार्श्वेबाहुमध्येतुविन्यसेन्मधुसूदनं॥त्रिविक्रमंकर्णदेशेवा
मकुक्षौतुवामनं।श्रीधरंबाहुकेवामेहृषीकेशंतुकर्णके॥पृष्ठदेशेपद्मनाभंककुद्दामोदरंस्मरेत्।द्वादशैतानिना
मानिवासुदेवेतिमूर्धनि।संकर्षणादिभिःकुक्षौस्तनेकंठेचकेशवादिभिरिति॥शौनकः॥ऊर्ध्वपुंड्रांशिवस्यैवंविष्णोःकु

र्युस्त्रवाबुधाः॥मूर्द्ध्निमूलेनमंत्रेणाशेषंद्वादशनामभिः॥स्थानेष्वेषुद्विजःकुर्यान्नियमोनैऽप्रणवेनचेति॥स्थानविशे
षेणाकारविशेषः॥निटिलेबाहुवच्चैवदंडवत्कर्णपद्मवत्।हृदयेकमलाकारंउदरेदीपवल्लिखेत्॥वेणुपत्रसमा
कारंबाहुमध्येसमालिखेत्।अधःपृष्ठेस्कंधदेशेलिखेज्जंबूफलाकृतिः॥निटिलेनासे।दशांगुलप्रमाणंतुउत्
तमोत्तममुच्यते।नवांगुलंमध्यमंस्यादष्टांगुलमतःपरं॥सप्तषट्पंचभिःपुंड्रंमध्यमेत्रिविधंस्मृतं।चतुस्त्रिद्व्यंगु
लैःपुंड्रंकनिष्ठंत्रिविधंभवेत्॥ऊर्ध्वपुंड्रमृजुंसौम्यंकनिष्ठांगुलिवत्स्मृतं।नासादिकेशपर्यंतंप्रयत्नाद्धारयेद्विजः॥स
र्वव्रतः॥मद्भक्तोधारयेन्नित्यंऊर्ध्वपुंड्रंविनातुतत्।यत्कर्मकारयेन्नित्यंतत्सर्वंनिःफलंभवेत्॥इति॥प्रयोगपारिजा
तेसंग्रहे।ऊर्ध्वपुंड्रंत्रिपुंड्रंवामध्येशून्यंनधारयेत्।शृणुषण्मुखतन्मध्येतुमयाश्रीश्रियाहरिरिति॥तत्रैवसाय
णीयेशंखः॥शंखचक्राद्यंकनंचतुलसीदलभक्षणं।यःकुर्यान्नियतंभक्त्यासयातिपरमांगतिं।नान्यंदेवंनम
स्कुर्यान्नान्यंदेवंनिरीक्षयेत्।चक्रांकितःसदातिष्ठेन्मद्भक्तःपांडुनंदनेति॥शंखादिचक्रांकिसिवैदिकमार्गभ्रष्टप ३०

राणि।शिवकेशवयोश्चिह्नांश्चक्रशूलादिकान्द्विजः।नधारयेतमतिमान्वैदिकेवर्त्मनिस्थितइ
त्याश्वलायनेर्मैत्रके॥ब्रह्मांडे॥मृत्तिकाचंदनंचैवभस्मतोयंचतुर्थकं।एभिर्द्रव्यैर्यथाकालंऊर्ध्वपुंड्रंभवे
त्सदा॥स्नात्वापुंड्रंमृदाकुर्याद्धुत्वाचैवतुभस्मना।देवानभ्यर्च्यगंधेनसर्वपापापनुत्तये॥जलेनतिलकं
कुर्याज्जिलांतःकर्मसिद्धयेइति।संग्रहे॥नकदाचिन्मृदातिर्यक्कन्यसेदूर्ध्वंनभस्मनेति।अत्रभस्मनोर्ध्व
पुंड्रस्यविहितप्रतिषिद्धत्वाद्विकल्पःसचवृद्धाचारतोव्यवस्थितइतिनृसिंहः॥कात्यायनः।श्राद्धेयज्ञेज
पेहोमेवैश्वदेवेसुरार्चने।धृतत्रिपुंड्रःपूतात्मामृत्युंजयतिमानवः॥भविष्यत्पुराणे॥सत्यंशौचंजपो
होमस्तीर्थंदेवादिपूजनं।तस्यव्यर्थमिदंसर्वंयस्त्रिपुंड्रंनधारयेदिति।भस्मधारणप्रदेशाःस्मृतिरत्नाव
ल्यां॥ललाटेहृदयेनाभौगलेसेबाहुसंधिषु।पृष्ठदेशेशिरस्येवंस्थानेष्वेतेषुधारयेत्॥भस्मधारणे
मंत्रानाहपुलस्त्यः॥अग्निरित्यादिभिर्मंत्रैःशुद्धब्रह्मादिभिर्मंत्रितं।शिवमंत्रेणाष्टाक्षरेणवागायत्र्या

आ॰प॰ ३१ वाचदेवर्षेमंत्रिणप्रणवेनवा। करोतिशिवमंत्रेणयस्त्रिपुंड्रंद्विजोत्तमः। अत्रः शूलधरः सौम्यः शिवलोकेम
हीयते। अष्टाक्षरेणमंत्रेणयः करोतित्रिपुंड्रकं। विष्णोः पदमवाप्नोतिनान्यथाकृतिश्चोदितं। सोरंपदमवा
प्नोतिगायत्र्यामुनिसत्तम। प्राप्नोतिब्रह्मणोरूपंप्रणवेननसंशयइति॥ अग्निरित्यादिमंत्रास्त्वाथर्वणस्य
पिप्पलादऋषेः॥ गायत्रीछंदः रुद्रोदेवताभस्मशुद्धौविनियोगः॥ अग्निरितिभस्म। वायुरितिभस्म। जलमि
तिभस्म। स्थलमितिभस्म। व्योमेतिभस्म। सर्वंहवाइदंभस्म। प्रयोगपारिजाते। धार्यंभस्मत्रिपुंड्रंतुगृहि
णाजलसंयुतं। सार्वकालंनवेस्त्रीणांयतीनांजलवर्जितं। वानप्रस्थस्यकन्यानांदीक्षाहीननृणांतथा। म
ध्याह्नात्प्राग्जलैर्युक्तंपरंतोजलवर्जितं। मध्यांगुलित्रयेणैवस्वदक्षिणकरस्यतु। त्रिपुंड्रंधारयेद्विद्वान्स
र्वकल्मषनाशनमिति। स्मृतिरत्नावल्यां। मध्यमानामिकांगुष्ठैरनुलोमविलोमतः। अतिस्वल्पमनायुष्यम
तिदीर्घंतपःक्षयं। नेत्रयुग्मप्रमाणेनत्रिपुंड्रंधारयेद्द्विजः। षडंगुलप्रमाणेनब्राह्मणानांत्रिपुंड्रकं। नृपाणां ३१

चतुरंगुल्यंवैश्यानांद्व्यंगुलंतथा। शूद्राणामथसर्वेषांएकांगुल्यंत्रिपुंड्रकं॥ तत्रैव॥ त्रिपुंड्रंब्राह्मणोवि
द्वान्मनसापिनलंघयेत्। स्मृत्याविधीयतेयस्मात्तत्त्यागीपतितोभवेत्॥ त्रिपुंड्रेणविनायेनविप्रेण
यदनुष्ठितं। नतत्ध्यानंनतज्ज्ञानंनतद्दानंजपोनसः॥ संग्रहे॥ येभस्मधारिणंदृष्ट्वावाचानिंद
तिमानवाः। तेषांशूद्रेणसंभूतिरनुमेयाविपश्चितेति॥ इतितिलकधारणे॥ अथसंध्यावंदनं॥ त
स्यचनित्यतामाहमरीचिः। संध्यायेननविज्ञातासंध्यायेनानुपासिता। जीवमानोभवेच्छूद्रोमृतःश्वा
चाभिजायतइति। अविलसंपादनेनकर्मांगितामाहदक्षः॥ संध्याहीनोशुचिर्नित्यमनर्हःसर्वकर्मसु
यदन्यत्कुरुतेकर्मनतस्यफलभाग्भवेदिति॥ अंगताचप्रातःसंध्यायाएवेतिकेचित्॥ युक्तंतु॥ वचनांतर
प्राप्ततत्तत्संध्याकालोत्तरभाविततत्कर्मांगितासंध्यात्रयस्यापि। अविशेषात्॥ अत्रिः॥ संध्यात्रयंतुकर्त्त
व्यंद्विजेनात्मविदासदेति॥ अत्रसंध्यापदंसंध्यासुकर्त्तव्यत्वात्संधिरूपकालप्राप्तेस्तत्प्रख्यातयाकर्मनाम

दर्शपूर्णमासादिवत्। तच्च कर्मोपासनाख्यं ध्यानं। तदेव प्रधानं। संध्यामुपासते ये तु सततं शंसितव्रताः
।विधूतपापास्ते यांति ब्रह्मलोकं सनातनमिति। फलसंबंधात्॥ अतः अरण्ये अर्जुनादिभिरंगेष्वसामर्थ्यात्सू
र्योपासनमात्रं प्रधानमकारीति भारते॥ तेन तथैव महाराज दर्शितारण्यमूर्द्धनि। संध्यागतं सहस्रांशुमादित्यमुप
तस्थिरे इति॥ तैत्तिरीये॥ उद्यंतमस्तं यंतमादित्यमभिध्यायन् कुर्वन्ब्राह्मणो विद्वान्सकलं भद्रमश्नुते सा
वादित्यो ब्रह्मेति ब्रह्मैव सन्ब्रह्माप्येति य एवं वेदेति। कुर्वन्गायत्रीजपं। भद्रमीप्सितं फलं। ब्रह्मैवेत्यादि।
अज्ञानाज्जीवतां प्राप्तोनेन ध्यानेन ब्रह्माप्नोतीत्यर्थः॥ व्यासः॥ संध्येति सूर्यगं ब्रह्म संधानाद्विभागतः
।ब्रह्माद्यैः सकलैर्मूर्तैस्तैस्तं बातैः सच्चिदात्मनः॥ तस्यादाः सोहमस्मीति सोहमस्मीति वामतः॥ नवेद्युपा
सकस्येति ह्येवं बहुविदो विदुः॥ आदित्यस्यैव कालभेदेन नामान्यादृक् स एव॥ गायत्री नाम पूर्वाह्णे सा
वित्री मध्यमे दिने। सरस्वती च सायाह्ने सैव संध्या त्रिषु स्मृतेति॥ संधिकालोपास्यत्वात्संध्येति माधवः। ३२

सम्यक् ध्येयत्वात्संध्येति नृसिंहः॥ अनयथा ध्येयः सूर्य एव स्मृत्यंतरे दर्शितः॥ गायत्री च नवेद्युक्ता सावित्री
शुक्लवर्णिका। सरस्वती तथा कृष्णा उपास्या वर्णभेदत इति। तत्रैव। गायत्री ब्रह्मरूपा च सावित्री रुद्ररूपिणी
।सरस्वती विष्णुरूपा उपास्या वर्णभेदत इति॥ व्यासः॥ न भिन्नां प्रतिपद्येत गायत्रीं ब्रह्मणा सह। सोहम
स्मीत्युपासीत विधिना केन येन विद्दिति॥ प्रतिग्रहादन्नदोषात्पातकादुपपातकात्। गायत्री प्रोच्यते यस्मा
त्गायंतं त्रायते ततः॥ सविता द्योतनात्सैव सावित्री परिकीर्त्तिता॥ जगतः प्रसवित्री वा वाग्रूपत्वात्सरस्व
तीति व्यासोक्तेः॥ गायत्रीपदस्य मंत्रे प्रयोगस्तु प्रतिपाद्यादित्येन सहाभेदोपन्यासादिति नृसिंहः॥ स्मृत्यंतरे
॥ गायत्रीं चिंतयेद्यस्तु हृत्पद्मे समुपस्थितां। धर्माधर्मविनिर्मुक्तः स याति परमां गतिमिति॥ ॥ इति संध्यास्व
रूपं। अथ तत्कालः॥ धर्मसारे॥ उत्तमा तारकोपेता मध्यमा लुप्ततारका। अधमा सूर्यसहिता प्रातःसंध्या
त्रिधा मता। उत्तमा सूर्यसहिता मध्यमा लुप्ततारका। कनिष्ठा तारकोपेता सायंसंध्या त्रिधा मतेति॥ अग्नि

आ॰ म॰ स्मृतौ। संधाकालः प्रागुदयात् विप्रस्य द्विमुहूर्तकः। क्षत्रियस्य तदर्द्धं स्यात्तदर्द्धं स्याद्विशोऽप्युत॥ तथैवास्तमि
३३ ते तेषां वैश्यादीनामयं क्रमः इति॥ दक्षः॥ रात्र्यंतमापनाडीद्वे संध्याकालोयमुच्यते। दर्शनाद्रविरेखायास्तदंतो मु
निभिः स्मृतः॥ अर्धर्द्धयामा माध्याह्निकीष्यत इति संध्याकालः॥ अथ देशः॥ व्यासः॥ गृहे त्वेकगुणा संध्या गोष्ठे द
शगुणा स्मृता। शतसाहस्त्रिका नद्यामनंता विष्णुसन्निधौ॥ बहिः संध्या दशगुणा गर्तप्रस्रवणेषु च। ख्या
ते तीर्थे शतगुणा स्यादनंता जाह्नवीजले॥ शातातपः॥ अनृतं मद्यगंधं च दिवा मैथुनमेव च। पुनाति वृषलस्यान्नं
बहिः संध्या ह्युपासितेति॥ विद्रवणलोपप्रसंगेन बहिर्गमिनेऽवकाशाभावे। आह्नात्रिः॥ संध्यात्रयं तु क
र्तव्यं द्विजेनात्मविदा सदा। उभे संध्ये तु कर्तव्ये ब्राह्मणैस्तु गृहेष्वपीति॥ अथ प्रयोगः॥ ॥शौनकः॥ ॥
घा२ प्राणानायम्य विधिवत् वाग्यतः संयतेंद्रियः। अथ संध्यामुपासिष्ये इति संकल्प्य मार्जयेत्॥ त्रिसृभिर्मार्जनं
कुर्यादापो हीति कुशोदकैः। पादे पादे क्षिपेन्मूर्ध्नि प्रतिप्रणवसंयुतां॥ स एव॥ नासिकामंगुलीभिस्तु 33

तर्जनीमध्यमावृते। दक्षिणेन समाकृष्य सव्येन तु विसर्जयेत्॥ प्रणवं व्याहृतीः सप्त गायत्रीः सप्त
गायत्रीं शिरसा सह। त्रिः पठेदायतः प्राणः प्राणायामः स उच्यते। शनैर्नासापुटे वायुमुत्सृजेन्न
तु वेगतः। न कंपयेच्छरीरं तु स योगी परमो मत इति॥ ऋग्विधाने॥ नवप्रणवयुक्तेन आपो हि ष्ठे
त्यनेन तु। संवत्सरकृतं पापं मार्जनांते विनश्यति॥ ऋक्त्रये प्रतिपादमादौ प्रणवे सति नवप्रण
वाः॥ बृह्वाप्याह॥ प्रयोगपारिजाते॥ आपो हिष्ठादिभिः पादैः शिरस्यं च सेविप्रुषः। यस्यक्षयायेत्य
धस्तान्निक्षिपेद्भिः परिषेचयेदिति॥ स एव॥ धाराच्युतेन तोयेन संध्योपास्ति विगर्हिता॥ कथं तर्हि
त्यत आह। नद्यां तीर्थे ह्रदे वापि भाजने मृन्मयेऽपि वा। औदुंबरे च सौवर्णे राजते दारुसंभवे। कृत्वा तु
वामहस्ते वा संध्योपास्तिः समाचरेदिति॥ औदुंबरं ताम्रं। कृत्वेति जलमिति शेषः। पात्राभावे वा म
हस्तेन तु पात्रसत्वेपि। वामहस्ते जलं कृत्वा येन संध्यामुपासते। सा संध्या वृषली ज्ञेया असुरास्तेस्तु त

आ॰ म॰ ३४

पितामहइतिस्मृताः॥गृह्यपरिशिष्टे॥अथाचमनोदकमादाय सूर्यश्चेति पिबेत्।सूर्यश्च मा मन्युश्च मन्युप
तयश्च मन्युकृतेभ्यः पापेभ्यो रक्षंतां।यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां।पद्भ्यामुदरेण शिश्ना
रात्रिस्तदवलुंपतु।यत्किंच दुरितं मयि।इदमहं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहेति सम
आचमनं।अथ मध्याह्ने॥आपः पुनंतु पृथिवीं पृथिवी पूता पुनातु मां।पुनंतु ब्रह्मणस्पतिर्ब्रह्म पू
ता पुनातु मां।यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम।सर्वं पुनंतु मामापोऽसतां च प्रतिग्रहं स्वाहेत्येव
।सायं विशेषः।सूर्यश्चेति मंत्रे सूर्यस्थाने आग्निमापात्याहः सत्ये ज्योतिषीति चांते ब्रूयादिति।भगवां
श्चह।सूर्यश्चेत्यनुवाकेन प्रातःकाले पिबेदपः।अग्निश्चेत्यनुवाकेन सायंकाले पिबेदपः।आपः पुनंतु
मध्याह्ने मंत्राचमनमाचरेदिति।सूर्यश्चेति मंत्रस्य याज्ञवल्क्य उपनिषदृषिः सूर्यमन्युमन्युपतयो रा
त्रयश्च देवता गायत्री पंक्ति विराजश्छंदांसि रक्षंतामित्यंता गायत्री दुरितं मयीत्यंता पंक्तिः पंचपदा पं। ३४

क्तिरिति श्रुतेः।स्वाहेत्यंता दशाक्षरपादद्वयोपेता विराट् दशाक्षरा विराडिति श्रुतेः।प्रकृतिश्छंद इति म
दनः।आपः पुनंत्वित्यस्य।याज्ञवल्क्य उपनिषदृषिः।पूतो वा आपः पृथिवी ब्रह्मणस्पतिर्ब्रह्म देवता अष्टप
दा अष्टीछंदः।आचमने विनियोगः।इति मंत्राचमनं॥अथ द्वितीयमार्जनं॥कात्यायनः॥प्रणवो भूर्भुवः स्व
श्च गायत्री च तृतीयका।अब्दैवतं त्र्यृचं चैव चतुर्थमिति मार्जनं॥भगवान्॥प्रणवेन व्याहृतिभिः गायत्र्या
प्रणवाद्यया।आपो हि ष्ठेति सूक्तेन मार्जनं हि चतुर्थकं।प्रजापतिः।ऋगंते मार्जनं कुर्यात्पादांते वा समा
हितः।अर्धर्चांते वा कुर्याच्छिष्टानां मतमीदृशं।अथ पापनिरसनं भगवान्।उद्धृत्य दक्षिणे हस्ते ज
लं गोकर्णवत्कृते।निःश्वासनासिकाग्रे तु पाप्मानं पुरुषं स्मरेत्।ऋतं चेति त्र्यृचं वापि द्रुपदां वा जपेद्धियं वा द
क्षनासापुटेनैव पाप्मानमपसारयेत्।तज्जलं वावलोक्याथ वामभागे क्षितौ क्षिपेत्।द्रुपदा च वाजसने
यके द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव।पूतं पवित्रेणेवाज्यमापः शुंधंतु मैनस इति॥कात्यायनः

आ॰म॰ ३५ करेणोद्धृत्यसलिलंघ्राणमासज्यतत्रच।जपेदनियतासुर्वात्रिःसकृद्वाघमर्षणमिति।आसज्यनिरुध्य।
विकल्पःशक्ताशक्तविषयः।गृह्यपरिशिष्टे।तदुदकमवीक्षमाणोवामतोनुविततीव्रपातेनक्षिप्त्वातंपा
प्मानंवज्रहस्तंहतंसहस्रधादलितंभावयेदिति॥स्मृत्यंतरे।ब्रह्महत्याशिरस्कंचस्वर्णस्तेयंभुजद्वयं।सु
रापानहृदायुक्तंगुरुतल्पकटिद्वयं।तत्संयोगपदद्वंद्वंअंगप्रत्यंगपातकं।उपपातकरोमाणंरक्तश्मश्रुवि
लोचनं।खड्गचर्मधरंकृष्णंकुक्षौपापंविचिंतयेदिति।।इतिपापपुरुषनिरसनं॥ ॥अथार्घदानंतच्चांगंनप्र
धानं।फलसंबंधाभावात्।गृह्यपरिशिष्टे।अथावदर्न्यापाणिःपूर्णमुदकांजलिमुद्धृत्यादित्याभिमुखःस्थित्वा
प्रणवव्याहृतिपूर्वयासावित्र्यात्रिर्निवेदयन्नुत्क्षिपेत्तदेवार्घनिवेदनं।असावादित्योब्रह्मेतिप्रदक्षिणं
परिपतन्नुपरिषिच्यापउपस्पृश्येति।मध्याह्नेविशेषस्तत्रैव॥अथाह्नमीपयाहंसवत्यावात्रिःसकृद्वा
र्घमुत्क्षिपेति।आश्वलायनः।ततस्तिष्ठन्जलंगृह्यप्राङ्मुखोंजलिनास्मरेत्।स्नानादौसुस्थितंतेजःस्मा ३५

।तटिकज्योतिषासमं।उत्तीर्यतत्त्वसंप्राप्तंदक्षिणेनपथांजलिं।व्याहृत्याद्विजपेन्मंत्रंस्मृत्वेवंपरितारके
।मंदेहान्क्षयतःक्रूरान्निक्षिपेत्तेषथांजलीन्।षोडशाक्षरमंत्रेणपुनराक्षषसत्वरः।पुनर्जलंगृहीत्वै
वंतेजोमंत्रंचसंस्मरन्।एवंत्रिवारमावृत्त्यदग्धातानसुराद्विजाः।मंत्रेणाक्षयतस्तेजःस्नानादौस्थापये
स्मरन्।पूर्ववद्ब्रह्ममार्गेणस्मृत्वासंस्थाप्यचात्मनि॥प्रदक्षिणंसमावर्त्यजलंगृह्याचमेत्ततइति।स्नानादा
वाधारमंडपेस्थितंज्योतिर्नासादक्षिणरंध्रमार्गेणआधारमंडपात्तरंजतिमागतंमंदेहाख्यराक्षस
नाशायतोयेनसदक्षिणंगायत्रीशिरसानाप्यावामरंध्रेणपुनराधारमंडपेस्थापयामीतिसर्वतात्पर्य
र्थः।षोडशाक्षरमंत्रमाहव्यासः।षोडशाक्षरकंब्रह्मगायत्र्याःस्तशिरःस्मृतं।ॐआपोज्योतिरित्येषमंत्रोवैतै
त्तिरीयकेइति।संग्रहे।मुक्तहस्तेनदातव्यंमुद्रांतत्रनकारयेत्।तर्जन्यंगुष्ठयोगेतुराक्षसीमुद्रिका
स्मृता।राक्षसीमुद्रिकार्घेणतत्तोयंरुधिरंभवेत्॥जलेष्वर्घंप्रदातव्यंजलाभावेशुचिस्थले।संप्रोक्ष्य

आ॰म॰ वारिणासम्यक्कृततोर्घ्यंतुप्रदापयेदिति॥ ॥अथगायत्रीजपः॥याज्ञवल्क्यः॥जपन्नासीतसावित्रींप्र
३६ त्यगातारकोदयात्।संध्यांप्राक्प्रातरेवंहितिष्ठेदासूर्यदर्शनात्।सायंप्रत्यङ्मुखासीनः आनक्षत्रोद
यंजपेत्।प्रातःप्राङ्मुखस्तिष्ठन्नासूर्योदयमित्यर्थः।गृह्यपरिशिष्टे॥शुचौदेशेदर्भोनसोक्तितेदर्भाग्रि
संस्तीर्यव्याहृतिभिरुपविश्यप्राणायामत्रयंकृत्वाआत्मानंव्याहृतिभिरभ्युक्ष्यसावित्र्याऋषिदेवतछंदां
स्यनुस्मृत्यषड्भिस्तदंगमंत्रैर्यथांगमात्मनिन्यस्यात्मानंतद्रूपंभावयेत्।तद्यथा।तत्सवितुर्हृदयायनम
इतिहृदये।वरेण्यंशिरसेस्वाहेतिशिरसि।भर्गोदेवस्यशिखायैवषडितिशिखायां।धीमहिकवचायहु
मित्युरसि।धियोयोनेत्रत्रयायवौषडितिनेत्रललाटेषुन्यस्याथप्रचोदयादस्त्रायफडितिकरतलेस्त्रंप्र
क्यादिषुदशासुन्यसेदेषांगन्यासएवमप्येकेनेछंति।सद्विविधिरवैदिकइत्यर्थमंत्रदेवतांध्यात्वाऽगच्छ
वरदेदेवीत्यावाह्यतिष्ठन्नर्दन्नक्षत्रैषामंडलदर्शी।नाम्नंत्रार्थमनुसंदधानःप्रणवव्याहृतिपूर्विकांसावित्री ३६

जपेदिति।भगवान्॥सायंप्रातश्चमध्याह्नेसावित्रींवाग्यतोजपेत्।सहस्रपरमांदेवींशतमध्यांदशावरां
॥गायत्रीसस्मरेद्धीमान्हृदिवासूर्यमंडले।मनःसंतोषणंशौचंमौनंमंत्रार्थचिंतनं॥अव्यग्रत्वमनिर्वेदोजप
संपत्तिहेतवइति।व्यासः॥अष्टोत्तरशतंनित्यमष्टाविंशतिमेववा।विधिनादशकंवापित्रिकालेषुजपेद्बुधइ
ति॥जपेत्यासनान्याह।सएव॥ ॥कौशेयंकंबलंचैवअजिनंपट्टमेवच।दारुजंतालपत्रंवाआसनंपरिकल्प
येत्॥कृष्णाजिनेज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि।वंशाजिनंव्याधिनाशःकंबलंदुःखमोचनं॥अभिचारेनी
लवर्णरक्तंवश्यादिकर्मणि।शांतिकेकंबलंप्रोक्तंसर्वेष्टंचित्रकंबलमिति॥वशावंध्यासाचमृगीव्याघ्रीवा
तस्त्रिताः॥सएव।वंशासनेतुदारिद्र्यंपाषाणेव्याधिसंभवः।धरण्यांदुःखसंभूतिर्दौर्भाग्यंछिद्रदारुजे॥तृ
णेधनयशोहानिःपल्लवेचित्तविभ्रमइति॥उपवेशनेमंत्रउक्तोगायत्र्यांपृथ्वित्वयाधृतालोकादेवित्वंवि
ष्णुनाधृता।त्वंचधारयमांदेविपवित्रंकुरुचासनमिति॥ ॥अध्यायाद्व्यासः॥पृथिव्यांमेरुपृष्ठेतुऋषि

आ॰म॰ रित्यभिधीयते॥ सुतलं छंदस्त्वाद्यः कूर्मो वै देवता स्मृता॥ मेरोरारोहणे तस्य विनियोगः प्रकीर्तित इति॥
३१ विश्वामित्रः॥ उत्तमं मानसं जप्यमुपांशुं मध्यमं विदुः॥ अधमं वाचकं प्राहुः सर्वमंत्रेषु वै द्विजा इति॥ वृद्धमनुः॥
वस्त्रेण छादयित्वा तु करं दक्षिणं यः सदा जपेत्॥ तस्य तत्सफलं जप्यं तद्धीनमफलं स्मृतमिति॥ गौतमः॥ गच्छत
स्तिष्ठतो वापि स्वेच्छया कर्म कुर्वतः॥ अशुचेर्वा विना संख्यां तत्सर्वं निःफलं भवेदिति॥ बौधायनः॥ नानेरधः
संस्पर्शं कर्मसंयुक्तो वर्जयेदिति॥ हारीतः॥ रजतेंद्राक्षकर्माला तथैवांगुलिपर्वभिः॥ शतं स्याच्छंखमणिभिः प्रवालै
स्तत्सहस्रकं॥ स्फटिकैर्दशसाहस्रं मौक्तिकैर्लक्षमुच्यते॥ पद्माक्षैर्दशलक्षं तु सौवर्णैः कोटिरुच्यते॥ कुशग्रं
थ्या वरुद्राक्षैरनंतफलमुच्यत इति॥ प्रजापतिः॥ अष्टोत्तरशतं कुर्याच्चतुःपंचाशिकां तथा॥ सप्तविंशतिकां वापि
गो॰ ततो नैवाधिका मता॥ कौमिलः॥ आपात्विश्यनुवाकस्य वामदेव ऋषिः स्मृतः॥ आनुष्टुभं भवेच्छंदो वाग्देवी देव
ता स्मृता॥ आवाहने तु गायत्र्या विनियोगः प्रकीर्तितः॥ व्यासोपि॥ आवाहयेत्तु गायत्रीं सर्वपापप्रणाशिनीं॥ ३१

आगच्छ वरदे देवि जप्ये मे सन्निधौ भव॥ गायंतं त्रायसे यस्माद्गायत्री तेन सोच्यस इति॥ सप्तव्याहृतीनां देवता
द्याहाहृपराशराः॥ अग्निर्वायुस्तथा सूर्यो बृहस्पत्यापएव च॥ इंद्रश्च विश्वेदेवाश्च देवताः समुदीरिताः॥ गायत्र्युष्णि
गनुष्टुप् च बृहती पंक्तिरेव च॥ त्रिष्टुप् च जगती चैव छंदांस्येतान्यनुक्रमात्॥ भरद्वाजः कश्यपश्च गौतमोत्रिस्तथैव च
॥विश्वामित्रो जमदग्निर्वसिष्ठ ऋषयः क्रमादिति॥ ॥अथोपस्थानं॥ गृह्यपरिशिष्टे॥ जातवेदसे सुनवाम सो
मं तच्छंयोरावृणीमहे नमो ब्रह्मणे नमोस्त्वग्नये इत्युपस्थाय प्रदक्षिणं दिशः साधिपान्नत्वाथ संध्यायै सावित्र्यै
गायत्र्यै सरस्वत्यै सर्वाभ्यो देवताभ्यश्च नमस्कृत्य ततः उत्तमे शिखरे देवी भूम्यां पर्वतमूर्द्धनि॥ ब्राह्मणैरभ्यनुज्ञा
नागच्छ देवि यथासुखमिति संध्यां विसर्ज्य भद्रं नो अपि वातय मन इत्यनेन शांतिं वाचयित्वार्यं प्रदक्षिणं परिक्राम
न्नसा सत्यलोकात्पातालादालोकालोकपर्वतात्॥ ये संति ब्राह्मणा देवास्तेभ्यो नित्यं नमो नम इति नमस्कृत्य भूमि
मुपसंगृह्य गुरून्वृद्धांश्चोपसंगृह्णीयात्॥ एवं सायमिति॥ माध्याह्नसंध्यायां विशेषस्त्वत्रैव॥ उद्बाहूरुदन्मुखे

आ॰ म॰ ३८ उदु त्यं जातवेदसं चित्रं देवानामिति सूक्ताभ्यामादित्यमुपस्थाय जपमासीनो यथेष्टकालं कुर्यादित्येष संध्या
विधिर्व्याख्यात इति। देवाद्यादि माध्याह्निकं दिवानक्तं तंतत्र विशेषः स्मर्यते रात्रौ प्रहरपर्यंतं दिवाह्नस्त्यानि
कारयेत्। अवगाहं ब्रह्मयज्ञं सौरजप्यं च वर्जयेदिति। सायंप्रातःकालयोरुपस्थाने विशेषमाह भगवान्नन
मो ब्रह्मण इत्येतां त्रिरुक्त्वाथ दिशो नमेत्। इमं मे वरुण तत्त्वेति सायंकाले विशेषतः। मित्रस्य चर्षणीधृताभ्यां
प्रातःकाले विशेषत इति। आश्वलायनस्मृतौ तु। अग्निश्चेत्यस्य निर्मंत्रै र्गायत्रैरेव वदूचत्स्यक्तं। मैत्रे मित्रे दे
वत्ये मित्रस्य चर्षणीधृत इत्यादिभिरित्यर्थः। माधवीये नारायणः। वारुणीभिरथादित्यमुपस्थाय प्रदक्षि
णमिति। भरद्वाजः। सूतके मृतके वापि प्राणायाममंत्रकं तथा मार्जनमंत्रांस्तु मनसोच्चार्य मार्जयेत्। गाय
त्रीं सम्यगुच्चार्य सूर्यायार्घ्यं निवेदयेत्। मार्जनं तु न वा कार्यं उपस्थानं न चैव हीति। गायत्र्यपि दशवारं जप्या।
आपन्नश्चाशुचिः काले तिष्ठन्नपि जपेद्दशेत्याश्वलायनोक्तेः। आपन्नः आपद्ग्रस्तः। अशुचिराशौचवान्। ३८

अंगांतरेषु सामर्थ्याभावेपि अर्घ्यप्रक्षेप आवश्यकः। जलाभावे महामार्गे बंधने त्वशुचावपि। उभयोः संध्ययोः का
ले रजसा चार्घ्यमुत्सृजेदिति अत्रिस्मृतेः। अशुचौ आशौचे इत्यर्थः। अग्निश्चेत्यस्यार्थः। मा इति मंत्र मन्युः क्रो
धस्तदभिमानिनी देवते त्यौपनिषदाः। मन्युपतयो जितक्रोधाः अग्न्यादयो मा रक्षंतामित्यन्वयः। शिश्ना
शिश्नेन। सुपां सुलुगिति डादेशः। इदं पापं तत्कारणं चाहं कारं अमृतयोनौ मोक्षहेतौ अग्न्याख्ये ज्योतिषि
परब्रह्मणि जुहोमि तदर्थमिदं तोयं स्वाहा मदीये जाठराग्नौ हुतमस्तु। एवं सूर्यश्चेत्यपि। आपः पुनंत्वित्या प॰
दि। आपः। पृथिवीं मम शरीरं। यच्छरीरं सा पृथिवीत्यारण्यकात्। सा च मम आत्मानं पुनातु। किंच। ब्रह्मणो वे
दस्य पतिः। परमात्मा पुनंतु। पुनातु। व्यत्ययेन बहुवचनं। ब्रह्म वेदः। पूता। पूतमित्यर्थः। सुपां सुलुगिति पूर्व
सवर्णः। सर्वपरिहृत्येति शेषः। मां पुनंतु। स्वाहा जाठराग्नौ हुतमस्तु। प्रणवं सप्त व्याहृती गायत्रीं तच्छिरसां
संक्षेपतोर्थः कथ्यते। ॐ ब्रह्म तन्नवं त्यस्मा हूतानीति भूः। भावयति स्थापयति विश्वमिति भुवः। गुणानाव स्थांद

आ॰म॰ ३९ सः। सुप्तुइत्युक्तेति प्राक्तवंतेतदितिस्वः। महः पूज्यं। जनजने। तपस्त्वालोचने। सत्यं कालत्रयाबाध्यं सवितुः
देवस्य सूर्यस्य वरेण्यं भजनीयं भर्गः संसारभर्जनात् ज्योतीरूपं धीमहि ध्यायेम। यः सविता नो धियः प्रचोद
यात् प्रेरयेदिति लेट्। आपः व्यापकं। ज्योतिश्चिद्रूपं। रसः सुखं। अमृतं मोक्षः ईदृग्ब्रह्मेति। ॐ अंगीकुर्वे
चिंतयामीति यावत्। अथ काम्यजपाः। वसिष्ठः। नमुष्टुहीष्ट्वं वापि सप्तोज्ञानादि पंचकं। पंचाक्षरं महा
मंत्रं जपेदनुदिनं सुधीः। आयुरारोग्यमैश्वर्यं संततिं पूर्णजीवनं। संपत्समृद्धिसौख्यं च लभते शिवशा
सनादिति। आचार्यः। वैष्णवैर्वारुणैः सौरैः पावमानीभिरेव च। क्षपयेदाशु पापानि कामांश्च विविधान्न
लभेत्। रौद्रैर्विंशतिर्घोरान् ब्रह्महत्यादिकानपि। क्षपयेत्पौरुषेण पित्र्यामांश्च पर्न्तिदुर्ध्वनान्। शतरुद्र
एणजपेनवास्य वामीक्रयेनवा। मोक्षमृच्छत्यसंदेहं किमन्यदधिकं ततः इति। ऋग्विधाने। वित्तीर्णुक्तं ज
पन्सूक्तं विष्णुरेवनविष्यति। स्नानकालेजप्यमाह व्यासः। द्रुपदानाम गायत्री वेदे वाजसनेयके। स ३९

आ॰म॰ ४० यं त्रक्ष्यते यत्त्वाश्वलायनः। संगवांतः प्रातः प्रदोषांतः सायमिति। तद्गौणकालपरं। यदपि बौधायनः। आसा
यं कर्मणः प्रातराप्रातः सायं कर्मणः। आकुतिर्नातिपद्येत पार्वणं पार्वणं नरादिति। तद्गौणनरपरं॥ पार्वणं
स्थालीपाको दर्शेष्टिः पौर्णमासेष्टिश्च। पक्षहोममाह मरीचिः। शारीरायक्नेवेघत्तनयाद्वार्तिः प्रजायते। तथान्या
स्वपि चापत्सु पक्षहोमो विधीयते। कात्यायनः। विहायाग्निं सभार्यश्चेत्सीमामुल्लंघ्य गच्छति। होमकालात्ययेतस्य
पुनराधानमिष्यते। होमश्च स्वगृह्योक्तविधिना बोध्यः। भरद्वाजः। होमं वैतनिकं त्यक्त्वा स्मार्तं कुर्याद्विचक्षणः। स्मृ
तीनां वेदमूलत्वात्स्मार्तं केचित्पुरा विदुरिति। याज्ञवल्क्यः। कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही। दायकाला
हृते चापि श्रौतं वैतानिकाग्निषु। वैतानिकोः गार्हपत्यादयः। स्मार्तपदं गृह्योक्तकर्मपरं। वैवाहिके तौ कुर्वीत
गार्ह्ये कर्म यथाविधि। पंचयज्ञविधानं च पक्तिं चान्वाहिकीं गृहीति। मनूक्तेः। अन्वाहिकीं प्रात्यहिकीं। अन्यत्तु
स्मार्तं यदह मरवमहारुद्रहोममूलशांत्यादि लौकिकाग्नौ। अत एव विज्ञानेश्वरेण विनायकशांतौ लौकिकाग्निरुक्तः। ४०

अंतर्जलेजपन्स्वा ब्रह्महत्यां व्यपोहतीति। सा च पूर्वमघमर्षणप्रसंगेनालेखि। सुमंतुः। हंसःशुचिषदि
त्येतामृचवरं मंतर्जलेजपन्। सर्वस्मात्पापात्प्रमुच्यते पिवा वारुतीरंतर्जलेजपन्सर्वस्मात्पापात्प्रमुच्यते
इति गौतमः॥ अपि वा गायत्रीं पच्छोर्द्धर्चशः समस्तामपि त्रिरंतर्जलेजपन्सर्वस्मात्पापात्प्रमुच्यते पिवाप्र
णवं त्रिरंतर्जलेजपन्सर्वस्मात्पापात्प्रमुच्यत इति॥ अथ होमविधिः॥ ॥दक्षः। संध्याकर्मावसाने तु स्व
यं होमो विधीयते। इति। अशक्तौ स एवाह। ऋत्विक्पुत्रो गुरुर्भ्राता भागिनेयोथ विट्पतिः। एतैरपि कृतं यस्या
त्तद्धुतं स्वयमेव हि। इति। विट्पतिर्जामाता। आश्वलायनः। स्वयं पत्न्यपि वा पुत्रः कुमार्यन्तेवासी वा। कात्या
यनः। असमक्षं तु दंपत्योर्होतव्यं नर्त्विगादिना। द्वयोरप्यसमक्षं तु भवेद्धुतमनर्थकं। उभयोः संनि
धौ मुख्यं अन्यतरसंनिधावनुकल्पः। प्रातर्होमकालमाह मनुः। उदितेनुदिते चैव समयाध्युषिते तथे
ति। सायंकालमाह कात्यायनः। यावत्सम्यङ् न भाव्यंते नभस्यृक्षाणि सर्वतः। लोहितत्वं तु नापैति तावत्सा

यद्दशांतो तदीये तदीयस्मान्नाग्निलिखने मूले चिंत्यं। विष्णुः॥ बहुच्छ्रेष्ठं बोधने वाग्नौ सुसमिद्धे कृता
शने। विधूमे लेलिहाने च होतव्यं कर्मसिद्धये। योनर्चिषु जुहोत्यग्नौ व्यंगारे चैव मानवः। मंदाग्निरामया
वी च दरिद्रश्चापि जायत इति॥ इति होमप्रकरणं॥ ॥अथ नित्यदानं॥ महाभारते॥ एकस्मिन्नप्यतिक्रां
र्जिते ४ ते दिने दानविवर्जिते। दस्युभिर्मुषितस्येव युक्तमाक्रंदितुं भृशमिति। तस्माद्विभवानुसारेण पूगी
त्य ५ फलादिकमपि प्रदेयमिति नृसिंहः॥ अथ मंगलदर्शनं। नारदः॥ लोकेस्मिन्मंगलान्यष्टौ ब्राह्मणो गौ
र्हुताशनः। हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः॥ मनुः॥ अग्निचित्रकपिलासत्रीराजानिक्षुमहोदधिः।
दृष्ट्वा मानः पुनेत्येते तस्मात्पश्येत्सदा बुध इति। इत्यष्टविधानकस्याक्रया धनभाग्यत्वं। दक्षः॥ द्वितीये च
तथा भागे वेदाभ्यासो विधीयत इति। चतुर्विंशतिमते वेदस्वीकरणं पूर्वं विचारोभ्यसनं जपः। तद्दानं चैव
शिष्येभ्यो वेदाभ्यासो हि पंचधेति। कूर्मे॥ जपेदध्यापयेच्छिष्यान्धारयेद्वा विचारयेत्। अवेक्षेत च शास्त्राणि

आ॰म॰ धर्मादीनि द्विजोत्तम इति॥ दक्षः॥ समित्पुष्पकुशादीनां स कालः समुदाहृत इति॥ ॥अथ तृतीयभागकृत्यं
४१ दक्षः॥ तृतीये च तथा भागे पोष्यवर्गार्थसाधनमिति। पोष्यवर्गस एवाह॥ माता पिता गुरुर्भार्या प्रजा दीनः स
माश्रितः। अभ्यागतोतिथिश्चाग्निः पोष्यवर्ग उदाहृतः॥ पोष्यवर्गार्थसिध्यर्थं धनमिच्छेत्तु बुद्धिमान्। आत्मने प द
मार्थं। याज्ञवल्क्यः॥ कुसूलकुंभीधान्यो वा त्र्याहिकोऽश्वस्तनोपि वा। जीवेद्वापि शिलोंछेन श्रेयानेषां परः पर इति
। स्वकुटुंबभोजनद्वादशदिनपर्याप्तधान्यस्याधारपात्रं कुसूलं। षडहपर्याप्तधान्याधारः कुंभी। वल्लरीसा
मुपादानं शिलं। कणोपादानमुंछमिति॥ याज्ञवल्क्यः। न राज्ञः प्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्तिन इति। ना
रदः॥ शुचीनामशुचीनां च सन्निपातो यथांभसि। समुद्रे समतां याति तथा राज्ञो धनागमः॥ यथाग्नौ
संस्थितं सर्वं शुद्धिमायाति कांचनं। एवं भवति यद्राज्ञः सर्वं शुचितां याति राजनीति एतद्वाक्यं राजप्रतिग्र
हपरं। याज्ञवल्क्यः॥ कुशाः शाकं पयो मत्स्याः पुष्पं गंधा दधि क्षितिः। मांसं शय्यासनं धानाः प्रत्याख्येयं ४१

न वारि च॥ अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्मणः। अन्यत्र कुलटाषंढपतितेभ्यस्तथा द्विषः॥ ॥
अथ चतुर्थभागकृत्यं दक्षः॥ चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत्। तिलपुष्पकुशादींश्च स्नायाच्चाकृत्रि मिर
मे जले। दक्षपरिशिष्टे॥ अथ मध्यंदिने तीर्थमेत्यैत्य पंकम्याथ वरुणप्रार्थनादितर्पणांतेनोक्तेन विधिना
स्नायात्। नास्मिन् ब्रह्मयज्ञतर्पणे वस्त्रं निःपीडयेत्॥ अपुत्रा[illegible]ते तर्या इति शंखः। प्रातःसंध्यां सनक्षत्रां दयो
मध्यमां स्नानकर्मणि। सादित्यां पश्चिमां संध्यामुपासीत यथाविधीति। स्नानकर्मणि कृते सतीति शेष
इति स्मृतिचंद्रिकायां। माध्याह्निकसंध्याप्रकारश्च पूर्वमेवोक्तः॥ अथ पंचमहायज्ञाः॥ याज्ञवल्क्यः॥ ब
लिकर्मस्वधाहोमःस्वाध्यायातिथिसत्क्रियाः। भूतपितृमरब्रह्ममनुष्याणां महामखाः। आश्वलायनगृ
ह्ये॥ अथातः पंच महायज्ञा देवयज्ञो ब्रह्मयज्ञो भूतयज्ञः पितृयज्ञो मनुष्ययज्ञ इति॥ तद्यदग्नौ जुहोति
स देवयज्ञो यत्स्वाध्यायमधीते स ब्रह्मयज्ञो यद्बलिं करोति स भूतयज्ञो यत्पितृभ्यो ददाति स पितृयज्ञो

आ॰ म॰ ४२ यन्मनुष्येभ्यः स मनुष्ययज्ञ इति तानेतान्यज्ञानहरहः कुर्वीतेति वीप्सयैते नित्याः। व्यासः॥ वैश्वदेवं
प्रकुर्वीत स्वशाखाविहितं ततः। संस्कृतान्नैश्च विविधैर्हविष्यव्यञ्जनान्वितैरिति वैश्वदेवपदं देवभूत
पितृयज्ञानां नाम। व्यंजनमपि हविष्यमेव घृतादि न तैलादि। तथा च स एव। जुहुयात्सर्पिषाभ्यक्तं तैलक्षा
रविवर्जितमिति। कौर्मे। शालाग्नौ लौकिके वापि जले भूम्यामथापि वा। वैश्वदेवस्तु कर्त्तव्यो देवयज्ञः
स वै स्मृत इति। लौकिकशालाग्न्योः पाकतो व्यवस्थामाहांगिराः। यस्मिन्नग्नौ पचेदन्नं तस्मिन्होमो विधी
यत इति। अत्र वैश्वदेवशब्दो देवभूतपितृयज्ञानां समुदाये प्रयुज्यते। तत्र होमो देवयज्ञः। बलिर्भूतयज्ञः
स्वधाकारः पितृयज्ञः एवं च तेनैव पितृयज्ञसिद्धिर्नित्यश्राद्धं नावश्यकं। अत एव देवलो नित्यश्राद्धमप्रक
म्य यथाशक्ति तत्कालानाह। एतेन विधिना श्राद्धं कुर्यात्संवत्सरं सकृत्। त्रिश्चतुर्वा यथाश्राद्धं मासे मा
से दिने दिन इति। एवं दर्शश्राद्धमप्यशक्तौ संवत्सरे सकृदेवेत्याह। आश्वलायनः। मासिकं पार्वणं प्रोक्तं ४२

मशक्तानां तु वार्षिकमिति॥ मासिकं प्रतिमासं कर्त्तव्यं। पार्वणं दर्शश्राद्धं। वैश्वदेवस्यात्मनोन्नस्य वसं
स्कारार्थ॥ तानेतान्यज्ञानहरहः कुर्वीतेति वचनादथ सायं प्रातः सिद्धस्य हविष्यस्य जुहुयादिति वच
नाच्च॥ एकस्य तु नयत्वे संयोगपृथक्त्वादिति न्यायात्॥ न च प्रतिप्रधानं गुणावृत्तिरिति न्यायात्प्रतिपाकं
तदावृत्तिः स्यात्संध्यावंदनादिवद्विभक्तानां पृथगनुष्ठानं च स्यादिति वाच्यं। यद्येकस्मिन्काले पुनः पु
नरन्नं पच्येत सकृद्देवतद्बलिं तत्र कुर्वीत। अथ यद्येकस्मिन्काले बहुधान्नं पच्येत गृहपतिमहानसादेवैत
त्र बलिं तत्र कुर्वीतेति गोभिलोक्तेः। एतच्च सायं प्रातः कार्यं। अथ सायं प्रातः सिद्धस्य हविष्यस्य जुहुयादि
त्याश्वलायनोक्तेः॥ अन्यत्रासंभवे प्रातरेव द्विरावृत्त्या सकृद्वा कार्यं। यथोक्तं गोभिलेनैव। प्रातरेव द्विरावृत्त्या
कुर्याद्वा सकृदेव तत्। द्विजः सायं वा यदि भुंजीयात्तत्कालाज्ञानतः स्वयमिति। मनुष्ययज्ञस्त्वतिथिपूजा। एत
त्प्रकरणे प्रायश्चित्तमाह व्यासः॥ होमात्तु दानरहितं न भोक्तव्यं कथंचन। अविभक्तेषु संसृष्टेष्वेकेनैव कृतं

आ॰म॰ ४३ त्वा। पयोमूलफलैर्वापि पंचयज्ञान् समापयेत्। अन्नत्वा पंचयज्ञांस्तु भुक्त्वा चांद्रायणं चरेदिति। आश्व
लायनः॥ वसतामेकपाकेन विभक्तानामपि ध्रुवं॥ एकस्त्वत्र रोयज्ञान् कुर्याद्वाग्यज्ञपूर्वकान्। वाग्य
ज्ञो ब्रह्मयज्ञः। अविभक्ता विभक्ताश्च पृथक्पाका द्विजातयः। कुर्युः पृथक्पृथक् यज्ञान् भोजनार्थं दि
ने दिने। पृथगप्येकपाकानां ब्रह्मयज्ञो द्विजन्मनां। भूतकाद्यैस्त्वनुष्ठात्मानं कुर्यान्निवकारयेत् इति॥
अत्राविभक्तानां पाकभेदे प्रथग्वैश्वदेवानुष्ठानं नाद्रियंते। शिष्टाः॥ पूर्वोक्तसर्वदित गोभिलवचोवि
रोधे कतिपयाश्वलायनवचसो वाधात्। विकल्प इति केचित्। यत्तु हरदत्तः। सूतकमध्येपि ब्रह्मयज्ञ
निषिद्धाश्चत्वारो नत्याज्याः। तानेतान् हरहः कुर्वीतेति सूत्रात्। एतस्य हि सूतके कर्मणां त्यागः संध्यादीनां विधा
यत इत्यादिना बाधितानां प्रतिप्रसवेनैव सार्थक्यं। ब्रह्मयज्ञस्तु न भवति तस्य स्वाध्यायध्यायो यदा त्वाशुचि
र्यद्देश इति सूत्रात्। तन्न। पंचयज्ञविधाने त्वनुकुर्यान्मृतिजन्मनोरिति देवलोक्तेः। अहरहः कुर्वी ४३
तेति तु संध्यावंदनादिवन्नित्यतामात्रबोधकं। अत एव स्मृत्यंतरे। आपद्यपि दातव्यं आकाष्ठमपि जुहुया
दावाकमपि ब्रह्मयज्ञं कुर्यादिति। चतुर्विंशतौ। अन्नाभावे येन केनापि प्रवसन्नादिनि द्विजः। पयोदधिघृ
तैर्वापि वैश्वदेवं स्रुवेण तु। हस्तेनान्नादिनिः कुर्याद्द्भिरंजलिना जले। परिशिष्टे। अन्नाभावे तु हस्तेन हं
गुष्ठाग्रेण पीडितं। संहतांगुलिपाणिस्तु वाग्यतो जुहुयाद्धविरिति। गृह्यपरिशिष्टेपि। शाकं वा यदि वा प
त्रमूलं वा यदि वा फलं। संकल्पयेद्यदाहारस्तेनैव जुहुयादपि। स्मृत्यंतरेपि। कोद्रवं चणकं माषं मसूरं च कु
लत्थकं। क्षारं लवणं सर्वं वैश्वदेवे विवर्जयेत्॥ हविष्याभावे त्वारादिभिरपि अग्नेरीशान्यां दीमुले भस्म
नि होतव्यमित्यापस्तंबेन॥ नक्षारलवणहोमो विद्यते तथा तथा परान्नसंसृष्टस्याहविष्यस्य होमउ
दीचीनमुखं जस्माप्सु जुहुयात् हुतमकृतं चाग्नौ भवतीति। वृद्धवसिष्ठः॥ अनग्निकस्तु यो विप्रः सो
न्नं व्याहृतिभिः स्वयं। कृत्वा शाकलमंत्रैश्च शिष्टं काकबलिं हरेदिति। बोधायनः। प्रवासं गच्छतो यस्य गृ

ह्येकन्नानिविद्यते। पंचानां महतामेषां सयज्ञैः सह गच्छतीति। आह्नात्रिः। पुत्रो भ्राताथवा ऋत्विक्शिष्य
श्वशुरमातुलाः। पत्नी श्रोत्रिययाज्याश्च दृष्टाः स्युर्बलिकर्मणि॥ एते च प्रवसतः प्रतिनिधयः। ब्रह्मयज्ञस्य
पाकप्राप्तां देवयज्ञोत्तरतां बाधते। आश्वलायनः॥ स्वगृह्यविधिना हुत्वा ब्रह्मयज्ञं पुरा द्विजः। स्वाध्यायतर्प
णं स्यांच गृह्यमेत्याचरेत्परान्। यत्तु बृहस्पतिः॥ सवार्वाक्तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः। वैश्वदेवावसाने
वा नान्यत्रेति निमित्तत इति तदाश्वलायनान्यपरं। आश्वलायनानां तर्पणस्योत्तरांगत्वेनैव तत्सूत्राद्याप्तेरर्वा
क्तर्पणादित्यस्य तदितरान्प्रत्येव सार्थक्यात्। तस्माद्ब्रह्मचर्यात्पश्चाद्वेति वैश्वदेवावसाने चेत्येतदपि तान्प्रत्येव। का
रिकायां। दर्भान्विकृन्न्यस्य चौदेशे प्रागग्रानास्तरणं तथा। दर्भेषूपविशेत्कर्मण्येवं प्राङ्मुख एव सन्। कृत्वोपस्थं द
क्षे सव्येऽन्तराने प्रागिदिगंगुलौ। पवित्रे स्थापयेदुक्ते प्रागग्रे दक्षिणे न तु। अन्यं वं प्रागंगुलं तेन संदध्याद्दक्षिणं कर
मिति। तत्रैव॥ सूक्ताद्यन्यतमं पूर्वमभिशंसं तिशक्तितः। ॐ पूर्वा व्याहृतीस्तिस्रः समस्ताश्च सकृद्वदेत्॥ यच्च ४४

त्वर्द्धर्चशः सर्वां सावित्रीं त्रिर्वदेदथेति। शौनकः॥ ततो यावत्प्रतिज्ञातमध्यायं सूक्तमेव वा। ऋचं वाप्यं ततो
वश्यमधीयीत स्वशक्तित इति। ऋग्विधाने। आग्नेयं सूक्तमाद्यं तु पुण्यं ब्रह्मर्षिसंमतं। रायस्पोषकरं धन्यं ज
प्त्वि प्रोऽर्थमाप्नुयात्॥ ऋचं सर्वामिमां जप्त्वा सपूतो नियतः शुचिः। संहिताफलमाप्नोति ऋग्वेदस्य न संशय
इति। तथा। अग्निमीळे जपेत्सूक्तं पापघ्नं श्रीकरं परं। पारायणफलं तस्य वेदानां स्यात्सहस्रशः। इति। आश्वला
यनगृह्ये। सयावन्मन्येत तावदधीत्यैतया परिदधाति। नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओष
धीभ्यः। नमो वाचे नमो वाचस्पतये नमो विष्णवे महते करोमीति एनां त्रिः [illegible]। नमो ब्रह्मण इति परिधानीयो
त्रिरन्वाहेति विकृतेः। उपवेशनाशक्ता वाश्वलायनगृह्येऽस्य यद्दिति तिष्ठन् गच्छन्नासीनः शयानो वा यं यं
क्रतुमधीते तेन तेनास्य क्रतुनेष्टं भवतीति विज्ञायते तस्य द्वावनध्यायौ यदात्मा अशुचिर्यद्देश
इति। द्वावित्यनध्यायांतरपरिसंख्यार्थं। केषुचिन्निमित्तेऽनध्यायेषु विशेषमाहापस्तंबः॥ अथ यदि

आ॰म॰ वातोवायाः सनयेद्यावि द्योततेवास्फूर्जेद्वैकांचर्चमेकंवायजुरेकंवासामाभिव्याहरेत् भूर्भुवःस्वः सत्यं
४५ तपः श्रद्धायांजुहोतिमी ॥ अथतर्पणं ॥ आश्वलायनगृह्ये ॥ देवतास्तर्पयति प्रजापतिर्ब्रह्मावेदादेवाऋषयः न२
सर्वाणिछंदांस्योंकारोवषट्कारोव्याहृतयः सावित्रीयज्ञाद्यावापृथिवीअंतरिक्षमहोरात्राणिसांख्याः
सिद्धाः समुद्रानद्योगिरयः क्षेत्रौषधिवनस्पतिगंधर्वाप्सरसोनागावयांसिगावः साध्याविप्रायक्षारक्षां
सिभूतान्येवमंतान्यथऋषयः शतर्चिनोमाध्यमागृत्समदोविश्वामित्रोवामदेवोत्रिर्भरद्वाजोवसिष्ठः प्रगा
थाः पावमान्यः क्षुद्रसूक्तामहासूक्ताइतिप्राचीनावीतीसुमंतुजैमिनिवैशंपायनपैलसूत्रभाष्यभारतमहा
भारतधर्माचार्याजानंतिवाहविगार्ग्यगौतमशाकल्यबाभ्रव्यमांडूकेयागर्गीवाचक्नवीवडवाप्रातीथेयी
सुलभामैत्रेयीकहोलंकौषीतकंपैंग्यंमहापैंग्यंसुयज्ञंसांख्यायनंऐतरेयंमहैतरेयंबाष्कलंशाकलंशाकपौर
णिंसुजातवक्त्रंऔदवाहिंमहौदवाहिंसौजामिंशौनकमाश्वलायनंयेचान्येआचार्यास्तेसर्वेतृप्यंत्विति ४५

पुरुषंपितृंस्तर्पयीवेति ॥ अत्रप्रजापत्याद्याएवमंतानीत्यंताएकोनत्रिंशोन्मंत्राः ॥ २९ ॥ अथऋषयइतितुन
मंत्राः ॥ शतर्चिनइत्याद्यामहासूक्तांताद्वादश ॥ १२ ॥ सुमंतुवित्याद्यायेचान्यइत्यंताद्वाविंशति ॥ २२ ॥ तेवतृप्य
न्तुतृप्यतांतृप्यंत्विति यथायोग्यमध्याहृत्यप्रयोज्याः ॥ एवमंतानीतिभिन्नोमंत्रइतिनारायणवृत्तौ ॥ महासू
क्तास्तृप्यंत्वित्यस्यान्यंतरपूर्वोक्ताः सनकादयः सप्ततर्प्याः ॥ द्यावापृथिवीतृप्येतामिति सोऽत्रात्मनेपदंप्रयुंजे
तेबहुवा ॥ तत्र धातोः परस्मैपदित्वात् ॥ लिङित्तुपरस्मैपदंभवेत् ॥ तत्रतुकारिका ॥ शौनकाद्युक्तस्तृप्यतुतृप्यंता
मितिलोट्प्रयोगविरोधः ॥ तेनद्यावापृथिवीतृप्यतामित्येवप्रयोज्यमितिभट्टोजीदीक्षिताः ॥ साचकारिका ॥
अपांसमीपमागत्यतर्पयेदथदेवताः ॥ एवंमंतानितृप्यंत्वित्यंतैश्चशतिमंत्रकं ॥ सिंचेत्प्रजापतिस्तृप्यत्वित्यपो
देवतीर्थतः ॥ धातुस्तृपिर्यथालिंगंमंत्रांतेषुप्रयुज्यतइति ॥ शौनकोपि ॥ मंत्रैः प्रजापतिस्तृप्यत्वित्यारभ्ययथो
दितैः ॥ एवमंतानितृप्यंत्वित्येवमंत्रैर्यथाक्रममिति ॥ कहोलादिष्वाश्वलायनांतेषुषोडशसुद्वितीयांतेषुतर्पया

आ॰म॰ मीतिशेषोयोज्यःयोग्यत्वात्॥नन्वत्रतर्पणंनित्यमुक्तंप्रयोगपारिजाते।सत्यंनरोदेवतास्तुमुनींश्चैवपि
४१ त्रयोहिनतर्पयेत्।देवादीनामृणीभूत्वानरकंप्रतिपद्यते।मदनपारिजातेसंग्रहे।अन्वारब्धेनसव्येनपा
णिनादक्षिणेनतु।सव्योत्तराभ्यांपाणिभ्यां।अथवातर्पणंचरेत्।सव्यान्वारब्धेनैकेनैवदक्षिणेनपाणि
नेतितुआश्वलायनपरं।पाणिभ्यामितित्वन्यास्वितीतिव्यवस्थेतिकेचित्।व्यवस्थामूलंतुचिंत्यंकारिका॥
प्राचीनावीत्यथेदानींतर्पयेत्पितृतीर्थतइति।व्यासः॥एकैकमंजलिंदेवाद्वौद्वौतुसनकादयः।अर्हंति
पितरस्त्रीस्त्रीन्स्त्रियश्चैकैकमंजलिमिति।योगयाज्ञवल्क्यः।सनकश्चसनंदनस्तृतीयश्चसनातनः।कपिलश्चा
सुरिश्चैववोढुःपंचशिखस्तथा।एतेब्रह्मसुतास्तर्प्यामनुष्याःपरिकीर्तिताइति।एतदाश्वलायनान्यपरंतरते
चांशतात्रिंनोद्वादशैवतस्मात्त्रोक्तत्वादितिकेचित्।सनकादयोपितेषामदृष्टार्थत्वादितितुयुक्तं।कासुचित्स्मृ
षुविशेषमाह॥सांख्यायनः॥मातृमुख्यास्तथास्त्रियस्तासांत्रींस्त्रीन्जलांजलीन्।इति।सापत्नाचार्यपत्नीनी ४५

द्वौद्वौदद्याज्जलांजलीन्।इतिच।अत्रविशेषमाहहारीतः।वसित्वावसनंशुष्कंस्थलेविस्तीर्णबर्हिषि।विधि
ज्ञस्तर्पणंकुर्यान्नपात्रेषुकदाचन।पात्राद्वाजलमादायशुभेपात्रांतरेक्षिपेत्।जलपूर्णेथवागर्तेनस्थलेतु
विबर्हिषीति।पितामहः।हैमरूप्यमयंपात्रंताम्रंकांस्यसमुद्भवं।पितॄणांतर्पणेपात्रंमृन्मयंतुपरित्यजेत्॥
शंखः॥उदकेनोदकंदद्यात्पितृभ्यश्चकदाचन।उत्तीर्यवस्त्रेचोदेशेकुर्यादुदकतर्पणमिति।अग्निपुराणे
।प्रागग्रेषुसुरास्तर्प्यामनुष्याश्चैवमध्यतः।पितरोदक्षिणाग्रेषुएकद्वित्रिमितांजलीमिति।मरीचिः।सौवर्णेनच
पात्रेणताम्ररौप्यमयेनवा।औदुंबरेणखड्गेनपितॄणांदत्तमक्षयमिति।विष्णुः॥यत्राशुचिस्थलंवास्यादुदके
देवताःपितॄन्।तर्पयेत्तुयथाकामंअप्सुसर्वंप्रतिष्ठितमिति।योगयाज्ञवल्क्यः॥यद्यद्धृतंनिषिंचेत्तु तिकेदेव
ताःपितॄन्।तर्पयेत्तुयथाकामंअप्सुसर्वंप्रतिष्ठितमिति॥योगयाज्ञवल्क्यः॥यद्यद्धृतंनिषिंचेत्तुतिलान्संमि
श्रयेज्जले।अतोन्यथातुसव्येनतिलाग्राह्याविचक्षणैः॥अन्यथेति।अनुद्धृतेनतर्पणइत्यर्थः।गोभिलः।रो

[redacted]ा०म० मसंस्थान्तिलान्दत्वायस्तु तर्पयते पितॄन्॥ पितरस्तर्पितास्तेन रुधिरेण मलेन चेति। स्मृतिभास्करे॥ कुशाग्रैस्तर्पयेद्दे
४ ३९ वान्मनुष्यांश्च कुशमध्यतः॥ द्विगुणीकृत्यमूलाग्रैः पितॄन्संतर्पयेद्द्विज इति। योगयाज्ञवल्क्यः॥ कव्यवालोनलः सोमो यम
श्चैवार्यमा तथा। अग्निष्वात्ताः सोमपाश्च तथा बर्हिषदोपि च॥ यदि स्याज्जीवपितृक एतान्विंशान्ततः पितॄनिति। अत्र कव्य
वालं तर्पयामीति। कव्यवालस्तृप्यतु तृप्यतामिति वा प्रयोगः। एवमनलादिषु। अथ पित्रादितर्पणे विशेषमाह बोपदे
वः॥ तातांबात्रितयं सपत्नजननी मातामहादित्रयं सस्त्रिस्त्रीतनयादितातजननीस्वभ्रातरः सस्त्रियः। तातांबात्मभगि
न्यपत्यधवयुक् जाया पिता सद्गुरुः शिष्याप्ताः पितरो महालयविधौ तीर्थे तथा तर्पण इति॥ तातांबात्रितयं पित्रादित्र
यं मात्रादित्रयं। मातामहादित्रयं सस्त्रीति सपत्नीकं तर्पयामीति प्रयोज्यं। अपत्यधवयुगिति। सापत्यां सधवां तर्पया
मीत्यर्थः। क्रमांतरं च षट्कर्मे स्मृत्यंतरे। आदौ पिता ततो माता सपत्नजननी तथा। मातामहाः सपत्नीकाः सपत्नीतद
नंतरं। सुतभ्रातृपितृव्याश्च मातुलाश्च सभार्यकाः। दुहिता भगिनी चैव दौहित्रो भागिनेयकः। पितृष्वसा मातृष्वसा ४०

श्वसुरो गुरुरर्थिन इति॥ प्रयोगपारिजाते संग्रहे। पितृमातामहाः पितृव्यो भ्रातरः तेसुतः। पितृष्वसामातु
लाश्च तद्भगिन्यः स्वजामयः॥ भार्या भगिन्यो दुहिता श्वशुरा भावुकाः स्नुषाः। शाकलो गुराचार्यः स्वामी मित्रं
यथाक्रममिति। स्वजामयः स्वभगिन्यः। भावुका भगिनीपतयः। एतेषां च क्रमाणामैच्छिको विकल्पः। तत्र
विशेषमाह यमः॥ संबंधनामगोत्रेण स्वधांतेन नमोंततः। वस्वादिरूपं निर्दिश्य तर्पयेत्पितृपूर्वकमिति
वसिष्ठः। संबधमनुकीर्त्यैव नामगोत्रमनंतरं। वस्वादिरूपं संकीर्त्य स्वधाकारेणामुकगोत्रं वसुरूपं स्व
धा नमस्तर्पयामीत्यादि प्रयोगः। अशक्तौ संक्षेपतर्पणं विष्णुपुराणे। आब्रह्मस्तंबपर्यंतं जगत्तृप्यत्विति
ब्रुवन्॥ क्षिपेत्तोयांजलींस्त्रीन्स्त्रीन् कुर्वन्संक्षेपतर्पणं। अंत्यमंजलिमाह कात्यायनः। पितृवंश्या मातृ
वंश्या ये चान्ये मत्त उदकमर्हंतीति तांस्तर्पयामीत्यवंशानांजलिरिति। ततः सूर्यायार्घ्यदानमुक्तं विष्णुपु
राणे। दत्वा कामोदकं सम्यक् एतेभ्यः श्रद्धयान्वितः। आचम्य च ततो दद्यात्सूर्याय सलिलांजलिं। नमो विव

आ॰म॰ स्वतेब्रह्मन्भास्वते विष्णुतेजसे। जगत्सवित्रे शुचये सवित्रे कर्मदायिन इति॥ ततआचम्य स्वस्थानं कुशांस्त्य
४८ जेत्॥ तथाच रत्नावल्यां॥ विकिरे पिंडदाने च तर्पणे श्राद्धकर्मणि। आचांतः सन् प्रकुर्वीत दर्भसंत्यजनं बुध इति
॥ तन्मंत्रोपि तत्रैव॥ येषां पिता न च भ्राता न पुत्रो नाम गोत्रिणः। ते सर्वे तृप्तिमायांतु मयोत्सृष्टैः कुशैस्तथेति॥ ततो भू
मौ वस्त्रं निष्पीडयेत्॥ तथाच नरदाजः॥ वस्त्रोदकमपेक्षंते ये मृता दासकर्मिणः। तस्मात्सर्वप्रयत्नेन जलं भूमौ
निपातयेत्॥ शौनकः॥ देवादितर्पणं कृत्वा वस्त्रं निःपीड्य शोधयेत्। स्नानार्थं प्रस्थितं विप्रं देवाः पितृगणैः सह
वायुरूपेण तिष्ठंति तृषिता स्तेजलार्थिनः॥ निराशास्ते निवर्तंते वस्त्रनिःपीडने कृते। तस्मान्न पीडयेद्वस्त्रमकृते
त्रि तर्पणे द्विजः इति॥ अथ भीष्मतर्पणं॥ व्यासः॥ शुक्लाष्टम्यां तु माघस्य दद्याद्भीष्माय यो जलं। संवत्सरकृतं पापं
तत्क्षणादेव नश्यति॥ तत्रायं मंत्रः॥ वैयाघ्रपादगोत्राय सांकृत्यप्रवराय च। गंगापुत्राय भीष्माय प्रदास्येऽहं तिलो
दकं। अपुत्राय ददाम्येतत्सलिलं भीष्मवर्मणे। इति भीष्मतर्पणं॥ अथ यमतर्पणं॥ वृद्धमनुः॥ दीपोत्सवचतुर्दश्यां ४८

कार्यं तु यमतर्पणं। कृष्णांगारचतुर्दश्यामपि कार्यं सदैव चेति॥ स एव॥ इहजन्मकृतं पापं मन्यजन्मार्जितं
च यत्। कृष्णांगारचतुर्दश्यां तर्पयंस्तदपोहति इति स्मृतिचंद्रिकायां॥ यमाय धर्मराजाय मृत्यवे चांतकाय च
वैवस्वताय कालाय सर्वभूतक्षयाय च॥ औदुंबराय दध्नाय नीलाय परमेष्ठिने। वृकोदराय चित्राय चित्रगुप्ताय
ते नमः॥ चतुर्दशैते मंत्राः स्युश्चतुर्थ्यंता नमोंतकाः। एकैकेन तिलैर्मिश्रांस्त्रींस्त्रीन्दद्याज्जलांजलीन्। यावज्जी
वकृतं पापं तत्क्षणादेव नश्यति। श्लोकगौतमः॥ यमो निहंता पितृधर्मराजो वैवस्वतो दंडधरश्च कालः। प्रेता
धिपो दत्तकृतानुसारी कृतांत एतद्दशभिर्जपंतीति॥ दशभिरावृत्तिभिः॥ व्यासः॥ तथा कृष्णचतुर्दश्यां य
माद्येत्यादिसप्तभिः। सतोदकांजलीन्दद्यात्सर्वपापैः प्रमुच्यते। स्कांदे। दक्षिणाभिमुखो भूत्वा तिलान्स
व्यसमाहितः। देवतीर्थेन देवत्वात्तिलैः प्रेताधिपो यतः। स्मृतिसारे। यज्ञोपवीतिना कार्यं प्राचीना
वीतिना पि वा। देवत्वं च पितृत्वं च यमस्यापि द्विरूपता॥ इति यमतर्पणं॥ अथ तर्पणे तिलनिषेधः॥ सं

श्रा॰म॰ ४८ ग्रहे।नंदायांभार्गवदिनेत्रत्रिकासुमघासुच।नरण्यांभानुवारेचगजछायाक्षयेतथा॥अयन
द्वितयेचैवमन्वादिषुयुगादिषु।पिंडदानंमृदास्नानंनकुर्यात्तिलतर्पणं॥मरीचिः॥सप्तम्यांरवि
वारेचगृहेजन्मदिनेतथा।भृत्यपुत्रकलत्रार्थीनकुर्यात्तिलतर्पणं॥बौधायनः॥सप्तम्यांरविवारे
चमातापित्रोःक्षयेहनि।तिलैर्यस्तर्पणंकुर्यात्सभवेत्पितृघातकः॥सप्तमीरविविशिष्टेनिमित्तमि
तिकेचित्॥तन्न।विशेषणविशेष्यभावेविनिगमनाविरहात्।कथंचित्तत्त्वेपिनिमित्तविशेषण
मविवक्षितमेव।यस्योभयंहविरार्तिमार्छेदित्यत्रेवोभयत्वंसप्तमीरविगृहजन्मदिनानामन्येषाम
पिपरस्परविशिष्टानामेवनिमित्ततायत्तेश्चअधिकारिविशेषश्रुतेश्चभृत्यपुत्रादिकामस्यैवायंनि
षेधः।नतुविधुरापुत्रादेः।स्मृत्यंतरे।विवाहव्रतचूडासुवर्षमर्द्धंतदर्द्धकं।पिंडदानंमृदास्नानंनकुर्या
त्तिलतर्पणमिति।बौधायनः॥विवाहेचोपनयनेचौलेसतियथाक्रमं।वर्षमर्द्धंतदर्द्धंचनेत्येकेतिल ४८

तर्पणं।संस्कारेषुतथान्येषुजातपुंसवनादिषु।यावन्मासःसमाप्येततावत्पिंडांश्चवर्जयेत्॥दृष्टाव
नेतरंप्राज्ञस्तथैवतिलतर्पणमिति।वृद्धमनुः।संक्रांत्यादिनिमित्तेषुस्नानांगेतर्पणेतथा॥तिथिवारनिषे
धेपितिलैस्तर्पणमाचरेदिति॥कात्यायनः॥उपरागेपितुःश्राद्धपातेमायांचसंक्रमे।निषेधेपिहिसर्वत्रति
लैस्तर्पणमाचरेत्इति।व्यतीपातेवैधृतेः।पितावपितृव्यादेरुपलक्षणं।संक्रांतिरयनभिन्नेतिपारिजाते
इतितर्पणप्रकरणं॥ ॥अथदेवपूजा॥कूर्मपुराणे॥ब्रह्माणंशंकरंसूर्यंतथैवमधुसूदनं।अन्यांश्चा
भिमतान्देवान्भक्त्यालक्रोधनोनरः।स्वैर्मंत्रैरर्चयेन्नित्यंपत्रैःपुष्पैस्तथांबुभिः॥गंधपुष्पमात्रंपं
चोपचारादयःसेनवइतितिथितत्वे।नृसिंहपुराणे॥जलदेवंनमस्कृत्यततोगच्छेद्गृहंबुधः।पौरुषेणचसू
क्तेनततोविष्णुंसमर्चयेदिति।स्कांदे॥ब्रह्माकृतयुगेदेवस्त्रेतायांभगवान्रविः।द्वापरेभगवान्वि
ष्णुःकलौदेवोमहेश्वरइति॥मंत्रावैदिकानाममंत्रावा।अतएवबालेउंकारादिसंयुक्तेनमस्का

आ॰म॰ रांतकीर्त्तितं।स्वनामसर्वसत्वानांमंत्रइत्यभिधीयते॥अनेनैवविधानेनगंधपुष्पेनिवेद
५० यत्।एकैकस्यप्रकुर्वीतयथोद्दिष्टक्रमेणलिति॥तत्रैव॥मंत्राच्छतगुणंप्रोक्तंभक्त्यास्तत्तगु
णोत्तरं।भक्तिमंत्रसमेतंतु——कोटिगुणोत्तरं॥महाभारते॥कलौकलिमलध्वंसंसर्वपापहरंह
रिं।येर्चयंतिनरानित्यंतेपिवंद्यायथाहरिः॥नियमविधिरयंनतुपरिसंख्या।एवंचसर्वयु
गेषुसर्वेषांपूज्यत्वंननिषिध्यते।अतएव—पंचायतनस्थापनप्रकारोज्ञानमाला।यदातुशं यां
करंमध्येईशान्यांश्रीपतिंयजेत्।आग्नेय्यांचतथाहंसंनैर्ऋत्यांपार्वतीसुतं।वायव्यांचस
दापूज्याभवानीभक्तवत्सला॥ ॥यदातुमध्येगोविंदमैशान्यांशंकरंयजेत्।आग्नेयांगणना
थंचनैर्ऋत्यांतपनंतथा।वायव्यामंबिकांचैवयजेन्मंत्रीसमाहितः॥ ॥सहस्रांशुंयदामध्ये
ईशान्यांपार्वतीपतिं।आग्नेय्यामेकदंतंचनैर्ऋत्यामच्युतंतथा॥वायव्यांपूजयेद्देवींभोगमोक्षैक ५०

भूमिकां॥ ॥भवानीतुयदामध्येईशान्यांमाधवंयजेत्।आग्नेय्यांपार्वतीनाथंनैर्ऋत्यांगणना
यकं।प्रद्योतनंतुवायव्यामाचार्यस्त्वप्रपूजयेत्॥ ॥हेरंबंतुयदामध्येईशान्यामच्युतंयजेत्।आ
ग्नेय्यांपंचवक्त्रंचनैर्ऋत्यांजगदंबिकां।वायव्यांद्युमणिंचैवयजेन्मंत्रीह्यतंद्रितः॥स्वस्थानवर्जिता
देवाःशोकदुःखभयप्रदाः॥तन्मंडलस्थितोराजासाधकश्चविनश्यतीति॥बोपदेवः॥शंभौमध्यगते
हरीनहरभूदेव्योहरौशंकरेभास्यनागसुतारवौहरिगणेशाजांबिकाःस्थापिताः।देव्यांविष्णुशिवै
कदंतरवयोलंबोदरेजेश्वरेनार्याःशंकरभागतोतिसुखदाव्यस्तास्ततेहानिदाइति॥अत्रपंचानामप्ये
कस्यावाहनादिनमस्कारांतंपूजाकांडंकृत्वापरस्यापीत्येवंकांडानुसमयः।मुख्येपुष्पांजलिंदत्वागणे
शाद्यर्चनंभवेत्।गणेशएवमुख्यश्चेत्तत्रसूर्यक्रमात्क्रमेदिति॥वचनेनक्रमाभिधानात्।मुख्येप्रधान
देवतायांपुष्पांजलिशब्देनचतदंतापूजालक्ष्यते।पुष्पांजल्यंतरंवाविधीयतइतिशारदातिलकटी

आ॰ म॰ ५१ कायां। उक्तं तु मुख्यत्वोक्त्या तत्प्रतियोगिकांगत्वालाभेन नचैकप्रयोगविधिपरिकल्पनं तेन चैकप्र
लत्वावगतेः वैदेवीत्वात् प्राजापत्येष्वरंतीतिवत्। सर्वेषामावाहनं ततः स्थापनमिपेतिदार्थानु
समय एव सत्तु मध्ये पुष्पांजल्यंतां पूजां कृत्वांगदेवतापूजा कार्येति दिक्। भविष्यत्पुराणे। पुष्पैररण्य
संभूतैः पत्रैर्वा गिरिसंभवैः। अपर्युषितनिश्छिद्रैः प्रोक्षितैर्जंतुवर्जितैः। आत्मारामोद्भवैर्वापि भक्त्या
संपूजयेत्सुरान्॥ कृमिकीटावपन्नानि शीर्णपर्युषितानि च। स्वयं पतितपुष्पाणि त्यजेदुपहितानि च।
उपहितानि मलादिभिः। मुकुलैर्नार्चयेद्देवमपक्वं न निवेदयेत्। फलं च कृमिवद्धं च प्रयत्नात्परिव
र्जयेत्॥ अलाभे तु सुपुष्पाणां पत्राण्यपि निवेदयेत्। पत्राणामप्यलाभे तु फलान्यपि निवेदयेत्॥ फला
नामप्यलाभे तु तृणगुल्मौषधीरपि। औषधीनामलाभे तु भक्त्या भवति पूजितः। प्रत्येकमुक्तपुष्पेण द
शसौवर्णिकं फलं। स्वर्णाभिश्चनृपशार्दूल तद्देवाद्द्विगुणं भवेत्॥ विष्णुधर्मोत्तरे। धर्मार्जितधनक्रीतै ५१

र्यः कुर्यात्केशवार्चनं। उद्धरिष्यत्यसंदेहात्स सप्तपूर्वांस्तथा परानिति विष्णुतिरिक्तपरं। समित्पुष्पकु
शादीनि ब्राह्मणः स्वयमाहरेत्। शूद्रानीतैः क्रयक्रीतैः कर्म कुर्वन्पतत्यधः इति भविष्ये। ब्राह्मणग्रहणं
द्विजमात्रोपलक्षणं। लतापुष्पार्चनादौ तु क्रयक्रीतमपीति मंचकौशिकाः॥ समित्पुष्पकुशादीनि वहंतं नाभि
वादयेत्। तद्धारी चैव नाभ्याद्दि निर्माल्यं तत्कुवेन्नयो॥ तथा देवोपरि धृतं वामहस्ते धृतं च यत्। अ
धोवासस्त्रधृतं यच्च जलांतः क्षालितं च यत्। देवतास्तन्न गृह्णंति पुष्पैर्निर्माल्यतां गतमिति॥ नित्यपूजा
र्थं परोपवनादेरपि ग्राह्यं। तत्र बौधायनः। देवतार्थं च कुसुमं अस्तेयं मनुरब्रवीत्। इति वचनात्। पूजार्थं
पुष्पादि नयाच्वेत। याचितैः पत्रपुष्पाद्यैर्यः करोति ममार्चनं मिति वाराहे तस्यापराधिषु गणितत्वा
त्। भविष्यत्पुराणे। प्रहरं तिष्ठते जाती करवीरमहर्निशं। कुब्जस्यां बिल्वपत्रेषु जलजेषु च सर्वशः। न
पर्युषितदोषोऽस्तिमालाकारगृहेषु च॥ मुद्गराणि कदंबानि रात्रौ देयानि भास्करे। कनकानि कदंबानि

आ॰म॰
५२

रात्रौ देयानि शंकरे॥ दिवा चान्यानि पुष्पाणि दिवा रात्रौ च मल्लिका। तथैव॥ जाती शमी कुशाः कुंकुम
ल्लिका करवीरजं। नागपुन्नागकाशोकरक्तनीलोत्पलानि चांपकं बकुलं चैव पद्मं बिल्वं पवित्र
कं। एतानि सर्वदेवानां विहितानि समानि च। कुंकुकुलकं। नागो नागकेसरं। पाटला च शमीप
त्रं दुर्गायाः रक्तहिताहितं। विहितं प्रतिषिद्धं चेत्यर्थः॥ कुंदं पलाशकुसुमं दूर्वा च शिवपूजने। कुमुदं कुं
कुमं द्रोणं तगरं सूर्यपूजने। विहितनिषिद्धमित्यर्थः। कुंकुममत्र पुष्पं। अवः कर्णिकारस्तकिं
किरातो हरेस्तथा। किंकिरातः पीतायकः। तिलकं मालती वाणस्तुलसी भृंगराजकं। तामलं शि
व दुर्गार्थे निषिद्धं विहितं न वेतु। वाणः कुरसला इति प्रसिद्धः। जपाकाशश्वेतपद्मश्वेतमंदारकं
तथा। दुर्गायाश्चैव विष्णोश्च निषिद्धं विहितं न वेत॥ जयो जयंती। अगस्तिरतिमुक्तश्च तिरीटं च हरेर्हु
रौ। अपामार्गस्य पुष्पं च दुर्गायाश्च हिताहितं॥ अतिमुक्ता माधवीलता। तिरीटं लोध्रं। धत्तूरः शिं ५२

पापुष्पं मंदारश्चापराजिता। सूर्यविष्णोर्न हि हितं दमनं शिवसूर्ययोः॥ अथ शिवे निषिद्धानि
॥ केतकी चातिमुक्तश्च कुंदो यूथी मदंतिका। शिरीषसर्जबंधूककुसुमानि विवर्जयेत्॥ अंकोट्ट
पत्रकुसुमं करजेंद्रतरूद्भवं। विनीतकानीति। सर्जः शालः। इंद्रतरुः सिंधुवारः। शिवे विवर्जयेत्कुंदं उ ५३
न्मत्तं च तथा हरौ। देवानीमर्कमंदारौ सूर्यस्य तगरं तथा। इति विष्णुः॥ अर्के निषेधो दुर्गेतरदेवी विष
यः॥ दुर्गापूजाधिकारे। करवीरार्कपुष्पैरित्युक्तत्वात्॥ विष्णोस्तु विष्णुः। नोग्रगंधानि नागंधानि पुष्पा
णि न कंटकितं। कंटकितमपि शुक्लं सुगंध्यपि दद्यात्॥ न रक्तं दद्यात्। रक्तमपि कुंकुमजं जलजं च
दद्यात्। जलजमपि पाटलानि संध्याकरवीरपारिभद्रशमीपत्रपलाशाशोककुशवर्जं न दद्या
त्। विष्णुधर्मोत्तरे। कुटजशाल्मलीपुष्पशैरीषककत्व धत्तूरकृष्णपुष्पार्कं च विष्णोर्निषिद्धं नृसिंहपु
राणे। मालायोग्यतारहिते सति निर्माल्यं न वतीत्युक्तं। तुलसीचंदनादीनां न निर्माल्यतेत्युक्तं॥ तेन

आ॰ म॰ प्रातःकाले ह्यानयने न दोषः॥ अथ विहितानि॥ तत्र सूर्यस्य भविष्यत्पुराणे। मालती मल्लिका चैव द्रूवी
५३ काशोतिमुक्तकः। पाटला करवीराणि जपा जयंती रेव च। चंपको रोतकः कुंदो बाणो वर्बरमल्लिका। अशोक
कर्णिकारो वत्तथैवाटरूपकः। शतपत्राणि चान्यानि वकुलं च विशेषतः। अगस्तिकिंशुको तद्वत्पूजार्थं भास्क
थ४ रस्य वा। विहितानीति शेषः। अथ पत्राणि। बिल्वपत्रं शमीपत्रं भृंगराजस्य पत्रकं। तमालपत्रं च हरेः सद्यस्तु
ष्टिकरं रवेः। तुलसी कालतुलसी तथा रक्तं च चंदनं। केतकीपत्रकुसुमं सदैव तपनप्रियं॥ अथ शिवे॥ क
रवीरो बकश्चैव अर्कं उन्मत्तकस्तथा। पाटला बृहती चैव तथा च गिरिकर्णिका। तथा काशस्य पुष्पाणि मंदा
रश्चापराजिता। शमीपुष्पाणि चान्यानि कुब्जकं शिखिनी तथा। अपामार्गस्तथा पद्मं शमीपत्रं सरोचकं।
चंपकोशीर तगरं तथा वै नागकेसरं। पुन्नागं किंकिरातं च द्रोणपुष्पं तथार्जुनं। शिंशपोदुंबरश्चैव जपा
वृत्त। मल्ली तथैव च। पुष्पाणि यज्ञवृक्षस्य तथा बिल्वं तथार्जुनं प्रिये॥ कुंकुमस्य च। नीलं च कुमुदं चैव तथा रक्तोत्पलानि ५३

चाम्बुजानि च सर्वाणि स्थलजान्योदकानि च। गृह्णामि शिरसा देवि यो मे भक्त्या निवेदयेत्। शिखिनीम
यूरशिखा। नीलोत्पलसहस्रस्य यो मालां संप्रयच्छति। शिवाय विधिवद्भक्त्या तस्य पुण्यफलं शृणु॥ कल्प
कोटिसहस्राणि कल्पकोटिशतानि च। वसेच्छिवपुरे श्रीमान् शिवतुल्यपराक्रमः॥ अर्ककरवीरधत्तू
रादिपुष्पदानफलं नात्र लिखितं ग्रंथगौरवभयात्। सामान्यं फलं शिवलोकप्राप्तिः॥ ॥अथ दुर्गायाः॥
देवीपुराणे। शृणु शुक्र प्रवक्ष्यामि पुष्पाध्यायं समासतः। त्रिकालोद्भवैः पुष्पैर्मल्लिकाजातिपुष्पकैः। सि
तरक्तैस्तथा पुष्पैः पीतैश्च पांडुरैस्तथा। किंशुकैस्तगरैश्चैव कर्णिकारैः सचंपकैः। वकुलैश्चैव मंदारैः कुं
दपुष्पैस्तिरीटकैः। करवीरार्कपुष्पैश्च शोभितैश्चापराजितैः। सितरक्तैस्तथा पीतैः कुसुमैश्च चतुर्वि
धैः। धत्तूरिकादिपुष्पैश्च बंधूकागस्तिसंभवैः। मदनैः सिंधुवारैश्च सुरभिमरुवकैस्तथा। लतानि
र्मलवृक्षस्य दूर्वांकुरैः सुशोभनैः। मंजरीभिः कुशानां च बिल्वपत्रैः सुशोभनैः। रक्तार्चितैस्तथा सर्वैः

आ॰म॰ ५४ जलजैः स्थलसंभवैः। पत्रैः पुष्पैर्यथान्यायं सर्वौषधिमयैः शुभैः। नधान्यानां सर्वपत्रैश्च पुष्पै
श्चैव प्रपूजयेत्॥ बिल्वपत्रैः पूजने राजसूयफलं। करवीरस्रजा अग्निष्टोमफलं। बकुलस्रजा वा
जपेयफलं। द्रोणस्रजा राजसूयफलं। एवमन्यत्॥ ॥अथ विशेषः॥ नरसिंहपुराणे। मल्लिका
मालतीजातीकेतक्याशोकचंपकैः। पुन्नागनागबकुलैः पद्मैरुत्पलादिभिः। एतैरन्यैश्च कुसु
मैः प्रशस्तैः पूजनं हरेः। वामनपुराणे। जातीशताह्वसुमनाकुंदं स्वांबुपुटस्तथा। बाणं च चंपकाशो
कं करवीरं च यूथिका। पारिभद्रं पाटला च बकुलं गिरिशालिनी। तिलकं जासुवनजं पीतजं तगरं त्व
पि। एतानि हि प्रशस्तानि कुसुमान्यच्युतार्चने। सुरभीणि तथान्यानि वर्जयित्वा तु केतकीं। केतकी
धत्तूरमिति केचित्। वनकेतकीत्यपरे। शताह्वाशोक इति प्रसिद्धा। सुमनाः सुवर्णजातीः। स्वांबुपुटः
कर्णिकारः। जसुवनजं जपा। गिरिशालिनी श्वेतलकुटजं॥ अथ पत्राणि॥ अपामार्गस्य प्रथमं। भृं ५४

गराजमतः परं। तस्माच्च खादिरं श्रेष्ठं शमीपत्रं ततः परं। दूर्वापत्रं तथा श्रेष्ठं ततोपि कुशपत्रकं। त
स्माद्दमनकं श्रेष्ठं ततो बिल्वस्य पत्रकं। बिल्वपत्रादपि हरेस्तुलसीपत्रमुत्तमं। एतेषां तु यथालाभं
पत्रैर्यश्चार्चयेद्धरिं। सर्वपापविनिर्मुक्तो विष्णुलोके महीयते। नरसिंहपुराणे। कृष्णमूर्द्धनि विन्यस्ता
५४ तुलसीपत्रमंजरी। सुवर्णकोटिपुष्पाणां पुण्यं गृह्णात्यतोधिकं। तुलसीरोपणमंत्रः। महाप्रसादजन
नी सर्वसौभाग्यवर्द्धिनी। आधिव्याधिहरा नित्यं तुलसि त्वां नमोस्तु ते। द्रोणपुष्पे तथैकस्मिन् साध
काय निवेदिते। दश दत्वा सुवर्णानि तत्फलं लभते नरः। अगस्तिकुसुमैर्देवं योर्चयेज्जनार्दनं। दर्श
नात्तस्य देवर्षे नरकान्को नु यास्यति। द्रोणपुष्पं खादिरं च शमी बिल्वकं तथा। बकं बकुलं। नंद्याव
र्तं करवीरं तथा श्वेतं च किंशुकं। कुशपुष्पं तमालं च चंपकाशोककेतकी। त्रिसंध्यं मालतीपुष्पं त्रिसंध्यं
श्वेतजातु या। कुंदं च शतपुष्पं च मल्लिका जातिपुष्पकं। पूर्वपूर्वसहस्रेभ्योधिकं स्यादुत्तरोत्तरं। जातीपुष्प

आ॰म॰ सहस्रेण यश्चैनमाल्लां सुशोभनां॥ विष्णवे विधिवद्दद्यात्तस्य पुण्यफलं शृणु॥ कल्पकोटिसहस्राणि
५५ कल्पकोटिशतानि च। वसेद्विष्णुपुरे श्रीमान् विष्णुतुल्यपराक्रमः॥ मंजरीं सहकारस्य केशवोपरि नारद। यच्छ
ति ते महात्मानो गोकोटिफलभागिनः॥ पुरंध्रिपुष्पं यो दद्यादेकमप्यथ पंडितः॥ तिलपात्रप्रदानस्य फलमाप्नो
त्यसंशयं। पुरंध्रिः पूर्वदेशे पुंगुरिति प्रसिद्धा॥ इति पुष्पाध्यायः॥ ॥ अथ पूजायतनानि॥ अग्निपुराणे। अप्स्व
ग्नौ हृदये सूर्ये स्थंडिले प्रतिमासु च। षट्स्वेतेषु हरेः सम्यगर्चनं मुनिभिः स्मृतं॥ स्कांदे। कामासक्तोथवा क्रु
द्धः शालिग्रामशिलार्चनात्। भक्त्या वा यदि वाभक्त्या कलौ मुक्तिमवाप्नुयात्॥ वेदस्त्वतनयं नास्ति तथा
यकलिकालजं। यः कथां कुरुते विष्णोः शालिग्रामशिलाग्रतः॥ शालिग्रामशिलायास्तु प्रतिष्ठा नैव विद्य
ते। महापूजां तु कृत्वादौ पूजयेत्तां ततो बुध इति। शिवायतनं भारते॥ सद्दातंजंबते यस्तु श्रद्धया मुनि
पुंगव। लिंगे वा स्थंडिले वापि शंकरं विधिपूर्वकं। युगदोषं विनिर्जित्य रुद्रलोके प्रमोदत इति। भवि ५५

ष्ये। बाणलिंगानि राजेंद्र ख्यातानि भुवनत्रये। न प्रतिष्ठा न संस्कारस्तेषामावाहनं तथेति। हेमाद्रौ॥ ब्रा
ह्मणैर्वासुदेवस्तु नृपैः संकर्षणस्तथा। प्रद्युम्नः पूज्यते वैश्यैरनिरुद्धस्तु शूद्रजैरिति। विष्णुधर्मोत्तरे॥
पंचवक्त्रो वासुदेवः षड्भिः प्रद्युम्नकः स्मृतः। संकर्षणः सप्तवक्त्रो निरुद्ध एकादशोऽस्मृतः॥ चत्वारो ब्राह्म
णैः पूज्यास्त्रयो राजन्यजातिभिः। वैश्यैर्द्वावेव संपूज्यौ तथैकः शूद्रजातिभिः॥ यत्तु स्मृत्यंतरे॥ एकमूर्ति
र्न संज्ञेयेव गृहिणा भूतिमिच्छता। अनेकमूर्तिसंपन्नः सर्वकामानवाप्नुयात्॥ तत्काम्यपूजापरं॥ त्रैवर्णि
कपरं वा। शूद्रस्यैकविधानात्॥ यदपि। शालिग्रामाः समाः पूज्या विषमा न कदाचन। समेषु द्वितयं नैव
विषमेष्वेकमेव हीति॥ तत्र पादत्रयं विप्रपरं। तत्राप्याद्यर्द्धे चत्वारो ब्राह्मणैः पूज्या इत्यस्यैवार्थमनु
वदति। तृतीयपादस्त्वनेकमूर्तिसंपन्न इत्यनेकताप्राप्तौ द्वयोर्निषेधकं। अंत्यपादस्तु शूद्रपरः। य
त्तु विष्णुधर्मोत्तरे। शालिग्रामशिलां वापि चक्रांकितशिलां तथा। ब्राह्मणः पूजयेन्नित्यं क्षत्रियादिर्न

आ॰म॰ पूजयेत्॥ नतु स्त्रियादिर्थस्येति मध्यमपदलोपि वक्तव्यादिग्रहणेन तद्गुणसंविज्ञानवक्तव्यादिग्रहण
५६ शूद्रपरं। तथाचापस्तंबः। प्रणवोच्चारणाच्चैव शालिग्रामशिलार्चनात्। ब्राह्मणीगमनाच्चापि शूद्रश्चा
डालतां व्रजेत्। एतदपि शूद्रस्य स्पर्शसहितपूजानिषेधार्थं। ब्राह्मणस्यैव पूज्योहं शुचेरप्यशुचेरपि
। स्त्रीशूद्रकरसंस्पर्शो वज्रस्पर्शाधिको मम इति॥ लैंगोक्तेः। स्त्रीणामनुपनीतानां शूद्राणां च नराधिप। स्प
र्शने नाधिकारोस्ति विष्णोर्वा शंकरस्य वेति। शूद्रो वानुपनीतो वा स्त्री वापि पतितोथवा। केशवं वा शि
म वं वापि स्पृष्ट्वा नरकमश्नुत इति च बृहन्नारदीयाच्चेति मदनवरणः। स्त्रीशूद्रयोः साक्षात्पूजानिषेधकमि
ति युक्तं। अत एव पाद्मे। ब्राह्मणक्षत्रवैश्यानां च याणां मुनिसत्तम। अधिकारः स्मृतः सेव्ये शालिग्रा
मशिलार्चने। स्त्रीशूद्रपतितादीनां षंढादीनां विकर्मिणां। नैवाधिकारो विज्ञेयः शालग्रामशिलार्चने
। दीक्षायुक्तैस्तथान्यैर्मद्यपानविवर्जितैः। कर्त्तव्यं ब्राह्मणद्वारा शालग्रामशिलार्चनमिति। तत्रैव वा ५६

रकाशैलसंभूतं यस्तोयं पिबते कलौ। पापानि तस्य नश्यंति शतजन्मार्जितान्यपि। धृते शिरसि पीते च
सर्वास्तुष्यंति देवताः। प्रायश्चित्तं हि पापानां कलौ पादोदकं हरेरिति। शिलेव शैलं। स्वार्थेण्। द्वारकाशिला
तोयपानविधेः स्वापि शालिग्रामेण सह पूज्येति केचित्। तत्तोयपानमात्रं पूता यांतु मानानावदित्यपरे॥ ॥
५४ अथ विष्णोर्गंधपुष्पादि। विष्णुधर्मोत्तरे। कलौ यच्छंति ये विष्णोस्तुलसीकाष्ठचंदनं। विष्णुप्रीतिकरं मर्त्त्या गच्छंति रा
यांति ते नु वं यो ऽर्चयेन्मालतीपुष्पैर्न भूयस्तनपो भवेत्। अद्येमुष्टास्ते नष्टास्ते पतिताः कलिकंदरे। येनार्चितो
हरिर्भक्त्या कमलैरसितैः सितैरिति पाद्मे। कार्त्तिके केतकीपुष्पं येन दत्तं हरेः कलौ। दीपदानं च देवर्षे तारितं ते
न वै कुलमिति। अथ पूजेतिकर्त्तव्यता। आग्नेयपुराणे। अर्चनं संप्रवक्ष्यामि विष्णोरमिततेजसः। यत्कृत्वा मु
नयः सर्वे परं निर्वाणमाप्नुयुः। आनुष्टुभस्य सूक्तस्य त्रिष्टुब् तस्य देवता। पुरुषो यो जगद्बीज मृषिर्नारायणः
स्मृतः। अथ प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे। तृतीयां वामपादे च चतुर्थीं दक्षिणे न्यसेत्। पंचमीं वामजा

आ॰म॰
५७ नेत्रे षष्ठीं वै दक्षिणे न्यसेत्। सप्तमीं वामकर्णे तु अष्टमीं दक्षिणे तथा। नवमीं नाभिमध्ये तु दशमीं हृ
दये तथा। एकादशीं कण्ठमध्ये द्वादशीं वामबाहुके। त्रयोदशीं दक्षिणे तु तथैवास्ये चतुर्दशीं। अक्ष्णोः पं
चदशीं चैव विन्यसेन्मूर्ध्नि षोडशीं। यथा देहे तथा देवे न्यासं कृत्वा यथाविधि। न्यासेन तु नवे — स्वेऽपि
यमेव जनार्दनः। एवं न्यासविधिं कृत्वा पश्चात्पूजां समाचरेत्। पूर्वमावाहयेद्देवं आसनं तु द्वितीयया।
पाद्यं तृतीयया चैव चतुर्थ्यार्घ्यं प्रदापयेत्। पंचम्याचमनं दद्यात् षष्ठ्या स्नानं समाचरेत्। सप्तम्या तु ततो वा
सो ह्यष्टम्या चोपवीतकं। नवम्या चंदनं दद्याद्दशम्या पुष्पमेव च। एकादश्या तथा धूपं द्वादश्या दीपमेव हि। नै
वेद्यं तु त्रयोदश्या नमस्कारे चतुर्दशी। प्रदक्षिणे पंचदशी वर्जने षोडशी तथा। वर्जने विसर्जने॥ स्नाने वस्त्रे
च नैवेद्ये दद्यादाचमनं तथा। कृत्वा षोडशभिर्मंत्रैः षोडशान्नस्य चाहुतीः। पुनः षोडशभिर्मंत्रैर्दद्यात्पुष्पाणि
षोडश। तत्र सर्वं जपेद्भूयः पौरुषं सूक्तमेव च। षण्मासात्सिद्धिमाप्नोति ह्येवमेव समर्चयेदिति। यत्तु नागव ५७

ते उद्वासावाहने न स्तः स्थिरायामुद्वार्चने। अस्थिरायां विकल्पः स्यात्स्थंडिले चन्नवेद्ध्यमिति। यदपि
स्कांदे। शालग्रामां च तेनैव आवाहनविसर्जने। शालग्रामे हि भगवान् समुत्पन्नः सदा हरिः॥ इत्यावाहन
विसर्जने निषिद्धे तत्र तत्त्वो विनियोगो मंत्रराजविधौ। आवाहनं तु चाद्यात्पूर्वे पुष्पांजलिं हरेः। तस्यैवोन्मुख
ताप्राप्त्यै यागे चोद्वासने त्वन्त्यं। अंते चोद्वासनं दद्याद्योगसंपूर्त्तिसिद्धये इति। तत्रैव॥ प्रतिमापटयंत्राणां नि
त्यं स्नानं न कारयेत्। कारयेत्पर्वदिवसे यथा मलनिवारणमिति। वस्त्रमपि न प्रत्यहं नियमेन नूतनमेव स
मर्पणीयं। वस्त्रमन्यत्क्षणं छुध्येत् अपरं तु दिने दिन इति तत्वसागरोक्तेः॥ अपरं पुष्पादि। तत्रैव॥ यावच्चंद्रश्च
सूर्यश्च यावत्तिष्ठंति देवताः। न निर्माल्यं भवेत्ता वस्त्रस्वर्णरूप्यविभूषणमिति॥ ॥बौधायनः॥ अथातो ह
रहः परिचर्याविधिं व्याख्यास्यामः स्नात्वा शुचौ देशे गोमयेनोपलिप्य प्रतिकृतिं कृत्वा अक्षतपुष्पैर्यथालाभ
मर्चयेत्। सहपुष्पोदकेन महादेवमावाहयेत्। ॐ भूः महादेवमावाहयामि। ॐ भुवः। महादेवमावाह

आ॰म॰
५८

यामि। ॐ स्वः महादेवमावाहयामीत्यावाह्य आयातु भगवान् महादेव इत्यथ स्वागतेनाभिनंद
ति। स्वागतमनुनास्वागतं भगवते महादेवायेत्यासनं क्लृप्तमास्तां भगवान्महादेव इत्यत्र कूर्चं दद
ति भगवतो यं कूर्चो दर्भमयस्त्रिवृद्धरितः सुवर्णस्तं जुषस्वेति। अत्र स्थानानि कल्पयति। अग्रतो ब्र
ह्मणे कल्पयामि दक्षिणतः स्कंदाय कल्पयामि विनायकाय कल्पयामि पश्चिमतः शूलाय कल्पया
म्युत्तरतः उमायै कल्पयामि नंदिकेश्वराय कल्पयामीति कल्पयित्वाथ सावित्र्या पात्रमभिमंत्र्य प्रक्षा
ल्य त्रिरपः पवित्रमध्य आनीय सह पवित्रेणादित्यं दर्शयित्वा ॐ भिष्टतमिति स्नानं ॐ स्वरितिरुद्रेण
पाद्यं दद्यात्प्रणवेनार्घ्यं अथ व्याहृतिभिर्निर्माल्यं व्यपोह्योत्तरतश्चंडाय नम इत्यथैनं स्नापयित्वापो
हिष्ठा मयोभुव इति तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति चतसृभिः पवमानः सुवर्जन इत्येते
नानुवाकेन स्नापयित्वाद्भिस्तर्पयति। भवं देवं तर्पयामि शर्वं देवं। ईशानं। पशुपतिं देवं। रुद्रं देवं। ५८

उग्रं देवं। भीमं महांतं देवं तर्पयामीति तर्पयित्वाथैतानि वस्त्रयज्ञोपवीतान्याचमनीयांत्युदकेन व्या
हृतिभिर्दत्वा व्याहृतिभिः प्रदक्षिणं उदकं परिषिच्य नमस्ते रुद्र मन्यव इति गंधं दद्यात्सहस्राणि सहस्र
श इति पुष्पं दद्यादीशानं त्वा भुवनानामधिश्रियं इति वा अक्षतान् दद्यात्सावित्र्या धूपमुद्दीप्यस्वेति दीपं देव
त्वा स्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां भगवते महादेवाय जुष्टं चरुं निवेदयामीति नैवेद्यं अष्टा
भिर्नामधेयैरष्टौ पुष्पाणि दद्याद्भवाय देवाय नमः। शर्वाय देवाय नमः। ईशानाय नमः। पशुपतये नमः। रुद्राय नमः।
उग्राय नमः। भीमाय देवाय नमः। महते देवाय नमो ब्रह्मणे नमो विष्णवे नमः स्कंदाय नमः। प्रयातु भगवानीशः
सर्वलोकनमस्कृतः। अनेन हविषा तृप्तः पुनरागमनाय च। पुनः संदर्शनाय चेति प्रतिमास्थाने पक्षस्या
वाहनविसर्जनवर्जं समानं महत्स्वस्त्ययनमित्याचक्षत इत्याह भगवान्बोधायन इति। कौर्मे।
न विष्ण्वाराधनात्पुण्यं विद्यते कर्म वैदिकं। तस्मादनादिमध्यांतं नित्यमाराधयेद्धरिं। अथ वा देवमीशानं

स्था

आ॰म॰
५८

भगवंतं सनातनं। आराधयेन्महादेवं भावपूतो महेश्वरं। मंत्रेण रुद्रगायत्र्या प्रणवेनाथवा पुनः। रुद्रगा
यत्री तत्पुरुषाय विद्महे इत्याद्या। ईशानेनाथवा रुद्रैस्त्र्यंबकेन समाहितः। पुष्पैः पत्रैरथाद्भिर्वा चंदनाद्यै
पत्रे ३ र्महेश्वरं। तथों नमः शिवायेति मंत्रेणानेन दापयेत्। नमस्कुर्यान्महादेवं ऋतं सत्यमितीश्वरं। निवेदयी
त स्वात्मानं यो ब्रह्मणामितीश्वरे। प्रदक्षिणं द्विजः कुर्यात् पंच ब्रह्माणि वा जपेत्। ध्यायीत देवमीशानं व्यो
तं ममध्यगतं शिवमिति। स्कांदे॥ अग्राह्यं शिवनिर्माल्यं पत्रं पुष्पं फलं जलं। शालग्रामस्य संसर्गात् सर्वं याति
पवित्रतामिति। कौर्मे। यो मोहादथवालस्यादकृत्वा देवतार्चनं। भुंक्ते स याति नरकं सूकरेष्वभिजायत इति।
शिववाक्यं स्कांदे॥ विप्रस्य तु सदैवाहं शुचेरथ अशुचेरपि। गृह्णन्बलिं प्रहृष्यामि विप्राणामिव दर्शनात्। ब
लिपूजां। तथा शूद्रः कर्माणि यो नित्यं स्वीयानि कुरुते प्रिये। तस्याहमर्चां गृह्णामि चंडखंडविभूषिते। तथा। नमों
तेन शिवेनैव स्त्रीणां पूजा विधीयते। एवकारः प्रणवपरिसंख्यार्थः। तथा नृसिंहतापनीये। सावित्रीं प्रण ५९

X

वं जुष्टैर्लक्ष्मीं स्त्रीशूद्राय नेच्छंति। न विष्णोरपि स्वाहाप्रणवसंयुक्तं शूद्रे मंत्रं ददद्द्विजः। शूद्रो नरकमाप्नो
ति ब्राह्मणः शूद्रतामियात्॥ रुद्रयामले॥ न प्राचीमग्रतः शंभोर्नोदीचीं शक्तिसंश्रितां। न प्रतीचीं यतः पृष्ठम
तो दक्षं समाश्रयेत्॥ पूजकः शंभोः पूजार्थं प्राचीमवस्थितये न समाश्रयेत्। पंचवक्त्रपक्षे यतः संहारकं च
क्रं प्राच्यामवस्थितं। एकवक्त्रपक्षे तु सुतरां। शक्तिर्देवी। दक्षं दक्षिणं। इदं च वचनं सूर्योपलक्षितदिग्विष
यमेव॥ वक्ष्यमाणा आवरणपूजाप्येतदनुसारेणैव। पूज्यपूजकांतः प्राच्यास्तत्नायं विषयः वाधात्। लिं
हे गपुराणे। विना भस्मत्रिपुंड्रेण विना रुद्राक्षमालया। पूजितोपि महादेवो न तस्य तत्फलप्रदः॥ तस्मान्मृदा
पि कर्तव्यं ललाटे वै त्रिपुंड्रकं। संवत्सरप्रदीपे। त्रिपुरस्य वधे काले रुद्रस्याक्ष्णोर्यतश्च्युतो। अश्रुकणो बिंद
वस्ते तु रुद्राक्षा ह्यभवन्नु वि। स्कांदे। पंचवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः। अगम्यागमनाच्चैवाभक्ष्यभ
क्षणात्। मुच्यते सर्वपापेभ्यः पंचवक्त्रस्य धारणात्॥ ॐ नम इति प्रत्येकमष्टोत्तरशतं जप्त्वा शिवो न सा

प्रत्तोल्यधारणीयं। विनामंत्रेण यो धत्ते रुद्राक्षं तं नु विमानवः। स याति नरकं घोरं यावदिंद्राश्चतुर्दशेति
॥ ॥ अथ पार्थिवपूजा नंदिपुराणे॥ आयुष्मान् बलवान् श्रीमान् पुत्रवान् धनवान् सुखी। वरमिष्टं लभेल्लिं २२
गं पार्थिवं यः समर्चयेत्॥ तस्मात्तु पार्थिवं लिंगं ज्ञेयं सर्वार्थसाधकं। नत्र विष्णे॥ मृन्मयस्मणेशान्नलिंडं ताम्रं
कांस्यमयं तथा। कृत्वा लिंगं सकृत्पूज्य वसेत्कल्पायुतं दिवि। राज्यं पित्रपदे लिंगं स्फाटिकं सर्वकामदं॥ नर्म
दागिरिजं श्रेष्ठमन्यदपि हि लिंगवत्। कृत्वा पूजयविप्रेंद्र लिप्स्यसे चेप्सितं फलं॥ लिंग वत् लिंगाकारं। तिथित
त्वे। अत्तादल्यपरीमाणं न लिंगं कुत्रचिन्नरः। कुर्वीतांगुष्ठतो ह्रस्वं न कदाचित्समाचरेत्। अंगुष्ठतात् दृहत्प
र्वग्राथितः॥ अंगुष्ठांगुलिमानं तु यत्र यत्रोपदिश्यते। तत्र तत्र वृहत्पर्वग्रंथिभिर्मनुयात्सदेति छंदोगपरिशिष्टात्॥
शिवधर्मे। सहस्रमर्चयेल्लिंगं निरयं स न गच्छति। रुद्रलोकमवाप्नोति भुक्त्वा भोगाननुत्तमान्॥ तथा। वालुका
नि वलिंगानि पार्थिवानि च कारयेत्। सहस्रपूजनात्सोपि लभते वांछितं फलं॥ देवीपुराणे। मृदाहरणसंघ १०

ट्टप्रतिष्ठाकाग्नमेव च। स्नपनं पूजनं चैव विसर्जनमतः परं। हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक्।
पशुपतिः शिवश्चैव महादेव इति क्रमात्। अत्रानुष्ठानं। ॐ हराय नमः इति मृदाहरणं। ॐ महेश्वराय नमः
इति संघट्टनं। ॐ शूलपाणे इह सुप्रतिष्ठितो भव इति प्रतिष्ठा॥ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचं
द्रावतंसं रत्नाकल्पोज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नं। पद्मासीनं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं
वसानं विश्वाद्यं विश्ववीजं निखिलभयहरं पंचवक्त्रं त्रिनेत्रं। इति ध्यात्वा पिनाकधृगिहागच्छेत्यावाहः। ॐ प
शुपतये नमः इति स्नपनं। एतत्पाद्यं। ॐ नमः शिवायेति। एवमर्घ्यादिना पूजयेत्। विसर्जनात्पूर्वं भविष्य
पुराणोक्तं स्वनामप्रसिद्धेशान्यादिष्वष्टदिक्षु वामावर्त्तेन पूजनं। यथा। ॐ शर्वाय क्षितिमूर्त्तये नमः। ॐ भवा
य जलमूर्त्तये नमः। ॐ रुद्राय अग्निमूर्त्तये नमः। ॐ उग्राय वायुमूर्त्तये नमः। भवायाकाशमूर्त्तये नमः। ॐ प
शुपतये यजमानमूर्त्तये नमः। महादेवाय सोममूर्त्तये नमः॥ ॐ ईशानाय सूर्यमूर्त्तये नमः। मूर्त्तयो

आ॰म॰ ६१ शिवस्यैताःपूर्वादिक्रमयोगतः॥आग्नेय्यंताःप्रयोज्यास्तवेष्यांलिंगेशिवंयजेत्॥ततस्तुमहादेवक्षम
स्वेतिसंहारमुद्रयाविसर्जयेदिति॥नंदिपुराणे॥दुर्गोन्नहिरण्यवस्त्रादिबलिपुष्पनिवेदने॥ज्ञेयोनमः
शिवायेतिमंत्रःसर्वार्थसाधकः॥सर्वमंत्राधिकश्चायमोंकाराद्यःषडक्षरः।तन्मंत्रजापीतत्कर्मरतस्तद्ध
तमानसः॥निःक्रामःपुरुषोराजन्सरुद्रपदमश्नुते॥पंचाक्षरमुपक्रम्यनविष्ये॥अपवित्रःपवित्रोवास
र्वावस्थांगतोपिवा।महापातकसंयुक्तोमंत्रस्यास्यजपेद्यथा॥अधिकारीभवेत्सर्वइतिवेदेब्रवीच्छिवः॥
इतितथार्थः॥पूर्वोक्तिपद्यापदानुरोधात्।यथाधिकारीभवेत्तथाब्रवीदित्यर्थः॥तथा॥सर्वेषामेवपात्रा
णांवरंपात्रंमहेश्वरः।पतंतंत्रायतेयस्मादतीवनरकार्णवात्॥शिवमुद्दिश्ययद्दत्तंसर्वकारणकारणं
।तदनंतफलंदातुर्भवतीतिकिमद्भुतं॥दत्वानैवेद्यवस्त्रादीन्नादंदीतकदाचन।त्यक्तव्यंशिवमुद्दिश्य
तदादानेनतत्फलं॥आदानेग्रहणे॥शिवधर्मे॥तस्मात्पुष्पैःफलैःपत्रैस्तोयैरपिचयत्फलं।तदनंतफलं ६१

ज्ञेयंभक्तिरेवात्रकारणं॥तत्रैव॥लिंगानुलेपनंकार्यंदिव्यगंधैःसुगंधिभिः।वर्षकोटिशतंदिव्यंशिवलोके
महीयते॥शिवधर्मे॥तस्मात्पुष्पप्रदानेनलिंगेषुप्रतिमासुच।अशीतिवर्षकोटीनांदुर्गतिंननरोव्रजेत्॥स्कां
दे॥शुष्काण्यपिचपत्राणिश्रीवृक्षस्यसदैवहि।प्रदातव्यानीतिशेषः॥नविष्ये॥धत्तूरकैश्चयोलिंगंसकृत्पू
जयतेनरः।सगोदानफलंप्राप्यशिवलोकेमहीयते॥बिल्वपत्रैरखंडैश्चयोलिंगंपूजयेत्सकृत्।सर्वपापवि
निर्मुक्तःशिवलोकेमहीयते॥तथा॥सर्वकामप्रदंबिल्वंदारिद्र्यस्यविनाशनं।बिल्वपत्रात्परंनास्तियेनतुष्यति
शंकरः॥तथा॥केशकीटादिविद्धानिनिशिपर्युषितानिच।स्वयंपतितपुष्पाणित्यजेपुरहतान्यपि॥तथा॥देव
दारुसमेतंचसर्जश्रीवासकुंदुरू।श्रीफलंचाज्यसंमिश्रंदत्वाप्नोतिपरांगतिं॥सर्जःशालरसः।श्रीवासःस ग्धा २
रलद्रवः।कुंदुरुःशैलेयमितिस्मार्त्तः॥सद्यनक्षीनिर्यासइतिदामोदरः॥अन्यःसौगंधिकंधूपंषट्सहस्र
गुणोत्तरं।अगुरुंशतसाहस्रंद्विगुणंवासितायुतं।गुग्गुलुंघृतसंयुक्तंसाक्षात्तुष्टिकातिशंकरः॥तथा

आ॰म॰ ६२ तैलेनापि हि यो दद्याद्भक्तिभावेन मानवः। तेन दीपप्रदानेन शिववद्राजते भुवि॥ नंदिकेश्वरे। अथ पन
क्त्वा शिवं पूज्य नैवेद्यमुपकल्पयेत्। यद्यदेवात्मनः श्रेयस्तदीशाय प्रकल्पयेत्। भविष्ये तु। शालितं
डुलप्रस्थं तु कुर्यादन्नं सुसंस्कृतं। शिवाय तं चरुं दद्याच्चतुर्दश्यां समाहितः॥ शैवसर्वस्वे स्कांदे। ए
कमात्रफलं पक्वं यः शिवाय निवेदयेत्। सर्वजित्स महाभोगैः शिवलोके महीयते॥ यो वा कदली॥ शिव
पुराणे। नैवेद्यं घृतसंयुक्तं मधुपर्कं निवेदयेत्। अग्निष्टोमस्य यज्ञस्य फलमाप्नोति मानवः॥ परिप
क्वं सुसंसृष्टं आज्यसिक्तं सुसंस्कृतं। शिवाय मांसं दत्वा तु स्वर्ग एव यत्फलमाप्नुयात्। अशेषफलदानेन यत्फलं
परिकीर्तितं। तत्फलं प्राप्नुयान्नित्यं सर्वमांसनिवेदनात्॥ शिवधर्मे। लिंगवेदी भवेद्देवी लिंगं साक्षान्महेश्व
रः। तयोः संपूजनान्स्यात् तां देवी देवश्च पूजितौ। देवीपुराणे। सव्यं व्रजेत्ततः सव्यं प्रणालं नैव लंघयेत्। एकीन्त
तमनारुह्य यः कुर्यात्त्रिः प्रदक्षिणं। छिन्नस्तेन भवेद्ग्रंथिर्न तस्य पुनरुद्भवः॥ भविष्ये॥ जानुभ्यां चैव पाणिभ्यां ६२

शिरसा च विचक्षणः। नत्वा प्रणमं देवेशो सर्वान्कामानवाप्नुयात्। लिंगपुराणे। गंधधूपनमस्कारैर्मुखवा
द्यैश्च सर्वशः। यो मामर्चयते नित्यं न दानं प्राप्यमहं सदा। महाभारते। सर्वलक्षणहीनोपि युक्तो वा सर्वपात
कैः। सर्वं तरति तत्पापं भावयंशिवमात्मना॥ राघवभट्टधृतं। अधोमुखे वामहस्ते ऊर्ध्वास्यं दक्षहस्तकं। क्षि
प्तांगुलीरंगुलीभिः संयुज्य परिवर्तयेत्। प्रोक्ता संहारमुद्रेयमर्पणे तु प्रशस्यते॥ अर्पणे आत्मनीतिशेषः।
स्कांदे। निर्माल्यं यो हि मद्भक्तः शिरसा धारयिष्यति। अशुचिर्भिन्नमर्यादो नरः पापसमन्वितः। नरके पच्य
ते घोरे तिर्यग्योनौ च संभवेत्॥ ब्रह्महापि शुचिर्भूत्वा निर्माल्यं यस्तु धारयेत्। तस्य पापं महच्छीघ्रं नाशयि
ष्यामहाव्रते। अशुचिः स्नानादिनेत्यर्थः॥ एवं च स्पृष्ट्वा रुद्रस्य निर्माल्यं सवासा आप्लुतः शुचिः इति कालिका
पुराणीयमशुचिविषयं अनुपनीतविषयं वेति स्मार्ताः। बह्वृचगृह्यपरिशिष्टे। अग्राह्यं शिवनिर्माल्यं पत्रं पुष्पं
फलं जलं। शालग्रामशिलास्पर्शात्सर्वं याति पवित्रतां॥ कौर्मे॥ लिंगपूजायां गुणफलसंबंधः॥ लवणेन च सौभा

श्री.म.
६३

यं पार्थिवं सर्वकामिकं। जनैकफलदं भूरि सैकतं परिकीर्त्तितं। ग्रामदं तिलपिष्टोत्थं तुषोत्थं मारणे स्मृतं
॥ अन्नोत्थमन्नदं प्रोक्तं गुडोत्थं शांतिवर्द्धनं। गंधोत्थं गुणदं भूरि शर्करोत्थं सुखप्रदं। वंशांकुरोत्थं वश्या
र्थं गोमयं सर्वरोगहृत्॥ वैश्यास्थिसंभवं लिंगं सर्वशत्रुविनाशनं। आसुरी लवणोत्थं च सर्वलोकवशं
करं। स्तंभने रजनीपिष्टसंभवं लिंगमुत्तमं। तंडुलोद्भवपिष्टस्य लिंगं सर्वसुखप्रदं। दधिदुग्धोद्भवं
लिंगं कीर्त्तिलक्ष्मीसुखप्रदं। धान्यदं धान्यजं लिंगं कीर्त्तिग्रामा— वर्द्धनं। दूर्वागुडूचीसंभूतमल्पमृत्युनि म
वारणं। इक्षुदंडोद्भवं लिंगमुच्चाटनकरं परं। भोगमोक्षनियोगं तु ज्ञात्वा सम्यग्विचक्षणः। वस्त्रमात्रस्य
कवीत लिंगं तत्तत्फलाप्तये। वाक्त्वं विघ्नप्रदं लिंगं स्फाटिकं सर्वकामिकं। विद्यार्थी लिंगसाहस्रं कन्यार्थी त्रि
शतत्रयं। पुत्रार्थी सार्द्धसाहस्रं कीर्त्यर्थी शतपंचकं। सुहृत्कामः सहस्रं तु वस्त्रार्थी शतमष्टकं। उच्चाटनप
रश्चैव यथोक्तं यथोक्तं च सहस्रकं। मारणार्थी सप्तशतं मोहार्थी शतमष्टकं। स्तंभनं तु तदर्द्धेन मरणं तु तदर्द्धकं ६३

निगडान्मुक्तिकामस्तु सहस्रं च समाचरेत्। महाराजभये पंचसहस्रं सर्वकामदं। एकं पापहरं प्रोक्तं द्वि
लिंगं द्विलिंगं कार्यसिद्धिदं। त्रिलिंगं सर्वकामानां मारणं परमाद्भुतं। लिंगानामयुतं वापि महाराज
भये चरेत्। कारागृहविमुक्त्यर्थमनंतं कारयेद्बुधः। डाकिन्यादिभये प्राप्ते सहस्रं कारयेत्तदा। सहस्रा
णां पंचशतं पुत्रकामेन कारयेत्। कृत्वा नित्यं विधानेन सगुणं पुत्रमाप्नुयात्॥ लक्षमेकं तु लिंगानां यः कु
रोति नरोत्तमः शिव एव न वेन्नित्यं नात्र कार्या विचारणा॥ इति शिवागमे लिंगविधानं॥ चमत्कारचिंता
मणौ॥ नार्च्यो गृहे श्मजो मूर्त्तिस्त्र्यंगुलतोधिका। न वितस्त्याधिका धातुसंभवा श्रेयइच्छता॥ पंचसूत्रलिं
गं सिद्धांतशेखरे॥ लिंगमस्तकविस्तारं पूजाभोगसमं नयेत्। नाहं तत्त्रिगुणं कुर्यान्नाहवत्पीठविस्तृतिः॥ पू
जांशात्त्रिगुणं कुर्याद्दुन्नतं पीठमुत्तमं। वृत्तं वा चतुरस्रं वा मध्ये कंठसमन्वितं। द्विगुणं लिंगनाहात्तु कंठनाहं स
माचरेत्। त्रिमेखलमधश्चोर्द्ध्वं समचापद्विमेखलं। लिंगमस्तकविस्तारं षड्भागं विभजेत्ततः॥ मेखलामेकं

गेनकुर्याच्छ्वातंचतत्समं।लिंगदैर्घ्यसमंकुर्यात्प्रणालंपीठबाह्यतः।विस्तारंतत्समंमूलेतदर्द्धंच
तदग्रतः।जलमार्गःप्रकर्त्तव्यस्तस्यमध्येत्रिभागतः।कुर्यात्पीठार्द्धदीर्घंवाप्रणालंचशिवागमादिति
पूजाशलाका।आनोगतच्छ्रता।नाहःपुष्टता।अयमाशयः।लिंगमस्तकव्यासोलिंगोच्छ्रतासमः।व्यासःत्रि
गुणोनाहः।तावानेवपीठव्यासः।पंचचत्वारिंशत्तंचतुरस्रंवा।प्रणालिकाचलिंगव्यासवन्मूलेविस्तृता।अग्रत
दर्द्धातद्द्विगुणासार्द्धावादीर्घेतिचंद्रिकायां।इतिदेवपूजा॥मात्स्ये॥तत्रोपदेष्टारमपिपूजयेच्चततोगुरुं
।नपूज्यतेगुरुर्यत्रनरैस्तत्राफलाक्रिया॥शैवपुराणे॥वस्त्राभरणमाल्यानिशयनान्यासनानिच।प्रि
याणिचात्मनोयानितानिदेयानिवैगुरोरिति॥इतिगुरुपूजा॥ ॥अथवैश्वदेवविधिः॥नृसिंहपुराणे
॥पौरुषेणचसूक्तेनततोविष्णुंसमर्चयेत्।वैश्वदेवंततःकुर्याद्बलिकर्मतथैवचेति।शातातपः॥वैश्वदे
वःप्रकर्त्तव्यःपंचसूनापनुत्तये।इति।सूनाहिंसास्थलं।यमः।पंचसूनागृहस्थस्यवर्त्ततेहरहःसदा।खं ६४

डनीपेषणीचुल्लीजलकुंभअवस्करइति॥खंडनीउलूखलमुशलादि।अवस्करउत्करः।उपस्करइ
तिपाठेसूर्पचालन्यादि।वृद्धवसिष्ठः॥अनग्निकस्तुयोविप्रःसोन्नंव्याहृतिभिःस्वयं।कृत्वाशाक
लमंत्रैस्तुशिष्टाद्भूतबलिंहरेत्।अनग्निकोभार्याभावेनश्रौतस्मार्त्ताग्निपरिग्रहाधिकारशून्यः
।कर्मप्रदीपे।अग्न्यादिर्गौतमेनोक्तोहोमःशाकलएवच।अनाहिताग्नेरेषयुज्यतेबलिभिःसह।
अग्न्यादिरग्निवाय्वादिदेवत्यभूरादिव्याहृतिकरणकः।अपिरेवकारार्थे।विष्णुः।अन्नंव्याहृति
भिर्हुत्वापूजयेदिति।पिंततः।प्रजापतिरिहविरितिप्रजापतयेस्वाहेतिहुत्वेत्यर्थः।पूजयेदितितुस्व
कालीनमनुष्ययज्ञानुवादमात्रं।नतुहोमोत्तरंतद्विधिः।ज्योतिष्टोमेशाकलहोमांगभूतादेवकृत
स्येनसोवयजनमसीत्याद्याःषट्शाकलमंत्राःकातीयानांप्रसिद्धाः।आश्वलायनः।अथसायंप्रा
तःसिद्धस्यहविष्यस्यजुहुयादग्निहोत्रदेवताभ्यःसोमायवनस्पतयेअग्नीषोमाभ्यामिंद्राग्निभ्यां

आ॰म॰
५५

द्यावापृथिवीभ्यां धन्वंतरये इंद्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे स्वाहेति। सायंशब्दो रात्रिपरः प्रातः
शब्दोऽहःपरः सिद्धस्य पक्वस्य। अग्निहोत्रे देवताभ्य इति। सायमग्निः प्रातः सूर्यः प्रजापतिरुभ
यत्र। सोमाय वनस्पतय इत्येकाहुतिः। वनस्पतिशब्दस्य यौगिकत्वेन विशेष्यापेक्षत्वेनास
मासस्य सन्निहितसोमपदान्वयात्। यथा पात्नीवतमालभेतेत्यत्र पात्नीवतशब्दस्य त्वाष्ट्रप
दान्वयः। अग्निर्बृहस्पतिः सोमो वनस्पतिरित्यादौ वनस्पतेर्गुणत्वदर्शनाच्च। विश्वेभ्यो देवे
भ्य इत्यप्येकैवाहुतिः। विश्वनाम्नो सर्वनाम्नो बुद्धिस्थापेक्षत्वेन सन्निहितदेवशब्दान्वयात्। ए
वं दशाहुतयो भवंति। वृत्तिकृतो नारायणस्याप्ययमेवाशयः॥ इत्येष देवयज्ञः॥ भूतयज्ञमाह॥ त
स एव। अथ बलिहरणमेताभ्यश्चैव देवताभ्यो अद्भ्य ओषधिवनस्पतिभ्यो गृहाय गृहदेवताभ्यो
वास्तुदेवताभ्य इंद्रायेंद्रस्य पुरुषेभ्यो यमाय यमपुरुषेभ्यो वरुणाय वरुणपुरुषेभ्यः सोमाय सोम ५५

पुरुषेभ्य इति प्रतिदिशं ब्रह्मणे ब्रह्मपुरुषेभ्य इति मध्ये विश्वेभ्यो देवेभ्यः सर्वेभ्यो भूतेभ्यो दिवा
चारिभ्य इति दिवा नक्तंचारिभ्य इति नक्तं रक्षोभ्य इत्युत्तरतः। अथानंतरं। एताभ्यः पूर्वोक्ताभ्यो
दशभ्यः। चकारो वक्ष्यमाणसमुच्चये। उदग्रैं द्राह्वलेरिंद्रपुरुषेभ्यो बलिंहरेदिति कारिकोक्तेः। इंद्रा
दिप्रधानदेवतोत्तरदेशेषु तत्पुरुषेभ्यो बलिं। पूर्वोक्तदशाहुतिदेवताभ्यो बलीन् प्राक्संस्थान्दत्वा
क्रिंचिद्दलं त्यक्त्वाद्भ्य इत्यादिभ्यो बलिं दत्वांतराले प्राग्दिक्षु इंद्रादिभ्यस्तत्पुरुषेभ्यश्च दत्वा तन्म
ध्ये ब्रह्मणे तच्चतुर्दिक्षु ब्रह्मपुरुषादिभ्यो दद्यात्। प्रथमं दिवाचारिभ्यो वत्युक्ते वैश्वदेवः प्रातरार
भ्य इति वृत्तौ॥ इति भूतयज्ञः॥ पितृयज्ञमाह॥ स्वधा पितृभ्य इति प्राचीनावीती शेषं दक्षिणा निन
येत्। शेषग्रहणादानंतर्यं परप्रयुक्तं च द्रव्यं लभ्यते दक्षिणा दक्षिणस्यां दिशि। दक्षिणाग्रा च॥ इति पि
तृयज्ञः॥ इदमेव कर्मत्रयं वैश्वदेवशब्दवाच्यं। कारिका। गृहस्थो वैश्वदेवाख्यं कर्म प्रारभते दिवा। तत्रै

आ॰म॰ नास्यत्रनगवद्दत्तिकारवचोयथा।औपासनाग्निमन्यंवासमध्यायहविर्भुजं।पर्युक्ष्यपरिषिच्या
६६ ग्निंअलंकृत्यचपूर्ववत्।हविष्यंपक्वमादध्याद्दधिमिश्रित्यानलेचनत्।प्रोक्ष्योद्वास्यघृताभ्यक्तंउदिस
दे३ वंनिधायचाज्ञुत्वोद्धस्तेनसूर्यायेत्यादिभिर्मंत्रैर्जिस्ततः।प्रजापतिपदस्योक्तिर्वैश्वदेवेनत्रस्मृतिः॥
पर्यूहनोक्षणेकुर्यात्देवयज्ञोयमीरितः।एवैर्भुविबलीन्दत्वाप्राक्संस्थान्नानिरंतरान्।मुक्तांत
रालंप्राक्संस्थानश्चइत्यादिभिर्हरेत्।इहापिनवतिस्वाहाकारोनपितृयज्ञोक्तः।अश्योहृताद्बलेःप्र
त्यगिंद्रायेतिबलिंहरेत्॥उदगैंद्राद्बलेरिंद्रपुरुषेभ्योबलिंहरेत्।यमायेत्यंतरालस्यहरेद्दक्षिणतो
बलिं।याम्याद्बलेरुदग्याम्यपुरुषेभ्योबलिंहरेत्।प्राग्ब्रह्मणेबलेर्हुत्वावरुणायेतिमंत्रतः।तस्माद
दक्तुवरुणपुरुषेभ्योबलिंहरेत्।सोमायेत्यंतरालस्यहरेदुत्तरतोबलिं।सौम्याद्बलेरुदक्सोमपुरु
हस्वा॰१ षेभ्योबलिंहरेत्।जयंतस्त्वांहांतैर्बलीन्हुत्वानिरंतरान्।मुक्तांतरालमिंद्रादिदिग्देवानांबलीन् ६६

हरेत्।इंद्रादिबलितःपूर्वंप्राच्यांस्यात्पौरुषोबलिः।अंतरालेबलीन्हुत्वाशिष्टैर्मंत्रैरतःपरं।रक्षोभ्य
इतिसर्वस्माद्बलिमुत्तरतोहरेत्।भूतयज्ञोयमुदितःप्राचीनावीत्यतःपरं।स्वधापितृभ्यइत्युक्त्वाद
क्षिणस्यांतुनिर्वपेदिति।अयंचनराकारःसंपद्यते।चक्राकारमप्याहशौनकः।चक्राकारेणयोविप्रः
सदाभूतबलिंहरेत्।सर्वपापविनिर्मुक्तोविष्णुसायुज्यमाप्नुयादिति।अथगृहबलिः।शौनकः॥देव
यज्ञान्नशेषात्तुगृहद्वारादिषुक्षिपेत्।चंडालपतितादिभ्योभूयज्ञान्नशेषतः॥पितृयज्ञान्नशेषेणवाय
सेभ्योबलिंहरेदिति।गृह्यपरिशिष्टे।अथास्यशेषेणगृहदेवतानांबलिद्वारेपितामहायप्रक्लीलेरुद्रायाथ
गृहशाच्यादिप्रतिदिशंसनयहायेंद्रायबलनद्रायथमविष्णुभ्यांस्कंदवरुणाभ्यांसोमसूर्याभ्यामश्विभ्यां
वसुभ्योनक्षत्रेभ्योथमध्येवास्तोष्पतयेब्रह्मणेप्रागादिभित्तिमूलेषुसिद्धोप्टश्रीश्रियेभद्रकाल्यैवरुणायोद
धानेभ्विन्यांदृषदुपलयोर्द्यावापृथिवीभ्यामुलूखलमुसलयोरथानिष्क्रम्यनमावपआसिच्यस्वर्वा

आ॰म॰
६१

डालपतितभूतवायसेभ्योन्नं भूमौ विकिरेद्ये भूताः प्रचरंति दिवा बलिमिच्छंतो वित्तदस्य प्रेष्टाः। तेभ्यो बलिं
पुष्टिकामो ददामि। मयि पुष्टिं पुष्टिपतिर्ददात्विति रात्रौ चेन्नक्तं बलिमिति ब्रूयादपप्रक्षालिपाणिपादआच
म्य शांता पृथिवी शिवमंतरिक्षमिति जप्त्वान्यानि च स्वस्त्ययनानि ततो मनुष्ययज्ञपूर्वकं भुंजीतेति॥ इति वै
श्वदेवविधिः॥ ॥अथ मनुष्ययज्ञः॥ मनुः॥ अतिथिभ्योन्नदानं तु नृयज्ञः स तु पंचम इति। मार्कंडेय
पुराणे॥ आचम्य न ततः तेकुर्यात्प्राज्ञो द्वारावलोकनं। मुहूर्तस्याष्टमं भागमुदीक्ष्यो ह्यतिथिर्भवेत्। न मित्रम
तिथिं कुर्यान्नैकग्रामनिवासिनं। अज्ञातकुलनामानं तत्कालेसमुपस्थितं। बुभुक्षुमागतं श्रांतं याचमान
मकिंचनं। ब्राह्मणं प्राहुरतिथिं संपूज्यः शक्तितो बुधैः॥ कौर्मे॥ हंतकारमथाग्रं वा भिक्षां वा शक्ति
तो द्विजः। दद्यादतिथये नित्यं बुध्येत परमेश्वरमिति। अतिथिं परमेश्वरं भावयेदित्यर्थः॥ मनुः॥ ग्रासमात्रं भ
वेद्भिक्षा अग्रं ग्रासचतुष्टयं। अग्रं चतुर्गुणीकृत्य हंतकारो विधीयत इति। पराशरः॥ दद्याच्च भिक्षा त्रितयं ६७

परिव्राड्ब्रह्मचारिणे। इच्छया च ततो दद्याद्विभवे सत्यवारितमिति॥ माधवीये पुराणे॥ यत्फलं सोमया
गेन प्राप्नोति धनवान्द्विजः। सम्यक्पंचमहायज्ञैर्दरिद्रस्तदवाप्नुयादिति॥ व्यासः॥ पंचयज्ञांस्तु यो मो
हान्न करोति गृहाश्रमी। तस्य नायं च न परो लोको भवति धर्मत इति॥ अथ कात्यायनीयो वैश्वदेवानुष्ठान
प्रयोगः॥ पंचमहायज्ञनिमित्तं मातृपूजापूर्वकमाभ्युदयिकश्राद्धं कृत्वा वैश्वदेवार्थं पाकं विधाय समु
दृत्याग्निं धार्य पश्चादग्नेः प्राङ्मुख उपविश्य दक्षिणं जान्वाच्य मणिकोदकेनाग्निं पर्युक्ष्यौदनमादाय
ब्रह्मणे स्वाहा इदं ब्रह्मणे। प्रजापतये स्वाहा इदं प्रजापतये। गृह्याभ्यः स्वाहा इदं गृह्याभ्यः कश्यपाय
स्वाहा इदं कश्यपाय। अनुमतये स्वाहा इदमनुमतये। इति पंचाहुतीर्हुत्वा मणिकसमीपे हुतशेषेणब्र
न पर्जन्याय नमः। इदं पर्जन्याय। अद्भ्यो नमः। इदमद्भ्यः। पृथिव्यै नमः। इदं पृथिव्यै। इति प्राक्संस्थमुद
क्संस्थं वा बलिं दत्वा दक्षिणोत्तरयोर्द्वारशाखयोर्यथाक्रमं धात्रे नमः। इदं धात्रे। विधात्रे नमः। इदं विधा

आ॰ म॰
६८

न्ये। इतिबलिद्वयंदत्वाप्रागादिक्रमेणवायवेनमः इदंवायवे। इतिदिशंबलिचतुष्टयंदत्वाप्राच्यैदि
शेनमः॥ इदंप्राच्यै। दक्षिणायैदिशेनमः इदंदक्षिणायै। प्रतीच्यैदिशेनमः इदंप्रतीच्यै। उदीच्यैदिशे
नमः इदमुदीच्यै। इतिदिग्भ्यश्चबलिंदत्वातदंतरालेब्रह्मणेनमः। इदंब्रह्मणे। अंतरिक्षायनमः।
इदमंतरिक्षाय। सूर्यायनमः इदंसूर्याय इतिबलित्रयंदत्वा। तदुत्तरतोविश्वेभ्योदेवेभ्योनमः। इ
दंविश्वेभ्योदेवेभ्यः। विश्वेभ्योभूतेभ्योनमः। इदंविश्वेभ्योदेवेभ्यः। विश्वेभ्योभूतेभ्योनमः इदंविश्वेभ्योभू
तेभ्यः इतिबलिद्वयंदत्वातयोरप्युत्तरतोउषसेनमः इदमुषसे। भूतानांपतयेनमः इदंभूतानांपतये॥
इतिबलिद्वयंदत्वाब्रह्मादिबलीनांदक्षिणतः प्राचीनावीतीदक्षिणामुखः पितृभ्यः स्वधानमः इति
मंत्रेणपात्रावशिष्टान्नेनैकंबलिंदत्वापात्रींप्रक्षाल्ययक्ष्मैतत्तेनिर्णेजनंनमः इतिनिर्णेजनजलंवाय
व्यांदिश्युत्सृज्येदंयक्ष्मणे इत्युक्त्वा। ऐंद्रवारुणवायव्याः सौम्यावैनैर्ऋतास्तथा। वायसाः प्रतिगृह्णंतु ६८

भूमौपिंडंमयार्पितं। इदंवायसेभ्यः। द्वौश्यामौशर्बमशबलौवैवस्वतकुलोद्भवौ। ताभ्यांपिंडंप्रदा
स्यामिस्यातामेतावहिंसकौ। इदंश्वभ्यः। देवामनुष्याः पितरोवयांसिसिद्धाश्चयक्षोरगदैत्यसंघाः
प्रेताः पिशाचास्तरवः समस्तायेचान्नमिच्छंतिमयाप्रदत्तं। इदंदेवादिभ्यः। पिपीलिकाः कीटप
तंगकाद्याबुभुक्षिताः कर्मनिबंधबद्धाः। तृप्त्यर्थमन्नंहिमयाप्रदत्तंतेषामिदंतेमुदिताभवंतु
इदंपिपीलिकाः कीटपतंगकाद्याबुभुक्षिताः कर्मनिबंधबद्धाः। तृप्त्यर्थमन्नंहिमयाप्रदत्तंतेषामि
दंतेमुदिताभवंतु॥ इदंपिपिलिकादिभ्यः। इतिकाकादिबलीन्बहिर्दत्वापादौप्रक्षाल्याचम्याति
थिप्राप्तौपादप्रक्षालनपूर्वकंगंधमाल्यादिभिरभ्यर्च्यान्नंपरिविष्येदंततेन्नमिदंमनुष्यायेतिसं
कल्प्यदद्यादितिदिक्। इतिकृतनीयवैश्वदेवः। इतिपंचमहायज्ञाः॥ अथभोजनं॥ व्यासः॥ पंचार्द्रो
भोजनंकुर्यात्प्राङ्मुखोमौनमास्थितः। हस्तौपादौतथैवास्यमेषुपंचार्द्रतामतेति। आश्वमेधिके॥

त्याय २

आ॰म॰ आर्द्रपादस्तु भुंजीयात्प्राङ्मुखश्चासने शुचौ। पादाभ्यां धरणीं स्पृष्ट्वा पादेनैकेन वा पुनरिति।
६६ बौधायनः॥ उपलिप्ते समे स्थाने शुचौ श्लक्ष्णासनान्विते। चतुरस्रं त्रिकोणं च वर्तुलं चार्द्धचंद्रकं
।कर्तव्यमानुपूर्व्येण ब्राह्मणादिषु मंडलं। पैठीनसिः॥ सौवर्णे राजते ताम्रे पद्मपत्रपलाशयोः। भाज
ने भोजनं कुर्वन् त्रिरात्रफलमश्नुते॥ एक एव तु यो भुंक्ते विमले कांस्यभाजने। चत्वारि तस्य वर्द्धंते आ
युः प्रज्ञा यशो बलमिति॥ पद्मपलाशपत्रेषु गृही भुक्त्वैंदवं चरेत्। ब्रह्मचारियतीनां तु चांद्रायणं प्र
त्नं न वेदितिवृद्धमनुव्यासोक्तेरिति मदनादयः॥ पलाशो वध्री पलाश इति। स्मृत्यर्थसारे। कांस्य
पात्रं गृहिमात्रपरं। तांबूलाभ्यंजनं चैव कांस्यपात्रे च भोजनं। यतिश्च ब्रह्मचारी च विधवा च विवर्ज
येदिति॥ श्वेतकेतुः॥ पात्रं प्राणाहुतिग्रहणोत्तरं यंत्रादौ स्थाप्यं। न्यस्तपात्रस्तु भुंजीत पंचग्रा
सान्महामुने। शेषमुद्धृत्य भोक्तव्यं पित्रर्थं तु न चोद्धरेदिति व्यासोक्तेः। न्यस्तपात्रो भून्यस्तपात्रः। उ ६७

द्धृत्य यंत्रादौ स्थाप्य। पित्रर्थे श्राद्धे भूमितो नोद्धरेदित्यर्थ इति मदनादयः॥ तथा ब्रह्मपुराणे॥ पित्र्ये
कर्मणि भुंजानो भूमौ पात्रं न चालयेदिति। तत्रैव॥ अन्नं दृष्ट्वा प्रणम्यादौ प्रांजलिः कथयेत्ततः। अस्मा
कं नित्यमस्त्वेतदिति भक्त्याथ वंदयेदिति। गोभिलः॥ अथातः प्राणाहुतिकल्पः॥ व्याहृतिभिर्गायत्र्याभि
स॰४ मंत्रितं त्वा सत्येन परिषिंचामीति सायं। सत्यं त्वर्तेन परिषिंचामीति प्रातरित्यादि। तदनंतरकृत्यमुक्तं
भविष्यपुराणे॥ भोजनात्किंचिदन्नाग्रं धर्मराजाय वै बलिं। दत्वाथ चित्रगुप्ताय प्रेतेभ्यश्चेदमुच्चरेत्।
यत्र क्वचन संस्थानां क्षुत्तृष्णोपहतात्मनां। प्रेतानां तृप्तये ह्यक्षय्यमिदमस्तु यथासुखमिति। तदनंत
रकृत्यमाह॥ याज्ञवल्क्यः॥ अपोशानेनोपरिष्टादधस्तादश्नता तथा। अनग्नममृतं चैव कार्यमन्नं द्वि
जातये। कौर्मे॥ अमृतोपस्तरणमसीत्यपोशानक्रियां चरेदिति। शौनकः॥ स्वाहांताः प्रणवाद्याश्च नाम्ना
मंत्रास्तु वायवः। तर्जनीमध्यमांगुष्ठलग्ना प्राणाहुतिर्भवेत्। मध्यमानामिकांगुष्ठैरपाने जुहुयात्ततः॥

आ॰म॰ ७०

कनिष्ठानामिकांगुष्ठैर्व्यानेचजुहुयात्ततः। तर्जनीं तु बहिष्कृत्य उदानेजुहुयाद्बुधः। समानेसर्वहस्ते
नसमुदायाहुतिर्भवेत्। जिह्वयैवग्रसेदन्नं दशनेनंनसंस्पृशेत्। इति॥ जिह्वाग्रसेनचविशेषउक्तआ
श्वमेधिके॥ यथारसंनजानातिजिह्वाप्राणाहुतौनृप। तथासमाहितःकुर्यात्प्राणाहुतिमतंद्रितइति।
विष्णुपुराणे॥ अश्नीयात्तन्मनाभूत्वा भुंजीतमधुरंरसं। लवणाम्लौतथामध्येकटुतिक्तादिकांस्ततः॥ प्रा
ग्द्रवंपुरुषोश्नीयान्मध्येचकठिनाशनं। अंतेपुनर्द्रवाशीतुबलारोग्येर्नमुंचति। अष्टौग्रासामुनेर्भक्ष्याः
षोडशारण्यवासिनः। द्वात्रिंशत्तुगृहस्थस्यअमितंब्रह्मचारिणइति॥ वृद्धमनुः॥ भोजनंतुननिःशेषंकु
र्यात्प्राज्ञःकथंचन। अन्यत्रदधिसक्त्वाज्यपललक्षीरमध्वपइति। पललंतिलमुद्गमिश्रओदनः। मनुः॥
सायंप्रातर्द्विजातीनामशनंश्रुतिचोदितं। नांतराभोजनंकार्यमग्निहोत्रसमोविधिरिति। अत्रपूर्वार्द्धेका
लद्वयविशिष्टभोजनक्रियायाएवनियमविधिः। षोडशर्त्तुर्निशाःस्त्रीणांतस्मिन्युग्मासुसंविशेदितिवत् ७०

अतःसत्यांबुभुक्षायांसतिचान्नेभोजनमकुर्वन्प्रत्यवैतीतिविज्ञानेश्वरः॥ सायंप्रातरेवेति
कालांतरपरिसंख्येतिहरदत्तः। इयंचतदुपपादितनिर्णयंत्रिदोषा। कालांतरस्यविध्यप्राप्तत्वेनशास्त्र
प्राप्तबाधरूपदोषाभावात्। पंचपंचनखाभक्ष्याइत्यत्रैवशशादिभिन्नश्वादिपंचनखभक्षणस्यराग
प्राप्तत्वेनतद्बाधेपिदोषाभावः। स्वार्थहानिपरार्थकल्पनादोषद्वयवतीलक्षणात्तुनांतरेत्यादि
कवाक्यतानुरोधेनांगीकार्या। सोप्येवसाजातपुत्रःकृष्णकेशोग्नीनादधीतेत्यत्रवयोविशेषस्य।
अर्द्धमंतर्वेदिमिनोत्यर्द्धंबहिर्वेदीत्यत्रचसंधिदेशस्यलक्षणावाक्यभेदभियातत्रतत्रतंत्रे। सायं
प्रातर्भुंजीतैवेतिनियमविधौहिमध्येपिभोजनस्यप्राप्तत्वेनतन्निषेधार्थंनांतरेत्यादिपृथग्वाक्य
स्यादिति। अहंतुब्रुवे। नांतरेत्यादिकमेवविधिप्रत्यययुक्तत्वादंतरालकालनिषेधकं। पूर्वार्द्धंत्वर्थ
वादोंतपादश्च। तदुक्तावेवसायंप्रातःशब्दावंतराशब्दार्थनिरूपकौ। संदिग्धेषुवाक्यशेषादितिन्या

यात्॥ जामि वा एतद्यज्ञस्य क्रियते यदन्वंचौ पुरोडाशावुपांशुयाजमंतरा यजतीत्यत्रैवांतरशब्दा
र्थस्य पुरोडाशाविति। एवं च सायंप्रातःपदयो रात्रिमध्याह्नलक्षणपि युक्तौ। उपास्य पश्चिमां सं
ध्यां हुत्वाग्नीस्तानुपास्य च। भृत्यैः परिवृतो भुक्त्वा नातितृप्तोऽथ संविशेत्। मध्यंदिनो मनुष्याणां।
मध्यंदिने मनुष्या अशनमन्यवहरंतीत्यादिवाक्यप्राप्तानुवादत्वात्। पूर्वमतद्वये तु विधौ लक्ष
णातिक्लिष्टेति दिक्। भोजने च पंचग्रासभक्षणं तं मौननियमः। ततस्त्वनियमः। पंचग्रासान्म
हामौनं प्राणाद्याप्यायनं मदृदिति वृद्धमनूक्तेः। पुराणे। स्नातस्य तो वारुणः शक्तिं भुंजतोग्निः श्रियं
हरेत्। भुंजंतो मृत्युरायुष्यं तस्मान्मौनं त्रिषु स्मृतमिति। अत्र च विशेषः पृथ्वीचंद्रोदये स्मृतिरत्नाव
ल्यां। यवीयान्यपितापत्नमुक्त्वा आह्निकभोजनं। प्राणाग्निहोत्रादन्यत्र नासौ मौनं समाचरेदिति
।मौनी वाप्यथ वामौनी प्रहृष्टः संयतेंद्रियः। भुंजीत विधिवद्विप्रो न चोच्छिष्टानि चापयेदिति।न ७१

प्रकिरेदित्यर्थः। पैठीनसिः। लवणं व्यंजनं चैव घृतं तैलं तथैव च। लेह्यं पेयं च विविधं हस्तदत्तं न
भक्षयेदिति। स एव। दर्व्या दियं घृतान्नं तु समस्तव्यंजनानि तु। यथा। उदकं यच्च पक्वान्नं यो दर्व्या दा
तुमिच्छति। स भ्रूणहा सुरापश्च स स्तेनो गुरुतल्पग इति। शातातपः। हस्तदत्तानि चान्नानि प्रत्यक्षं
लवणं तथा। मृत्तिकाभक्षणं चैव गोमांसाशनवत्स्मृतमिति। आश्वमेधिके। उदक्यामपि चंडालं
श्वानं कुक्कुटमेव च। भुंजानो यदि पश्येत्तु तदन्नं तु परित्यजेत्। केशकीटावपन्नं च मुखमारुतवीजि
तं। अन्नं तद्राक्षसं विद्यात्तस्मात्तत्परिवर्जयेत्। शातातपः। अन्यासनोपविष्टस्य यो भुंक्ते प्रथमं द्वि
जः। बहूनां पश्यतां सोज्ञः पंक्त्या हरति किल्बिषं। गोभिलः। एकपंक्त्युपविष्टानां विप्राणां सह भोजने
।यद्येकोपि त्यजेत्पात्रं नाश्नीयुरितरे पुनः। मोहात्तु भुंक्ते यस्तत्र तत्र सांतपनं चरेत्। भुंजानेषु तु विप्रे
षु यस्तु पात्रं परित्यजेत्। भोजने विघ्नकर्त्तासौ ब्रह्महापि तथोच्यत इति। इदं च गुरुभिन्ने आचांते तु

आ॰म॰ ७२

च्छिते वा बोध्यं। तदाहोशना॥ अगुरुशिराश्च मनोज्ञानं चेति। पंक्तिस्थानां भोजननिषेधप्रयोज
कमिति। शेषः। अयं च निषेधो युगांतरपरः। उच्छिष्टस्यापि वर्जनमिति कलिनिषिद्धेषु पाठादि
ति केचित्। तन्न। एकस्मिन्नुच्छिते पीतरपात्रस्थान्नस्योच्छिष्टत्वाभावेन तद्वर्जनाप्रसक्तेः। वस्तुत
स्तु उच्छिष्टस्यापवर्जनमिति पाठः। तदर्थस्तु। अपवर्जनं दानं। तन्नु ब्राह्मणयोरगुच्छिष्टप्रय
छेदिति मधुपर्के प्रसक्तं कलौ निषिध्यते। निरणायि चेदं चारचरणैः कलिवर्ज्यविवेके। बृहस्प
॥पतिः। न स्पृशेद्वामहस्तेन भुंजानोन्नं कदाचन। न पादौ न शिरो वस्तिं न पदा भाजनं स्पृशेदिति
।आदित्यपुराणे। नोच्छिष्टो ग्राहयेदाज्यं मधा शिष्टं न संत्यजेत्। स्वदनुक्तावशिष्टं तु नाद्याद्धां
उच्छितं त्वपीति। ब्रह्मपुराणे। यस्तु पाणितले भुंक्ते यश्च फूत्कारसंयुतं। प्रसृतांगुलिभिर्यश्च
तस्य गोमांसवच्च तत्। नाजीर्णे भोजनं कुर्यात् कुर्यान्नातिबुभुक्षितः। नार्द्रवासा नार्द्रशिरा देवाल ७२

यगतोथवा। न प्रसारितपादस्तु पादारोपितपाणिमान्। न वेष्टितशिराश्चापि नोत्संगकृतभाज
नः। ग्रासशेषं न चाश्नीयात् पीतशेषं पिबेन्न च। शाकमूलफलेक्षूणां दंतछेदैर्न भक्षयेत्। बहूनां भुं
जतां मध्ये नाश्नीयात्त्वरान्वितः। वृथा न विकिरेदन्नं नोच्छिष्टः क्वचिद्व्रजेत्। वृद्धमनुः। न पिबेन्न
च भुंजीत द्विजः सव्येन पाणिना। नैकहस्तेन च जलं शूद्रेण वर्जितं पिबेत्। पिबतो यत्पतेत्तोयं भाज
ने मुखनिःसृतं। अभोज्यं तद्भवेदन्नं भोक्ता भुंजीत किल्बिषं। पीतावशेषितं तोयं ब्राह्मणेन पुनः पि
बेत्। पिबेद्यदि हि तत्तोयं द्विजश्चांद्रायणं चरेदिति॥ कौर्मे॥ नार्द्धरात्रे न मध्याह्ने नाजीर्णे नार्द्रवस्त्र
धृक्। न भिन्नभाजने चैव न भूम्यां न च पाणिषु। नोच्छिष्टो घृतमादद्यान्न मूर्धानं स्पृशेन्नपि। न ब्रह्म कीर्तय
न्नापि न निःशेषं न भार्यया। नांधकारे न चाकाशे न च देवालयेष्वपि। भार्ययेति सहयोगे तृतीया। शा
तातपः॥ उद्धृत्य वामहस्तेन यत्तोयं पिबति द्विजः। सुरापानेन तत्तुल्यं मनुराह प्रजापतिः॥ अत्रिः॥

तोयं पाणिनखस्पृष्टं ब्राह्मणो न पिबेत्क्वचित्। सुरापानेन तत्तुल्यं इत्येवं मनुरब्रवीत्। याज्ञवल्क्यः
संधिन्यनिर्दशावत्सागोपयः परिवर्जयेत्। औष्ट्रमेकशफं स्त्रैणं आरण्यकमथाविकमिति। औ
ष्ट्रमिति विकारमात्रे तद्धितः। तेनोष्ट्रसंबंधिमांसाद्यपि निषिद्धं। गोतमः॥ गोश्च क्षीरमनिर्दशा
याः सूतके ऽजामहिष्योश्च नित्यमाविकमपेयमौष्ट्रमैकशफं च स्यंदिन्ययमसूसंधिनीनां विवत्सा म
याश्चेति। अत्र विवत्साया गोरेव वर्ज्यं न महिष्यादेरपि। गोत्वसमवापिवयोविशेषस्यैव वत्सपर
शक्यत्वेन महिष्याद्यपत्ये तदप्रसक्तेः। एतेन विवत्सागवादिरिति हरिदत्तीयमादिपदं परास्तं।
स्यंदिनी प्रस्रवत्स्तनी। यमसूर्यमलजननी संधिनी सगर्भा। सायंप्रातर्वातिक्रम्य या दुग्धे सा यो
जितान्यवत्सा वा। अंत्यव्याख्याने विवत्सापदं पुनरुक्तमिति केचित्। तन्न। तदर्थयोः परस्परव्य
भिचारात्। विज्ञानेश्वरोप्येवमेवाभिप्रैति। ल्लोक्रगोतमः। कदालच्चमणग्रावचक्रस्योलूखल

स्य च। एतेषां निनदो यावत्तावत्कालमभोजनं। कात्यायनः। चंडालपतितोदक्या वाक्यं श्रुत्वा द्वि
जोत्तमः। भुंजीत ग्रासमात्रं तु दिनमेकमभोजनं। अप्येकपंक्त्यां नाश्नीयात् ब्राह्मणैः स्वजनैरपि। को
हि जानाति किं कस्य प्रच्छन्नं पातकं भवेत्। एकपंक्त्युपविष्टानां दुष्कृतं यद्दुरात्मनां। सर्वेषां तत्समं ता
वद्यावत्पंक्तिर्न भिद्यते॥ अग्निना भस्मना चैव स्तंभेन सलिलेन वा। द्वारेणैव च मार्गेण पंक्तिभेदो बु
धैः स्मृत इति॥ पराशरः॥ यो वेष्टितशिरा भुंक्ते यो भुंक्ते दक्षिणामुखः। वामपादकरः स्थित्वा तद्वै रक्षां
सि भुंजते॥ इति॥ वामपादे करो यस्येत्यर्थः। स्थित्वानुपविश्य। मनुः। आयुष्यं प्राङ्मुखो भुंक्ते।
ऋतं भुंक्ते उदङ्मुखः। यशस्यं दक्षिणामुखः। श्रियं प्रत्यङ्मुखो भुंक्ते ऋतं भुंक्ते उदङ्मुखः॥ इति॥
दक्षिणामुखनिषेधस्तु काम्यभोजनपरः। अथ भोजनोत्तरांगानि॥ देवलः। भुक्तोच्छिष्टं समादाय स
र्वस्मात्किंचिदाचमनात्। उच्छिष्टभागधेयेभ्यः सोदकं निर्वपेद्भुवि इति। तत्र मंत्रः। रौरवे ऽपुण्यनिल

येपञ्चार्बुदनिवासिनां।उच्छिष्टोदकमिच्छूनां अक्षय्यमुपतिष्ठतामिति॥ व्यासः। ततस्तृप्तः
सन्नमृतापिधानमसीत्यपःप्राश्य तस्माद्देशान्मनागपसृत्य विधिवदाचामेदिति श्लोकगौतमः। गंडू
षस्याथसमये तर्जन्या वक्त्रचालनं कुर्वीत यदि मूढात्मा रौरवे नरके पतेदिति तथा। तस्मिन्नाचमनं कुर्या
द्यत्र भांडं यथा भुक्तवान्यावच्च तिष्ठति नाचांतो मुक्तं वा नासनात्ततः। स्नानं सद्यः प्रकुर्वीत सोन्यथा प्रयतो
भवेदिति व्यासः। हस्तं प्रक्षाल्य गंडूषं यः पिबेदविचक्षणः। स देवांश्च पितॄंश्चैव स्वात्मानं चैव घातयेदिति
कौर्मे। आचांतः पुनराचामेदायं गौरिति मंत्रतः। गंडुपदीं वा त्रिरावृत्य सर्वपापप्रणाशिनीं। प्राणानां ग्रंथि
रसीत्यालभ्येत हृदयं ततः। आचम्यांगुष्ठमात्रं च पादांगुष्ठे तु दक्षिणे। निस्रावयेद्धस्तजलमूर्ध्वहस्तः समाहि
तः। कृतानुमंत्रणं कुर्याद्धृद्धायामिति मंत्रतः। अक्षरेणस्वात्मानं योजयेद्ब्रह्मणेति हि। सर्वेषामेव यागाना
मात्मयागः परः स्मृतः। योनेन विधिना कुर्यात्स याति ब्रह्मणः पदमिति। विष्णुपुराणे। विष्णुरन्नं तथैवान्नं परि ७४

णामश्च वै तथा। सत्येन तेन वै भुक्तं जीर्यत्वन्नमिदं तथा। इत्युच्चार्य स्वहस्तेन परिमृज्यात्तथोदरं। अनायास
प्रदायीनि कुर्यात्कर्माण्यतंद्रित इति॥ अत्रिः। आचांतोप्यशुचिस्तावद्यावत्पात्रमनुद्धृतं। उद्धृतेप्यशुचिस्ता
वद्यावन्नोन्मृज्यते मही। भूमावपि हि लिप्तायां तावत्स्यादशुचिः पुमान्। आसनादुच्छितस्तस्माद्यावन्न स्पृश
ते महीमिति। मार्कंडेये। भूमौ पाचम्य कर्तव्यं न तत्तांबूलभक्षणमिति। वसिष्ठः। सुपूगं च सुपत्रं च
चूर्णेन च समन्वितं। अदत्वा द्विजदेवेभ्यस्तांबूलं वर्जयेद्बुधः॥ एकपूगं सुखारोग्यं द्विपूगं निःफलं भवेत्॥
अतिश्रेष्ठं त्रिपूगं च अत्यधिकं नैव दुष्यति। पर्णमूलेन व्याधिः पर्णाग्रे पापसंभवः। चूर्णपर्णं हरेदायुः शि
राबुद्धिविनाशिनी॥ तस्मादग्रं च मूलं च शिरांश्चैव विशेषतः। चूर्णपर्णं वर्जयित्वा तांबूलं खादयेद्बुधः॥ इति॥
रविः। अथ भोजनोत्तरकृत्यं॥ दक्षः॥ इतिहासपुराणाद्यैः षष्ठसप्तमकौ नयेत्। अष्टमे लोकयात्रा तु बहिः
संध्या ततः पुनः॥ यमः। रवेरस्तमयात्पूर्वं घटिकैका यदा भवेत्। सायं संध्यामुपास्त्याय कुर्याद्धोमं च पूर्ववत्॥

आ॰म॰ ७५ दीपकालः संग्रहे॥ रवेरस्तं समारभ्य यावत्सूर्योदयो भवेत्। यस्य तिष्ठेद्गृहे दीपस्तस्य नास्ति दरिद्र
ता। आयुर्दः प्राङ्मुखो दीपो धनदः स्यादुदङ्मुखः। प्रत्यङ्मुखो दुःखदोसौ हानिदो दक्षिणामुखः।
संध्यावंदनं पूर्वमुक्तं। तत्र विशेषमाह व्यासः। यजेद्वारुणमंत्रास्तु इमम्मे वरुणदिक्रान्। चतुर्मं
त्रान्विशेषज्ञः संध्याफलमवाप्नुयात्। संध्यावंदनाकरणे जमदग्निः॥ एकाहं चाप्यतिक्रम्य सं
ध्यावंदनकर्म वा। अहोरात्रोषितो भूत्वा गायत्र्या चायुतं जपेत्। द्विरात्रे द्विगुणं प्रोक्तं त्रिरात्रे त्रिगुणं
त्रि॰४ भवेत्। त्रिरात्रात्परतस्त्वेष्या च्छूद्र एव न संशयः। कालातिक्रमे पारिजाते गौतमः। संध्याकाले त्वति
क्रांते स्नात्वाचम्य यथाविधि। जपेदष्टशतं देवीं ततः संध्यां समाचरेदिति॥ वसिष्ठस्तु। कालाति
क्रमणे चैव त्रिसंध्यमपि सर्वदा। चतुर्थार्घ्यं प्रकुर्वीत भानोर्व्याहृतिसंपुटं॥ यमस्तु। प्राणायामत्रयं
प्रातः संगवे द्विगुणं चरेत्। मध्याह्ने त्रिगुणं प्रोक्तमपराह्ने चतुर्गुणं। सायाह्ने पंचगुणकं संध्यातिक्र ७५

मणे भवेत्॥ यद्वा दीध्येति मंत्रं वै सप्तवारं जपेद्यतः। तदाक्षकाले कुर्वतः कर्मकाले कालेन तानि तु॥ नवं
तातिशेषः॥ श्राद्धभोजने तु गर्गः। दत्वाप्यवेदायो गायत्र्या श्राद्धभुग्द्विजः। ततः संध्यामुपासीत श्रद्धोत्तु
तदनंतरं। इदं तु संध्याविधिकारार्थं। न तु श्राद्धभोजनप्रायश्चित्तमिति। नृसिंहः। प्रायश्चित्तमेवेत्यन्ये। त
त्तु गुरुप्रायश्चित्तानराशक्ता विति। अथ सायंहोमकालः। कात्यायनः। सूर्येस्तशैलसंप्राप्ते षड्भिः षड्भिरिहां
गुलैः। प्रादुष्करणमग्नीनां प्रातर्भासां च दर्शनात्। तथा। यावत्सम्यङ्न भाव्यंते नभस्यृक्षाणि सर्वतः। न च लो
हितमायाति तावत्सायं च हूयत इति॥ ॥अथ स्वापः॥ ॥गार्ग्यः॥ शुचिदेशे विविक्तं तु गोमयेनोपले
पयेत्। वैदिकैर्गारुडैर्मंत्रैः रक्षामंत्र्य स्वपेत्ततः॥ मंगल्यं पूर्णकुंभं च शिरःस्थाने निधापयेत्। आधौतशुद्ध
आ पादस्तु सौचांतः शयने शुचौ। अभीष्टदेवतां स्मृत्वा संविशेन्मंगलध्वनौ। रात्रिसूक्तं जपन्रात्रौ रात्रिं त्वा
भोजन वेन्नरः। तथा। पूर्वरात्रे व्यतीते तु सगच्छेदिति मंदिरं। पादौ प्रक्षालयेत्पूर्वं पश्चाच्छय्यां समाविशेत्

आ॰म॰
७६

धौतवस्त्रंचतांबूलंसंयोगेचशुभावहं॥अथस्त्रीकृत्यं॥भर्तुःपादौनमस्कृत्यपश्चाच्छय्यांसमाविशेत्
।धौतवस्त्रंचतांबूलं॥अथरतिः॥संस्मृत्यपरमात्मानंपत्न्याजंघेप्रसारयेत्।योनिंस्पृष्ट्वाजपेत्सूक्तंवि
ष्णुर्योनिंप्रजापतेः॥रेतःसिंचेत्ततोयोन्यांनस्नायाज्जन्मविमर्द्दिसेति।याज्ञवल्क्यः॥षोडशर्तुर्निशाःस्त्री
णांतस्मिन्युग्मासुसंविशेत्।ब्रह्मचार्येवपर्वण्याद्याश्चतस्रश्चवर्जयेत्।यथाकामीभवेद्वापिस्त्रीणांव
रमनुस्मरन्निति।कौर्मे॥ऋतुकालाभिगामित्वंस्वदारेषुरतात्मनः।पर्ववर्जंगृहस्थस्यब्रह्मचर्यमुदाहृतमि
ति।एवंप्रकारेणगच्छतःश्राद्धादौनब्रह्मचर्यक्षतिदोषइतिमिताक्षरायां।पंचदशदिनपर्यंतंगमनाभावे
न्यदिनेचश्राद्धप्रसक्तौतद्दिनेदोषाभावपरमिदमितिहेमाद्रिः॥प्रमाणंत्वत्रचिंत्यं॥मनुः॥तासा
माद्याश्चतस्रस्तुनिंदितैकादशीतथा।त्रयोदशीचशेषाःस्युःप्रशस्तादशरात्रयः॥इति।तथा।अष्टम्यां
चचतुर्दश्यांदिवापर्वणिमैथुनं।कृत्वासचैलंस्नात्वातुवारुणीभिश्चमार्जयेत्।मनुः॥अमावास्याष्टमी ७६

चैवपूर्णमासीचतुर्दशी।ब्रह्मचारीभवेन्नित्यमप्यृतौस्नातकोद्विजइति॥तथा।स्त्रीणांतुप्रेक्षणंस्पर्शहास्य
शृंगारभाषणं।स्पंदतेब्रह्मचर्यंचनदारेष्वृतुसंगमात्।इति।तथा।ऋतौतुगर्भशंकित्वात्स्नानंमैथुनिनः
स्मृतं।अनृतौतुयदागच्छेच्छौचंमूत्रपुरीषवदिति।विष्णुः॥क्षतपादादिशौचःस्यान्मुक्त्वासायंततोगृही।गच्छे
च्छय्यामस्फुटितामपिदारुमयींनृपेतिगच्छेच्छय्यांशयनार्थमित्यर्थः॥शयनविधिमाहहारीतः॥सुप्रक्षा
लितचरणःसर्वतोरक्षांकृत्वोदकपूर्णघटादिमंगलोपेतमात्माभिरुचितामनुपहतांसुत्रामाणमितिप
ठन्शय्यामधिष्ठायरात्रिसूक्तंजप्त्वाविष्णुंनमस्कृत्यसर्पापसर्पेतिदंतेइत्येतत्श्लोकद्वयंजप्त्वेष्टदेवतास्म
रणंकृत्वासमाधिमास्थायप्राच्यांचवैदिकान्मंत्रान्सावित्रींचजप्त्वामंगलंअविशांखंचस्पृष्टएवनदक्षिण
शिराःस्वपेदिति।विष्णुपुराणे।रात्रिसूक्तंजपेत्स्मृत्वादेवांश्चसुखशायिनः।नमस्कृत्वाव्ययंविष्णुंसमाधि
स्थःस्वपेन्निशि॥सुखशायिनोदेवागोभिलेनदर्शिताः॥अगस्तिर्माधवश्चैवमुचुकुंदोमहामुनिः।कपिलोमु

आ॰म॰
११

निरास्तीकः पंचैते सुखशायिन इति। दक्षिणशिरा इति प्रदर्शनार्थं। तथा च विष्णुपुराणे। प्राच्यां दिशि
शिरः शस्तं याम्यायामथवा नृप। सदैव स्वपतः पुंसो विपरीतं तु रोगदमिति। हारीतोपि। न तिर्यगुदक्
प्रत्यक्शिराः कोणशिराः पश्चिमशिरा उत्तरशिराश्चेति। दिग्विशेषेण फलविशेष उक्तो मार्कंडेये। प्राक्
शिरः शयने विंद्याद्धनमायुश्च दक्षिणे। पश्चिमे प्रबलां चिंतां हानिं मृत्युमथोत्तरे। स्थलविशेषे दिग्विशे
षमाह गार्ग्यः॥ स्वगृहे प्राक्शिराः शेते श्वाशुर्ये दक्षिणाशिराः। प्रत्यक्शिराः प्रवासे तु न कदाचिदुद
क्शिरा इति। तथा। यानि कानि च पुष्पाणि यत्किंचिदनुलेपनं। अलक्ष्मीपरिहारार्थं निष्येकं युधि
ष्ठिर। शयने वर्ज्यस्थानान्याह मार्कंडेयः। शून्यालये श्मशाने च एकवृक्षे चतुष्पथे। महादेवगृहे वापि
मातृवेश्मनि न स्वपेत्॥ न यक्षनागायतने स्कंदस्यायतने तथा। कूलछायासु च तथा शर्करालोष्टपां
सुषु। न स्वपेच्च तथा दर्भे विनादीक्षां कथंचन। धान्यगोधनविप्राणां गुरूणां च तथोपरि॥ नाकाशे सर्व ७८

तः शून्ये न च चैत्यद्रुमे तथेति। निषिद्धशय्योक्ता विष्णुपुराणे। न विशालां न वा भग्नां नासमां मलिनां तथा
। न च दंतमयीं शय्यामधितिष्ठेदनास्तृतां। न तु जंतुमयीमित्यपि क्वचित्पाठः। दंतमयीं मृतहस्तिदंतमयी
मित्यर्थः। तथा च तत्रैव। मृतदंतमये विद्धे दग्धे दर्भे पलाशजे। न शयीत नरो धान्ये शयने पंचदारुजे। पं
चदारूणि चोक्तानि चूतजंबूद्रुमास्तथा। अम्लिपीगे छितांश्चैव घटसिक्ततरूस्तथा। करिभग्नहते चैव न
शयीत कचिन्नरः इति। स्वापकालमाह दक्षः॥ प्रदोषपश्चिमौ यामौ वेदाभ्यासेन योनयेत्। यामद्वयं शयान
स्तु ब्रह्मभूयाय कल्पत इति। तथा। निद्रासमयमासाद्य तांबूलं वदनात्त्यजेत्। पर्यंकात्समदां लोणोत्तुंगं पुष्पा
णि मस्तकात्॥ इति शयनविधिः॥ तदेतदुक्तमाह्निकमेतदकरणे प्रत्यवायमुक्तं कौर्मे। इत्येतदखिलं प्रो
क्तमहन्यहनि वै द्विजः। ब्राह्मणानां कृत्यजातमपवर्गफलप्रदं। नास्तिक्यादथवालस्याद्ब्राह्मणो न करोति यः
। स याति नरकान् घोरान् काकयोनौ च जायते। नान्यो विमुक्तये पंथा मुक्त्वाश्रमविधिं स्वकं। तस्मात्कर्माणि कुर्वीत

आ॰भ॰ १८ उष्टयेपरमेष्ठिनः॥इति॥ ॥अथरात्रौस्वप्नफलनिर्णयः॥तत्रादौस्वप्नदर्शनावस्थामाह वैद्यः॥सर्वेंद्रिय
व्युपरतौमनोनुपरतंयदा।विषयेभ्यस्तदास्वप्नंनानारूपंप्रपश्यतीति॥सचस्वप्नोद्विविधः।इष्टफलोनिष्ट
फलश्चेति।तत्रसामान्यतइष्टफलोयथा।नदीसमुद्रतरणमाकाशगमनंतथा।भास्करोदयनंचैवप्रज्वलंतं
हुताशनं।ग्रहनक्षत्रताराणांचंद्रमंडलदर्शनं।हर्म्यस्यारोहणंचैवप्रासादशिरसोपिवा॥एवमादीनिसंद
ष्ट्वानरःसिद्धिमवाप्नुयात्।स्वप्नेतुमदिरापानंवसामांसस्यभक्षणं।कृमिविष्ठानुलेपंचरुधिरेणाभिषेचनं
।भोजनंदधिभक्तस्यश्वेतवस्त्रानुलेपनं।रत्नान्याभरणादीनिस्वप्नेदृष्ट्वाप्रसिध्यति।देवविप्रद्विजछत्रवृ
षपंकजपार्थिवान्।शुक्लपुष्पांबरधरान्प्रशस्तान्नरणांगनाः॥वृक्षैनपर्वतक्षीरिफलिवृक्षाधिरोहणं पे२
।दर्पणामिषमाल्याप्तिस्तरणंचमहांभसां॥दृष्ट्वास्वप्नेर्थलाभःस्यात्व्याधिमुक्तश्चजायतइति॥ ॥सामान्य
तोनिष्टफलोयथा॥पूयविट्शुक्रवल्मीकपारिभद्राधिरोहणं।तैलकार्पासपिण्याकलोहावाप्तिर्विपित्तये॥वि १८

वाहकरणेस्वप्नेरक्तस्रग्वस्त्रधारणं।स्रोतसाहरणंनेष्टंपक्वमांसस्यभोजनमिति।तदेवंद्विविधस्या
पिस्वप्नस्यदर्शनेकालभेदेनफलेपिभेदः।स्वप्नाध्याये।स्वप्नास्तुप्रथमेयामेसंवत्सरविपाकिनः।
स्त्रिभिर्मासै द्वितीयेचाष्टभिर्मासैस्त्रियामिके।चतुर्थयामेयःस्वप्नोमासेनफलदःस्मृतः॥अरुणोदयवेलायां
दशाहेनफलंलभेत्॥गोविसर्जनवेलायांसद्यएवफलंभवेदिति॥ ॥अथविशेषतइष्टफलाः।य
स्तुपश्यतिवैस्वप्नेराजानंकुंजरंहयं।सुवर्णंवृषभंगांवाकुटुंबंतस्यवर्द्धते।आरोहणंगोवृषकुंज
राणांप्रासादशैलाग्रवनस्पतीनां।विष्ठानुलेपोरुदितंमृतंवास्वप्नेष्वगम्यागमनंचधन्यं।क्षीरिणंफ
लिनंवृक्षंएकाकीयःप्रयच्छति।तत्रस्थःसविबुध्येतधनंशीघ्रमवाप्नुयात्।यस्यश्वेतेनसर्पेणग्रस्य
तेदक्षिणःकरः।सहस्रलाभस्तस्यस्यात्पूर्णेदशमेदिने।नरगोवृश्चिकोवापिजलेग्रसतियंनरं।
विजयंवार्थसिद्धिंवपुत्रंतस्यविनिर्दिशेत्॥प्रासादशैलमारुह्यसमुद्रंतरतेनरः।अपिदासकुलेजातो

अ॰म॰
१६

राजा भवति वै ध्रुवं॥ यस्तु मध्ये तडागस्य भुंक्ते च घृतपायसं। अखंडे पुष्कपत्रे तं विंद्यात्पृथिवी
पतिं॥ बलाकां कुक्कुटीं क्रौंचीं दृष्ट्वा यः प्रतिबुध्यति। स लभते कन्यां भार्यां स प्रियवादिनीं॥ नि
गडैर्बध्यते यस्तु बाहुपाशेन वा पुनः। पुत्रो वा जायते तस्य धनं शीघ्रमवाप्नुयात्॥ आसने शय
ने याने शरीरे वाहने गृहे। ज्वलमाने विबुध्येत तस्य श्रीः सर्वतोमुखी॥ आदित्यमंडले स्वप्ने चंद्रं वा
यदि पश्यति। व्याधितो मुच्यते रोगाद्रोगी श्रियमाप्नुयात्॥ रुधिरं पिबति स्वप्ने सुरां वा पितथा
नरः। ब्राह्मणो लभते विद्यामितरो लभते धनं॥ शुक्लांबरधरा नारी शुक्लगंधानुलेपना। अव
गूहति यं स्वप्ने श्रियं तस्य विनिर्दिशेत्॥ पादुकोपानहौ छत्रं लब्ध्वा यः प्रतिबुध्यते। असिं वा नि
र्मलं तीक्ष्णं साधनं तस्य निर्दिशेत्॥ रथं गोवृषसंयुक्तमेकाकी यः प्ररोहति। तत्रस्थः स विबुध्ये
त धनं शीघ्रमवाप्नुयात्॥ दधिलाभेन वेदार्थो घृतलाभेन ध्रुवं यशः। घृताशने ध्रुवः क्लेशो यशस्तु ७९

दधिभक्षणे। आंत्रैस्तु वेष्टितो यो सौ नगरेपि गृहेपि वा। गृहे मांडलिको राजा नगरे पार्थिवो भवे
त्॥ मानुषाणि तु मांसानि स्वप्नांते यस्तु पश्यति। दुरितानि तु पक्वानि शृणु तस्य च यत्फलं॥ पादभक्षणे श
तं लाभः सहस्रं बाहुभक्षणे। राज्यं शतसहस्रं वा भवेद्वै शीर्षभक्षणे॥ सर्वाणि शुक्लान्यपि शोभनानि
कार्पासभस्मौदनतक्रवर्जं। सर्वाणि कृष्णान्यतिनिंदितानि गोहस्तिदेवद्विजवाजिवर्जं॥ क्षीरं पिबति
यः स्वप्ने सफेनं दोहने स्थिते। सोमपानं भवेत्तस्य भुक्त्वा भोगानशेषतः॥ दधि दृष्ट्वा भवेत्प्रीतिर्गोधूमांश्च ध
नागमः। यवान्यज्ञागमं विंद्याद्व्रीहीन्सिद्धार्थकान्यपि॥ नागपत्रं लभेत्स्वप्ने कर्पूरमगरुं तथा। चंदनं पांडुरं पु
ष्पं तस्य श्रीः सर्वतोमुखी॥ ॥ अथ विशेषतो निष्फलाः॥ शौनकः॥ अथ स्वप्नानि वक्ष्यंते दुर्निमित्ता
द्भुतानि तु। आदित्यं वाथ चंद्रं वा विगतच्छविकं तथा। पतंतं वाथ नक्षत्रं तारकां दीप्तिवा यदि। वाससे तमा
नवः स्वप्ने मरणे शोकमाप्नुयात्॥ नावमारोहयेद्यस्तु नदीनां च समुत्तरे। प्रवासं निर्दिशेत्तस्य शीघ्रं च पुन

आ॰ म॰ रागमं॥ रक्तांबरधरा नारी रक्तगंधानुलेपना॥ अवगूहति यं स्वप्ने मृत्युं तस्य विनिर्दिशेत्॥ तैलेनाभ्यक्त-
८० कायस्तु पयसा तु घृतेन वा। स्नेहेन वा तथाऽन्येन व्याधिं तस्य विनिर्दिशेत्॥ केशा यस्य विशीर्यंते यस्य दंताः
पतंति वा॥ अर्थनाशो भवेत्तस्य पुत्रो वा यदि नश्यति। खरोष्ट्रमाहिषवरथमेषाकीयः प्ररोहति। तत्रस्थः
स तु बुध्येत मृत्युं शीघ्रमवाप्नुयात्॥ कर्णनासाकरादीनां छेदनं पंकमज्जनं। पतनं दंतकेशानां प-
क्वमांसस्य भक्षणं। खरोष्ट्रमाहिषं यानं तैलाभ्यंगं च मृत्यवे। इति स्वप्नफलनिर्णयः॥ ॥अथा-
रिष्टानि॥ आरुंधतीं ध्रुवं चैव विष्णोस्त्रीणि पदानि च। आयुर्हीना न पश्यंति चतुर्थं मातृमंडलं
॥ देहे प्ररुंधती जिह्वा ध्रुवो नासाग्रमुच्यते। भ्रुवोर्मध्यगतं मध्यं तारका मातृमंडलं॥ आकीर्णेस्य व-
र्णी यस्य न घोषं स्पृष्टश्च यात्तथा। नश्येन्मेदाग्निनामिं दीपच्छायां नेत्ते गतायुषः॥ पांसुपंकादिषु न्यस्तं खं-
डं यस्य पदा न वेत्॥ पुरतः पृष्ठतो वापि सोऽष्टौ मासान्न जीवति॥ स्नानांबुलिप्तगात्रस्य यस्याशु प्र- ८०

कृ प्रशुष्यति। गात्रेष्वार्द्रेषु सर्वेषु सोऽर्द्धमासं न जीवति॥ ॥अथ दुःस्वप्नशांतिमाह शौनकः
ह्री २ ॥एवमाद्यानि चान्यानि उक्तान्युक्तानि बहून्यपि। स्वप्नोत्पातानि चैतेषां कालरात्र्यधिदेवता। पूजा-
विधानं पूर्वोक्तं कुर्याद्दिवापि यत्नतः। पूर्वोक्तमिति रात्रिसूक्तकल्पवदित्यर्थः॥ रात्रिसूक्तकल्प-
श्च ग्रंथगौरवभयान्न लिखितः॥ होमं कुर्यात्प्रयत्नेन राजा वा वेदविज्जोत्तमः। उक्तेनैव विधानेन स घृतं
पायसं हुनेत्। उक्तेन विधानेनेति स्वगृह्योक्तविधानेनेत्यर्थः॥ प्रत्यृचं पायसं हुत्वा रात्री व्य-
दिति क्रमात्। अष्टोत्तरशतं हुत्वा सूक्तेनानेन वित्तथा। स्वप्नाधिपतिमंत्रेण हुनेदष्टोत्तरं शतं। स्व-
प्नाधिपतिमंत्रेण कालरात्रे नमिमंत्रेणेत्यर्थः॥ ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत्। पूर्वो-
क्तमभिषेकं यत्तदा चापि विधीयते। पूर्वोक्तं ग्रहयज्ञोक्तमित्यर्थः। गुरवे दक्षिणां दद्याद्वस्त्रं हेम प-
यस्विनपि। यथाशक्त दक्षिणां पादयेत्। ब्राह्मणान्भोजयेत्तत्रा सुशीलान्वेदपारगान्नन्वेषु पा

आ॰म॰ ८१

यस्माद्दैवपरत्वान्निःस्पृहबहूनि चात्र अनेन विधिना यस्तु शांतिं कुर्वीत शक्तितः। तस्य वर्षशतायु
ष्यं नवत्येव न संशयः॥ ॥इति श्रीमीमांसापारावारपारीणधुरीणभट्टशंकरसूनोर्नी
लकंठस्य कृतावाचारमयूखः॥ ॥संवत् १७३७ वर्षे माघवदि ५ ।१० बुधे लिखितं मं
श्रीमल्लक्ष्मसुतरामजिताभिनंदनवंद्यमोरस्तु॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ८१

आचारमयूखः॥पत्र ८१

द्वितीयोमयूखः २

५८ शिवपूजाविधिः
६० पार्थिवपूजाविधिः
६३ नानाधातुलिंगविशेषे फलविशेषः
६४ गृहेऽर्चनयोग्यमूर्तिप्रमाणं
६४ पंचसूत्रप्रमाणं
६४ वैश्वदेवविधिः
६५ भूतयज्ञः
६६ पितृयज्ञः
६७ गृहबलिः
६७ मनुष्ययज्ञः
६८ कात्यायनीयवैश्वदेवः
६९ भोजनविधिः
७० प्राणाहुतिः २
७० आपोशानं १
७० भोजनप्रकारः प्रमाणंच
७० सायंप्रातर्भोजननिर्णयः
७२ हस्तदर्व्यादिदत्तान्न भोजनेग्राह्याग्राह्य नि०
७४ भोजनोत्तरांगानि
७५ भोजनोत्तरकृत्यं
७५ दीपकालः
७५ संध्यावंदनाकरणे प्रत्यवायः
७५ संध्याकालातिक्रमे
७६ श्राद्धभोजने
७६ सायंहोमकालः
७६ स्वापविधिः
७६ रतिः
७७ शयनेवर्ज्यस्थानानि
७८ निषिद्धशय्या
७८ स्वापकालः
७८ आह्निकाकरणेप्रत्यवायः
७८ रात्रौस्वप्नफलनिर्णयः
८० अनिष्टानि
८१ दुःस्वप्नशांतिरिति

॥ आचारमयूखस्यानुक्रमणिका ॥

१ प्रबोधविधिः
५ मूत्रपुरीषोत्सर्गविधिः
७ शौचं
८ शारीरमलशौचं
९ यथोक्तशौचाकरणे प्रायश्चित्तं आचमनविधिराचमननिमित्तानि च सत्वत्
१० द्विराचमननिमित्तानि
११ आचमनापवादः। दंतसक्तस्य निगरणानि
१२ आचमनविधिः
१४ आचमनात्पूर्वं गंडूषान् अपां पर्युक्षणं कुशानां परिमाणं ग्रहणे विशेषश्च
१५ आचमनासंभवे आचमनस्य सर्वकर्मांगत्वं दंतधावनं च
१७ दंतधावने वर्ज्यानि
१८ दंतधावनमंत्रो। दंतधावनोत्तरं
१९ पवित्रविधिः
२१ स्नानं
२२ स्नानांगतर्पणं नदीस्नमापनं परिधेयवस्त्रे विशेषः
२३ उत्तरीयाभावे नि०
२४ ग्रस्तपरिशिष्टस्नानविधिः
२५ काम्यस्नानं
२६ अश्वत्थछायाजलस्नानं
२६ समुद्रस्नानं
२६ नैमित्तिकस्नानं
२७ मध्ययामयोरुक्तविशेषः
२७ मलापकर्षणस्नानं
२८ मध्याह्नस्नाने विशेषः
२९ गौणस्नानानि
२९ सारस्वतस्नानं
२९ गायत्रस्नानं
३० तिलकविधिः
३१ भस्मधारणप्रदेशाः
३१ भस्मधारणमंत्राः
३२ संध्यावंदनं
३२ आदित्यस्यैवकालभेदेन नामानि
३३ संध्याकालः
३३ तद्देशः
३३ संध्याप्रयोगः
३३ मार्जनविधिः
३३ प्राणायामः
३४ प्रातर्मध्याह्नसायाह्ने आचमनमंत्रेषु विशेषः
३५ द्वितीयमार्जनं
३५ पापनिरसनं
३५ अर्घ्यदानं
३५ मध्याह्ने विशेषः
३६ षोडशाक्षरमंत्रः
३६ गायत्रीजपविधिः
३७ जपस्थानानि
३७ ऋष्यादि
३८ उपस्थानं
३८ देवादिगामाध्याह्निकमकरणे विशेषः
३८ सायंप्रातःकालयोरुपस्थाने विशेषः
३९ अंगांतरेष्वसामर्थ्ये त्र्यर्घ्यप्रक्षेपस्यावश्यकत्वं
३९ अग्निश्चेति मंत्रार्थः सूतके च संध्यायां विशेषः
३९ आपः पुनंत्वित्यादि
३९ अथ काम्यजपाः
४० होमविधिः
४० तद्देशकालौ
४० प्रातर्होमकालः
४० सायंकालः
४० पक्षहोमः
४१ नित्यदानं
४१ मंगलदर्शनं
४१ द्वितीयभागकृत्यं
४१ पोष्यवर्गः
४१ कुसूलादिवृत्तिमुक्तिः
४१ प्रतिग्रहे विशेषः
४२ चतुर्थभागकृत्यं
४२ पंचमहायज्ञाः
४३ एतेषामकरणे प्रायश्चित्तं
४३ सूतकमध्येपि ब्रह्मयज्ञनित्याद्यवारा न त्याज्याः
४५ तर्पणं
४६ तर्पणे कासुचित्तिथिषु विशेषः
४७ तर्पणे स्थलपात्रादौ विशेषः
४७ पित्रादितर्पणे विशेषः
४८ अशक्तौ संक्षेपतर्पणं
४८ सूर्यायार्घ्यदानं
४८ दर्भत्यागावकाशस्थानानि
४८ दर्भत्यागमंत्रः
४८ वस्त्रनिष्पीडनं
४८ भीष्मतर्पणं
४८ यमतर्पणं
४९ तर्पणे तिलनिषेधः
५० देवपूजाविधिः
५० पंचायतनस्थापनप्रकारः
५१ अर्चनादौ विशेषः
५१ पुष्पपत्रादिसमर्पणे विशेषः
५५ तुलसीरोपणे मंत्रः
५५ पूजायतनानि
५६ स्त्रीशूद्रयोः शा
५६ लिंगार्चने निषेधः
५७ विष्णोः षोडशोपचारैः पूजनं
५७ गंधपुष्पादिसमर्पणं

५८ शिवपूजाविधिः
६० पार्थिवपूजाविधिः
६२ नानाधातुलिंगविशेषे फलविशेषः
६४ गृहेऽर्चनयोग्यमूर्तिप्रमाणं
६४ पंचसूत्रप्रमाणं
६४ वैश्वदेवविधिः
६५ भूतयज्ञः
६६ पितृयज्ञः
६७ गृहबलिः
६७ मनुष्ययज्ञः
६८ कात्यायनीयवैश्वदेवः
६९ भोजनविधिः
७० प्राणाहुतिः २
७० अपोशानं १
७० भोजनप्रकारः प्रमाणंच
७० सायंप्रातर्भोजननिर्णयः
७२ हस्तदर्वीभ्यां दत्तान्नभोजने ग्राह्याग्राह्यनि०
७४ भोजनोत्तरांगानि
७५ भोजनोत्तरकृत्यं
७५ दीपकालः
७५ संध्यावंदनाकरणे प्रत्यवायः
७५ संध्याकालातिक्रमे
७६ श्राद्धभोजने
७६ सायंहोमकालः
७६ स्वापविधिः
७६ रतिः
७७ शयनेवर्ज्यस्थानानि
७८ निषिद्धशय्या
७८ स्वापकालः
७८ आह्निकाकरणेप्रत्यवायः
७८ रात्रौस्वप्नफलनिर्णयः
८० अनिष्टानि
८१ दुःस्वप्नशांतिरिति